ISSN 0976-8645

# Jahnavi Sanskrit E-Journal

## दशमाङ्के भवतां सर्वेषां मङ्गलाभिनन्दनम्।




**मुख्यसम्पादकः** डा० सदानन्दझा, व्याकरणविभागाध्यक्षः, आदर्शमहाविद्यालयः दरभङ्गा, बिहार

**पुनर्वीक्षकः** डा. मखलेशकुमारः, पुराणेतिहासविभागाध्यापकः, राष्ट्रियसंस्कृतसंस्थानम्, पुरी, ओडिशा

**सम्पादकः प्रकाशकश्च** बिपिन कुमारझा, साहित्यविभागाध्यापकः (अनु.), राष्ट्रियसंस्कृतसंस्थानम्, पुरी, ओडिशा



## INDEX


| | | |
|---|---|---|
| १ | सम्पादकीयम्<br>प्रकाशकीयम् | डा. सदानन्द झा<br>बिपिन कुमार झा |
| २ | वैदिकवाङ्मये परिसरः | डा. सुमन के. एस. |
| ३ | प्रमाणस्वरूपजिज्ञासा | डा. सुनीलः के. एस. |
| ४ | श्रीमद्भागवतीयशिक्षातत्त्वविमर्शः | डा. मखलेशकुमारः |
| ५ | संस्कृतवाङ्मये मानवीयमूल्यानि | डा. पि. वेङ्कटरावः |
| ६ | गीताऽमृततत्त्वानां व्यावहारिकं विश्लेषणम् | बिपिनकुमारझा, दिपेशविनोदकतिरा च |
| ७ | व्याकरणं तत्सम्बद्धं भाषाविज्ञानञ्च | रामसेवकझा |
| ८ | शाकटायनव्याकरणसूत्राणां पाणिनीयदृष्ट्या समीक्षणम् | राजीवसेठी |
| ९ | विवेकचूडामणौ दार्शनिकतत्त्वविश्लेषणम् | दयानन्दपाणिग्राही |
| १० | भारतीयदर्शने साङ्ख्याचार्यः कपिलः | अशोककुमारमीना |
| ११ | किरातार्जुनीयस्याद्यसर्गद्वये त्रिवर्गसङ्घर्षः | डा. अनुपमारयली |
| १२ | भारतीयसंस्कृतौ तपोवनस्वरूपम् | सुदीपचक्रवर्त्ती |
| १३ | वास्तुपुरुषविचारः | डा. प्रदीपकुमारझा |
| १४ | भारतीयज्योतिषशास्त्रदृष्ट्या वर्ष-अयन-ऋतुविचारः | डा. भूपेन्द्रनारायणझा |
| १५ | अर्थवैचित्रे श्रीहर्षप्रयुक्ताः शब्दाः | साधनकमारपात्रः |
| १६ | वह्निस्वरूपम् | श्यामबिहारीचौधुरी |
| १७ | सम्बद्धसित्याध्ययनस्य उपादेयता | डा. मदनकुमारझा |
| १८ | शास्त्रप्रवृत्तेः मूलाधारभूता उद्देश्य-लक्षण-परीक्षा | दीपककुमारद्विवेदी |
| १९ | वर्तमानयुग में तर्कबुद्धि एवं तर्कशास्त्र की उपादेयता | विद्यावाचस्पति डा. सदानन्द झा |
| २० | वेदान्त से मोक्षप्राप्ति | प्रो. जितेन्द्रटलर |
| २१ | महाभारत में व्यावहारिक आचारसम्बन्धी नियम-निर्देश | डा. प्रज्ञापाण्डेयदीक्षतः |
| २२ | माघकाव्य में नारी की स्थिति : एक परिचय | श्रीमती प्रेमलता भाटी |
| २३ | संस्कृत-साहित्य में प्रयुक्त भाग्यपरक लोकोक्तियाँ | डा साधना सहाय |
| २४ | पाश्चात्य समीक्षा के परिप्रेक्ष्य में ध्वनि | अर्चना पाण्डेय |
| २५ | Importance of ‘Water’ | Ajay Vidyadhar Pendase |
| २६ | SCIENTIFIC EFFECT OF GITA IN MORDEN CIVILIZATION | Archana Barik |
| २७ | Buddhistic influences in the Cambodian Inscriptions | M. Sarkar and P. Majumdar |


Note- Printout of this paper can be accepted along with CERTIFICATE OF APPRECIATION only for official use.

# सम्पादकीयम्



डा. सदानन्द झा[1]

शिवशिरसि वसन्ती संविदानन्दनीरा,

हृदयकलुषपुञ्जं प्रक्षिपन्ती विदूरे।

सघनतमसि दिव्यं ज्योतिरालोकयन्ती,

प्रसरतु भुवि भव्या जाह्नवी कापि दिव्या॥

अये शास्त्रविचारपरिशीलनलब्धजनाः विद्वत्प्रवराः सुरसरस्वतीकमलानुरागिणः सुधियश्च,

विश्वस्य प्रथमान्तर्जालीयजाह्नव्याः त्रैमासिकपत्रिकाया दशमाङ्कं तत्रभवतां सुरसरस्वतीसमाराधनतत्पराणां विदुषां करकमलयोः समर्पयन् नितरां प्रमोदमनुभवामि। प्रस्तुतस्य दशमाङ्कस्य लोकार्पणकार्यक्रमः जयपुरस्थजगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयस्य स्वनामधन्यैः ऋषिकल्पैः श्रीमद्भिः कुलपतिपदमलङ्कुर्वद्भिः प्रो. रामानुजदेवनाथन्-महोदयैः विविधकार्यक्रमव्यस्तैरपि 'जाह्नव्याः' लोकार्पणकृते कृपानुमतिः प्रदत्तास्ति। एतदर्थं कार्तज्ञं प्रकटयति जाह्नवीपरिवारः।

सम्पूर्णेऽस्मिन् जगति पत्रिकामाध्यमेन समे विद्वांसः बद्धपरिकराः सन्तु इत्येव प्रधानमुद्देश्यमस्माकम्। अशेषजगतः संस्कृतविद्वद्भ्यः संस्कृतानुरागिभ्यश्च सप्रश्रयमस्माकं निवेदनमस्ति यत् समे समानमनसो भूत्वा जाह्नवीं पल्लवितां पुष्पितां च कर्तुं प्रतिश्रुतिं विदध्युः। यथा भगवतो पार्वतीजानेः विश्वनाथस्य जटातः प्रवहन्ती भगवती जाह्नवी त्रैलोक्यं पुनाति, मज्जतां मनोनिर्मलं विधाय

[1] पत्रिकायाः मुख्यसम्पादकः।

Note- Printout of this paper can be accepted along with CERTIFICATE OF APPRECIATION only for official use.



प्रसादयति, मुक्तिपथं च प्रकाशयति तथैवेयं जाह्नव्यपि सुरसरस्वती सेवापरायणानां संस्कृतानुरागिणां च मनसि दिव्यसौरभप्रसादं निधत्तामिति कामयामहे।

अन्ते विभिन्नप्रान्तेभ्यः येषां सारस्वतसमुपासकानां महत्वाधायिनो निबद्धाः सम्प्राप्ताः, यदीया कृपालभ्या जाह्नवीयं समुज्जृम्भमाणास्ति तेभ्यो भूयो भूयः साञ्जलिं धन्यवादान् वितरामः।

श्रुतिध्वनिमनोहरा मधुरसा शुभा पावनी,

स्मृताऽप्यतनुतापहृत् समवगाह शान्तिप्रदा।

निषेव्यपदपङ्कजा विबुधवृन्दमान्याऽमला,

समस्तजगतीतले प्रवहतादियं जाह्नवी॥

विद्वच्चरणचञ्चरीकः

झोपाख्यः सदानन्दः

लखनौरम्, विहारः

Note- Printout of this paper can be accepted along with CERTIFICATE OF APPRECIATION only for official use.

# प्रकाशकीयम्



बिपिनकुमारझा[2]

महतः भवनस्य निर्माणात् प्रागेव निर्मातारः तद्विषयकान् सूक्ष्मतमान् अपि अंशान् अविगणयन्तः सुस्पष्टां योजनां कल्पयन्ति। तदाधारेणैव भवनस्य प्रथमायाः शिलायाः न्यासादपि प्राक् ते निर्मीयमाणस्य भवनस्य लघीयः कर्गजमयं यथावत् प्रतिरूपं निर्मान्ति। ततश्च कतिपयैः वर्षैः यथा प्रतिरूपम् आसीत् तथा एव वास्तविकं भवनमपि दृग्गोचरं भवति। कस्यचित् भवनस्य निर्माणे यदि प्राप्यस्य लक्ष्यस्य इयत् सूक्ष्मं, स्पष्टं च चिन्तनं अपेक्ष्यते चेत् समग्रस्य राष्ट्रस्य निर्माणे, समग्रस्य जगतः कल्याणे च कर्तव्ये सुस्पष्टस्य लक्ष्यस्य महत्त्वं कियत्, इत्यस्य विषये विद्वांसः बोधनं नैव अर्हन्ति।

राष्ट्रस्य निर्माणाय, विश्वस्य कल्याणाय च यदा इयं संस्कृता जाह्नवी साधनत्वेन परिकल्पिता, तदापि प्राप्यस्य लक्ष्यस्य चिन्तनं कृतमेव। भवननिर्माणस्य प्रक्रियायां तन्निर्माणेन सम्बद्धस्य एकैकस्यापि कार्यकर्तुः मनसि प्रतिक्षणं यथा तस्य पूर्वकल्पिता योजना प्रारूपं वा तिष्ठति, तथैव जाह्नव्याः भुवि अवतारणाय कटिबद्धानाम् अस्माकमपि पुरतः प्रतिक्षणं तल्लक्ष्यं तिष्ठतु इत्यतः आदावेव व्यक्ततया अस्मद्ध्येयवाक्यं लिख्यते "श्रेयान् ज्ञानमयो यज्ञः" इति।

श्रीमद्भगवद्गीतासु भगवान् उवाच- 'श्रेयान् द्रव्यमयाद्यज्ञात् ज्ञानयज्ञः परन्तप, सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते' (चतुर्थाध्यायस्य त्रयस्त्रिंशत्तमः श्लोकः) इति। तत एव प्रेरितानामस्माकमिदं ध्येयवाक्यं - "श्रेयान् ज्ञानमयो यज्ञः" इति।

अथ को नाम गीतायामुपदिष्टः 'यज्ञः'? स तावत् स्वार्थभावनां विना परमेशस्य प्रीतये प्रवृत्तं कर्म। पूर्वत्र "द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः (तत्रैव अष्टविंशः

[2] प्रकाशकः सम्पादकश्च





श्लोकः)" इत्येवं भगवान् विविधान् यज्ञान् बोधयति। अत्र तावत् सर्वेष्वपि तेषु ज्ञानयज्ञस्य श्रेष्ठत्वं तेन प्रतिपाद्यते। तद्युक्तमपि। ईशकार्ये द्रव्यं समर्पयन् कश्चित् पुण्यमापादयत्येव ईशकार्याय श्रेष्ठानि कर्माणि कुर्वन्नपि कश्चित् पुण्यभाग्भवत्येव, किन्तु शुद्धज्ञानस्य दीपेन तावत् कोटिशः जनाः प्रेरयितुं शक्यन्ते स्वार्थविरहिताय महते द्रव्यसमर्पणाय, महते कार्याय च। संस्कृतायाः वाचः समुपासकाः सर्वेऽपि वयं तन्निष्ठं ज्ञानं सम्पिबन्तः आत्मकल्याणं साधयन्तः तदेव ज्ञानं समाजाय पाययन्तः ज्ञानयज्ञस्य कर्तारः भवेम इति प्रेरयति इदम् ध्येयवाक्यं "श्रेयान् ज्ञानमयो यज्ञः" इति।

कोऽस्य यज्ञस्य प्रवर्तयिता? वयम्। संस्कृतोत्थानाय समाजोत्थानाय च सर्वकारः किमपि कुर्यात्, अन्ये वा किमपि कुर्युः इति मोघाशापाशबद्धाः वयं न तूष्णीं तिष्ठामः। इदं राष्ट्रं मदीयम्। अस्य उत्थानस्य आरम्भः मम उत्थानेन। अतोऽहं उत्थास्यामि, मम कुटुंबस्य उत्थानं करिष्ये, ततो मम ग्रामस्य, ततो मम राष्ट्रस्य, ततश्च समग्रस्य जगतः, तेनैव चाहं परमेशं प्रीणयिष्यामि इत्येवमस्माकं चिन्तनसरणी स्यात्।

किं हूयतेऽस्मिन् यज्ञे? ज्ञानम्। "इदं ज्ञानं समाजाय, इदं न मम। इदं ज्ञानं राष्ट्राय, इदं न मम" इति भूयो भूयो भणन्तः वयं यजामहे। स्वार्थचिन्तनस्य नितान्तम् अभावः एव गीतोपदिष्टस्य यज्ञस्य विशेषः इति तु पूर्वमेवोक्तम्।

कोऽग्निः? संस्कृतम्। अग्निः हव्यवाडिति उच्यते। कस्मात्? हव्यं वहति इष्टदेवतां प्रति। पावक इत्यपि स उच्यते। कस्मात्? पुनाति होतारमित्यतः। संस्कृतमपि तथा। सम्प्रति भारते अल्पसंख्याका एव अस्मत्सदृशाः संस्कृतामृतम् आस्वादयन्तः सन्ति। अन्ये तु अस्मद्बान्धवाः काचार्थं लौकिकसम्पत्यर्थञ्च विश्वकल्याणसाधनसमर्थं संस्कृतरत्नम् अवगणयन्ति अज्ञानात्। स्थित्यामस्यां ज्ञातसंस्कृतमहिमानः कथं वा वयं तुष्णीम् आस्महे। अतः संस्कृतद्वारैव ज्ञानयज्ञमिमं प्रवर्तयामः।

का अस्माकम् इष्टदेवता? जगति स्थितस्य एकैकस्य जन्तुनः हृदि स्थितः परमेश एव अस्माकं देवता। पाश्चात्यान् अन्धवदनुसरन्तः, तानेव बुद्धिमतः भावयन्तः, विस्मृतस्वाः, हीनसत्त्वाः, आत्मविश्वासशून्याः च अस्माकं भारतीयाः बान्धवाः संस्कृतामृतेन यदा सिक्ताः भवेयुः, तदा तेषु सत्त्वस्य चेतनायाः संचारः भविष्यति। तेन भारतस्य समुत्थानं भविष्यति। भारतमेव हि समग्रं विश्वं सौहार्दस्य मन्त्रं

बोधयिष्यति। आत्मन्येव परमसमृद्धेः , परमशक्तेश्च दर्शनं कारयिष्यति। तेन परपीडनद्वारा, परशोषणद्वारा सुखस्य लिप्सा विनङ्क्ष्यति। तेनैव च सर्वेषां हृदि स्थितः परमेशः तुष्टः सन् मोदिष्यते। तदैव हि अयं ज्ञानमयो यज्ञः सफलतामेष्यति।

अस्तु, महद्भवनस्य रूपरेखा सदृशी एवेयं पत्रिका। एतस्याः प्रकाशनकार्ये लिपिगतसमस्या महती, यस्याः निराकरणं लेखप्रेषकैः 'यूनीकोड' फोण्टमाध्यमेन प्रेषणे सत्येव सम्भविष्यति। अपरा समस्याऽस्ति निर्धारितानिवार्यविवरणस्याभावरूपा, यस्याः समाधनमपि लेखप्रेषकैः प्रदत्तविवरणपत्रपूरणे सत्येव भविता। ईश्वरकृपया पत्रिकाप्रकाशनकार्यमिदं साफ़ल्यं संजायते इति मन्ये। सारस्वतकर्मण्येऽस्मिन् ये महामान्याः सुविज्ञाः पण्डिताः स्वाशीर्वचोभिः सनाथीकृतवन्तः तेभ्यः महानुभावेभ्यः प्रणतिपूर्वकं प्रणामाञ्जलिमर्पयामि। अन्येभ्यः सहायकेभ्यः वाग्व्यापारैः भूयो भूयः धन्यवादान् व्याहृत्य भगवन्तमुपास्यदेवं सम्प्रार्थ्य विस्तरात् विरमामि ।

विनयावनतः

पुरी, ओडिशा — बिपिनकुमारझा

XXXXXXXXXXXXXXXXXXXXX

Note- Printout of this paper can be accepted along with CERTIFICATE OF APPRECIATION only for official use.



# वैदिकवाङ्मये परिसरः

**डा. सुमन के. एस**[3]

अयि मान्याः ! अवधारयन्तु विदितानवद्यविद्यावृन्दविदीर्णमोहान्धतमसो विद्वाम्सः ! विषयमिमं पात्रीकुरुत नेत्रयोरथवा श्रोत्रयोः ।
“वेदाः ह्येवैनं वेदयन्तीति वेदाः”इति शास्त्रवचनानुसारेण ऋगादयः चत्वारः अपौरुषेयाः श्रुतयःबादरायणमुनिनासंहितादिक्रमेण विभक्ताः वेदाः वा परममुख्यतया सर्वोत्तमं हरिमेव प्रतिपादयन्ति अमुख्यतया इन्द्रादिदेवताः, लौकिकविचाराम्श्च आचक्षते । तदुक्तं वेदानां अर्थत्रयप्रतिपादकत्वविषये तत्रभवद्भिः नारायणपण्डिताचार्यैः -
“स्यात्तथेत्थमपि सम्भवितार्थः त्यर्थतां श्रुतिषु वित्त दशार्थम् ।
भारतं ननु शतार्थमपि स्यात् वैष्णवं पदसहस्रतयं हि”[4]॥इति ।
एतादृग्भिः अनन्तसङ्ख्याकैः वेदैः परिसरविषये परिसरमालिन्यविषये तत्परिहरणविषये आहोस्वित् तन्नियन्त्रणविषये के वा विचारा अनुगृहीता इति प्रस्तूयन्तेऽत्रावगाहनाय तत्रभवतां भवतां गरीयसां वरीयसां विदुषाम् ।

ननु **परिसरो** नाम न केवलं अनेकेषां मानवानां सहवर्तिता एव किन्तु सस्यवृक्षादीनां प्राणिपक्षिणां पञ्चभूतानां समष्टिरेव इति विदितमेव सर्वेषाम् । एवञ्च निर्घृणं मानवसमुदायम् अभितः वर्तमानास्त्विमे पञ्चभूतवृक्षमृगादयः कथं जगत्कल्याणाय सर्वदा यतमानास्सन्ति इति विषये अपौरुषेयाणां वेदानाम् अभिप्रायास्त्वत्र विमृश्यन्ते यथामति ।
पूर्वं वैदिकाः पण्डितास्तावत् यत् प्रतिदिनं सन्ध्या-जप-होम-पूजादिसर्वविधयज्ञाचरणकाले अवश्यं पठन्ति स्म, यदद्यापि विरलतया सार्थमनर्थं वा सस्वरं अस्वरं वा स्मारं स्मारं पठ्यते तदा तदा यथा -
“मधु वाता ऋतायते । मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः । मधु नक्तमुतोषसो मधुमत्पार्थिवं रजः । मधु द्यौरस्तु नः पिता । मधुमान्नो वनस्पतिर्मधुमानस्तु सूर्यः । माध्वीर्गावो भवन्तु नः”[5]॥इति मन्त्रः ।

यस्याभिप्रायः - ‘शुद्धः पवनः पावयत्वस्मान् , परिशुद्धं च नदीजलं पवित्रीकरोतु नः , सस्यादयः अस्मभ्यं ओषधयो भवन्तु , सूर्यकिरणाः अस्माकं बुद्धिविकासाय भवेरन् , धेनवः मातर इव अमृतप्रायक्षीरं स्रावयन्तु’ इत्येवमादिलोककल्याणवाचकास्त्विमे मन्त्राः । अनेन न केवलं तेषु प्राचीनर्षिमुनिषु परिसरप्रज्ञा किंरूपिणी आसीत् इत्येव ज्ञास्यतेऽस्माभिः अपि तु जगत्क्षेमाय कथं ते प्रायतन्त कायेन-वाचा-मनसा इत्यपि सुष्ठु ज्ञातव्यं भवति ।

## भूमहिमा

[3] संस्कृतविभागाध्यक्षः, जैनविश्वविद्यालयः, बङ्गलोर
[4] सुमध्वविजयः - नारायणपण्डिताचार्यकृतः - ९ सर्गः
[5] तैत्तिरीयारण्यकम् - १० मण्डलम् - ३० सूक्तम्

Note- Printout of this paper can be accepted along with CERTIFICATE OF APPRECIATION only for official use.

एवमेव मातृभूतायाः भूमेः संरक्षणमस्माकमाद्यं कर्तव्यमिति सूचयति वेदपुरुषः - 'माता भूमिः पुत्रोऽहं पृथिव्याः'[6] इति । भूमिर्न हि भोग्यवस्तु किन्तु पूजनीया इत्यवधारणीयम्भवति ।
इममेव मनसि निधाय पुराणमनुवदति वक्ति वा -
"दशकूपसमो वापी दशवापीसमो ह्रदः । दशह्रदसमः पुत्रः दशपुत्रसमो द्रुमः"[7]॥ इति ।
पुराणदृष्ट्या तु वृक्षाः मानवेभ्योऽप्यतिरिच्यन्ते ॥

## वायुमहिमा

यस्मात् अस्मत्पितरः वायुमालिन्यात् सम्भवनीयां हानिं शुद्धवायोर्महत्ताञ्च सम्यगजानन् तत एव भगवन्तं वायुदेवमेवं प्रार्थयन् सदा -
"आ वात वाहि भेषजं वि वात वाहि यद्रपः । त्वं हि विश्वभेषज देवानां दूत ईयसे"[8]॥ इति ।
'हे वायो ! त्वञ्च अस्मान् प्रति ओषधिपूर्णगन्धमादेहि, त्वमेव जगतः चिकित्सकः । यतः, भवान् देवानां दौत्यं वहन् सर्वत्र सञ्चरति' इत्यभिप्रायकोऽयम्मन्त्रः।
वायुरपि मन्त्रद्वारा एवमुत्तरति -
"आ त्वागमं शान्तातिभिरयो अरिष्टितातिभिः । दक्षन्तु उग्रमाभिरिष्टं परायदमं सुवामि ते"[9] ॥ इति ।

क्वचित् महाभारतेऽपि[10] नारदशाल्मलिवृक्षसंवादप्रसङ्गे वायोर्वैशिष्ट्यं वर्णयन् भीष्मः युधिष्ठिरङ्कथयति -"बन्धुत्वादथवा सख्याच्छाल्मले नात्र संशयः ।पालयत्येव सततं भीमः सर्वत्रगोऽनिलः"॥

अनेन पञ्चभूतानां सस्यादिभिस्सह सामरस्यं मानवहितायैव इति वेदव्याख्यातॄणां पुराणानामपि मनीषा इति विज्ञातम्भवति । तदेवोक्तम् ऋग्वेदे[11] - "पवस्व विश्वचर्षणेऽभि विश्वानि काव्या । सखा सखिभ्य ईड्यः" ॥ इतिवायोर्विश्वबन्धुत्वविषये । गीताचार्योऽपि पवित्रीकरणवस्तुषु आत्मानं श्रेष्ठं वायुं जानीहीति कथयामास[12] पार्थद्वारा समस्तप्रपञ्चाय ।

## जलमहिमा

आपः न केवलम् अस्माकं पिपासां परिहरति अपि तु अस्मन्मनः अपि पवित्रीकरोतीति कथयति वेदपुरुषः यथा - "हिरण्यवर्णाः शुचयः पावकाः यासुजातः कश्यपोयास्विन्द्रः ।
अग्निं या गर्भं दधिरे विरूपास्तान आपः शं स्योना भवन्तु ॥ इति ।
समस्तपापपरिहारकः सूर्य-इन्द्रादिदेवताजननस्थानं यः वडवाग्निमपि स्वोदरे धरति स उदकरूपी परमात्मा नः सुखं दुःखनाशञ्च करोति करोतु वा इति प्रार्थनाऽस्त्यत्र । जलरूपी देवः न केवलं शरीरमलनाशकः किन्तु मनसः दुःखनाशकः, आत्मनः पापनाशकः वर्तन् अतीन्द्रियशक्तिमावहन्

---

[6]अथर्ववेदसंहिता -१२ - १ - १२
[7]मत्स्यपुराणम्
[8]अथर्ववेदसंहिता - ४ - १३ - ३
[9]अथर्ववेदसंहिता - ४ - १३ - ५
[10]शान्तिपर्वणि-आपद्धर्मानुशासनपर्वणि-१५५ अध्याये ।
[11]नवममण्डले - सप्तमे अष्टके - ५४९ मन्त्रे ।
[12]पवनः पवतामस्मि ॥ - (भ.गी.अध्यायः-१०-श्लोकः-३१ )

Note- Printout of this paper can be accepted along with CERTIFICATE OF APPRECIATION only for official use.



मनुष्येभ्यः महदुपकारी इति श्रुतिसम्मतोऽर्थः । तदेवोक्तं स्मृतिकारैरपि - "वातातपैश्शुद्ध्यतीति शातातपोऽब्रवीत्" इति ।
स्वल्पसुखसंप्राप्तये जल-वायु-सस्यादीनां विनाशाद् न केवलं तन्नाशः विधीयतेऽस्माभिः किन्तु अस्मन्नाश एव तूर्णमाहूत भाव्य इति भणति अथर्ववेदः[13] -
"सं सं स्रवन्तु सिन्धवः सं वाताः सं पतत्रिणः ।
इमं यज्ञं प्रदिवो मे जुषतां संश्राव्येण हविषा जुहोमि ॥ इति ।
एवमेव सन्ध्याकाले सर्वैर्जाप्यः मार्जनजलाभिमन्त्रणमन्त्राश्च[14]"हे उदकाभिमानिदेवताः सुमङ्गळकराः च युष्मद्रसाः अस्मान् मातरः स्वशिशून् स्तन्यादिना इव परिरक्षन्तु, अस्मत्पापानि च विनाशयन्तु, अस्मभ्यं यूयं मयोभुवः छाः, अन्नाद्यभीष्टानि च प्रददतु" इतिउद्गिरन्ति ॥

## परिसरः सपर्याहः

बृहदारण्यकोपनिषच्च आरम्भे एव परिसरस्य आहोस्वित् ब्रह्माण्डस्य परिकल्पनां सुष्ठु अभिव्यनक्ति । यथा - "उषा वा अश्वस्य मेध्यस्य शिरः सूर्यः चक्षुर्वातः प्राणो व्यात्तमग्निर्वैश्वानरः संवत्सर आत्माऽश्वस्य मेध्यस्य द्यौः पृष्ठमन्तरिक्षमुदरं पृथिवी पाजस्यं दिशः पार्श्वे अवान्तर्दिशः पर्शव ऋतवोऽङ्गानि मासाश्चार्धमासाश्च पर्वाण्यहोरात्राणि.......तत्स्तनयति यन्मेहति तद्वर्षति वागेवास्य वाक्" इति । अत्र च भगवतः सृष्टिकर्तुः चतुर्मुखस्य स्वरूपवर्णनं मुख्यतः तथा ब्रह्माण्डस्य च परिकल्पनम् अश्वस्वरूपवर्णनद्वारा उपनिबध्नाति उपनिषत् । ब्रह्मणः अश्वरूपिणः कानि अङ्गानि सामग्रयो वा प्रपञ्चप्रपञ्चने इति वर्णनावसरोऽयम्मन्त्रः दरीदृश्यते ।
अश्वरूपिणः परमात्मनः ब्रह्माण्डस्य च अङ्गानि एतानि ज्ञातव्यानि -

| प्रातःकालः | सूर्यः | वातः | अग्निः | रात्रिन्दिवः | गर्जनम् | मासाः | वर्षः | सस्यानि |
|---|---|---|---|---|---|---|---|---|
| शरीरम् | **नेत्रम्** | **आत्मा** | **आस्यम्** | **पादाः** | **रोदनम्** | **स्नायवः** | **योनिः** | **केशाः** |

इत्यादि ।

मानवान् परितः कानि च वस्तूनि वर्तन्ते इत्येतत् च अनेन मन्त्रेण अवगन्तुं शक्नुमः येन तानि सर्वाणि भगवतोऽङ्गानि इति सम्यग्विज्ञाय एतानि भक्त्या पूजयेम परिरक्षेम च इत्युपनिषद्धार्दम् ।

एवञ्च "मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः"[15]इत्युक्तदिशा शिल्पकलादिशास्त्रपरिज्ञानमेव विशिष्ठज्ञानत्वात् विज्ञानपदवाच्यतया तज्ज्ञानं प्रसिद्धम् । साक्षात्भगवत्ज्ञानादायकाः वाचः अस्मन्मोक्षोपदेशकत्वात् ज्ञानपदवाच्यतामर्हन्ति इति ज्ञेय्यम् ।

पूर्वोक्तदिशा श्रुतीनां अर्थत्रयवाचकत्वात् उपर्युक्ताः सर्वेऽर्थाः तत्र प्रतिपादिताः इत्यहो वेदानां सार्वकालिकी सार्वदैशिकी सार्वभौमता । तद्द्रष्टारश्च प्राचीनाः अस्मदृषयः विज्ञानपथे

---

[13]अध्यायः १-१५ -१
[14]'आपो हि ष्ठाः मयोभुवः । ता न ऊर्जे दधातन । महेरणाय चक्षसे' ॥ इत्यादि (ऋग्वेदे-१०-२-१,२,३)
'
[15]अमरसिंहकृतेअमरकोषे धीवर्गे ।

Note- Printout of this paper can be accepted along with CERTIFICATE OF APPRECIATION only for official use.

कियत्प्रकाण्डपाण्डित्यं प्रपेदिरे इति तु वाचामगोचर एव । एतादृशश्च विचाराः वेदेषु सर्वत्र दरीदृश्यन्ते यस्याध्ययनात् वयं **'मनु अवबोधने'** इति धातोरुत्पन्नेन मानवशब्देन आख्यानयोग्याः भूयाम इत्यलं प्रस्तुतकाले वेदाध्ययनविषये नूतनदिङ्मात्रप्रदर्शनेन ।

Key-words

**द्रुमः, वायुमालिन्यविषये, भूमिः, वेदाः, श्रुतयः, पवनः, धेनवः, संरक्षणम्, जगत्क्षेमाय, उदकाभिमानिदेवताः, मातरः, पावकाः, ऋग्वेदे, महाभारते, जलमहिमा, वायुमहिमा, भूमहिमा, पञ्चभूतानां, भीमः, परिसरः ॥**

Bibliography

Rigveda Mantra Samhita - Edited by R.L.Kashyap ,SAKSHI, 2003

उपनिषत्प्रस्थानग्रन्थाः -(सं) व्यासनकेरे प्रभञ्जनाचार्याः, श्रीव्यासमध्वसेवा प्रतिष्ठानम्, १९९९

अथर्ववेदसंहिता - चौखम्बा Publications, Varanasi

मत्स्यपुराणम् - Central Publications, NewDelhi

महाभारतम् - Central Publications, NewDelhi

सुमध्वविजयः - नारायणपण्डिताचार्यः, (सं) व्यासनकेरे प्रभञ्जनाचार्यः, svmsp,Bangalore

XXXXXXXXXXXXXXXXXXXXX





# प्रमाणस्वरूपजिज्ञासा

**डा. सुनीलः.के.एस.**[16]

**प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम् ।**
**आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मता ॥**

इत्येवमादि न्यायशास्त्रस्याद्भुतत्वम् वैलक्षण्यमुपादेयत्वञ्च वीक्ष्यैकस्वरेण,विपश्चिताम् जगतीदमेवमभिनन्दति । विभिन्नप्रमाणानां साहाय्येन वस्तुतत्वस्य परीक्षणम् न्यायशब्दस्यार्थः[17]।"या विद्या अन्वीक्षया प्रवर्तते सान्वीक्षिकीति कथ्यते" अर्थात् प्रत्यक्षागमाश्रितमनुमानमाहोस्वित् प्रत्यक्षस्य सहायतयावगतीभूतस्य विषयस्य पर्यालोचना । न्यायभाष्येप्येवमुक्तमस्ति –
*"प्रत्यक्षागमाश्रितान् अनुमानं सा अन्वीक्षा अथवा प्रत्यक्षागमाभ्यामीक्षितस्य अन्वीक्षणम्"* इति । न्यायदर्शनस्य परमं ध्येयं उद्देश्यञ्च प्रमाणान्याश्रित्य प्रमेयाणां विचारणं प्रमाणानाञ्च सविस्तरमुपपादनं । तर्कमवलम्ब्य सत्यस्यान्वेषणं प्राचीनतमेपि काले दृष्टं जायते । उपनिषत्साहित्यानुशीलनेनापि ज्ञायते यदुपनिषदां युगे एव वादस्य साफल्याय तर्कप्रधानाः प्रचुरा नियमाः सुधीभिः साधु स्वज्ञानपथमानीताः ।
"सुखमेव मे स्यात् दुःखं मनागपि माभूत्" इति निखिलापेक्षितस्य मोक्षस्य साधनाय भगवत्प्रसादः अत्यन्तं आवश्यकः । भगवत्प्रसादश्च तत्तन्माहात्म्यज्ञानेनैव भवति । माहात्म्यज्ञानं प्रमाणादिज्ञानाधीनम् । अतः मोक्षेच्छुभिः प्रमाणादिज्ञानं अवश्यं संपादनीयम् । न्यायस्य तत्वविचारो हि प्रमाणविचारमधितिष्टति । येषां साहाय्येन यथार्थज्ञानं लब्धं भवति ते सन्त्युपायाश्चत्वारः । न्यायदर्शनं तान्युपायान् "प्रमाणानि" इति कथ्यते । प्रमाणानि सन्तीमानि चत्वारि – प्रत्यक्षम्,अनुमानम्,उपमानम्,शब्दः । यज्ज्ञानं लभ्यते एतानि प्रमाणान्यवलम्ब्य तज्ज्ञानं प्रथमं ज्ञेयं वर्तते किञ्च तदीया भेदाश्च ज्ञातव्याः सन्ति, यथार्थज्ञानं किं किञ्च अयतार्थ ज्ञानमित्येतदपि वेदितव्यं विद्यते ।
प्रमाणानां विषये बह्व्यः विप्रतिपत्तयः वर्तन्ते । तेषां स्वरूपविषये, तथा लक्षणविषये, एवं सङ्ख्या विषये च बहु विप्रतिपद्यन्ते । श्रीमदानन्दतीर्थभगवत्पादाचार्यैः स्वकीयैः प्रमाणलक्षणग्रन्थे विविधमताचार्यैः उक्तप्रमाणानां स्वरूपचिन्तनमत्र संक्षिप्ततयानूद्य अन्ते प्रमाणविषये श्रीमन्मध्वाचार्यः किमभिप्रैतीति विव्रियते ।
अनुभूतिः प्रमाणमिति मीमांसकानां अभिप्रायः । ज्ञातता प्राकट्यापरपर्याय वाच्यस्य प्रमेयाश्रितस्य प्रकाशविशेषस्य साधनम् क्रियाज्ञानं प्रमाणं इति भाट्टानां लक्षणम् । अनधिगत तथाभूतार्थज्ञानं प्रमाणं इति तेषां एव लक्षणान्तरम् ।

---

[16] संस्कृत उपन्यासकः, बेङ्गळूरु

[17] उक्तञ्च वात्स्यायनेन "प्रमाणैरर्थपरीक्षणम् न्यायः" ॥ इति ।

सम्यगनुभवसाधनं प्रमाणमिति नैय्यायिकादयः । प्रमाव्याप्तं प्रमाणं इति उदयनाचार्यस्य अभिप्रायः । प्रत्यक्षमेकमेव प्रमाणं इति चार्वाकः । प्रत्यक्षानुमने द्वे एव प्रमाणे इति कणादः सौगताश्च । अर्थापत्ति-उपमानयोरपि पृथक् प्रमाणं इति केचन वदन्ति । सम्भवपरिशेषौ पृथक् प्रमाणे विद्येते इति केषाञ्चित् अभिप्रायः । समाख्यादीनि प्रत्येकं प्रमाणानि इति अन्येषां मतम् ।
यथार्थज्ञानप्राप्तेर्यानि साधनानि सन्ति चत्वारि प्रत्यक्षानुमानोपमानशब्दसंज्ञकानि तेषु प्रत्यक्षं साधनं (प्रमाणम्) इन्द्रिय-सन्निकर्षेण वस्त्वभिव्यनक्ति । एतल्लक्षणमधिकृत्य तर्कभाषा प्राह – “साक्षात्कारिप्रमाकरणं प्रत्यक्षम्” अन्यत्र क्वापि “इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्” इत्युक्तम् । केषाञ्चन विदुषां कथनमिदम् – “इन्द्रिय-साहाय्यमन्तरेणापि प्रत्यक्षं भवितुं शक्नोति । ईश्वर इन्द्रियरहितोऽपि सर्वेषां विषयाणां ज्ञानं प्रत्यक्षतया करोति । सुखदुःखादिभावानां प्रत्यक्षमिन्द्रिय-स्पर्शं विनैव सम्भवति तस्मात् प्रत्यक्षज्ञानार्थं सर्वत्रेन्द्रियस्पर्शो न भवत्यपेक्षितः । तेन “साक्षात्प्रतीतिः” इत्येतदेव प्रत्यक्षस्य सामान्यं लक्षणं वक्तुं शक्यम् । कस्यापि वस्तुनः प्रत्यक्षं ज्ञानं तदा सम्भवति यदा तस्य साक्षात्कारो भवति । अतः इदमपि कथयितुं शक्यं , यद् ,यदा , तद् वस्तुनो ज्ञानं पुरातनानुभवमनुमानं वा विना भवति तदा प्रत्यक्षं ज्ञानं भवति ।
प्रत्यक्षं साधारण्येन द्विविधं निर्विकल्पकं सविकल्पकञ्च । येन कस्यापि वस्तुनो ज्ञानमात्रं जायते न च तन्नम जात्यादे र्ज्ञानं भवति तदस्ति निर्विकल्पकं ज्ञानम् । येन च वस्तुनो नाम जात्यादेरपि ज्ञानं भवति तदस्ति सविकल्पकं ज्ञानम् । विशेषणविशेष्यभावरहितज्ञानस्यास्वीकरणीयत्वाद् वैयाकरणा निर्विकल्पकं ज्ञानं न स्वीकुर्वन्ति । जातेरस्वीकणीयत्वाद् वैयाकरणा निर्विकल्पकं ज्ञानं न स्वीकुर्वन्ति । प्रत्यक्षविषये तार्किकै: तथा सौगतैः निर्विकल्पकप्रत्यक्षं अङ्गीकृतम् । संयोग,समवायादिसन्निकर्ष षट् प्रकारकत्वं तार्किकैः उररीकृतम् । स्मृतिः अप्रमाणं इति तार्किकाणां तथा प्राभाकराणां अभिप्रायः । न्यायदर्शने प्रत्यक्षं बहुधा विचारितम् । तत्रेदमप्युक्तम् – प्रत्यक्षं लौकिकालौकिकभेदेन द्विविधम् । लौकिकञ्च बाह्यमानसभेदेन द्विविधम् । बाह्यं पञ्चज्ञानेन्द्रियैः किञ्च मानसं मनसा जायते अतः लौकिकं षड्विधं भवति । अलौकिकञ्च त्रिविधम् – सामान्यलक्षणम्,ज्ञानलक्षणम्,योगजम् इति । वेदान्तिनो विद्वांसः सामान्यलक्षणं ज्ञानलक्षणञ्च निराकुर्वन्तो योगजमेव मण्डयन्ति ।
**<u>अनुमानम्</u>** – प्रत्यक्षप्रमाणेन ज्ञातीकृतेन केनचन लिङ्गेन अर्थस्यावगमनानन्तरं बोद्धा यद् ज्ञानमश्नुते तदेव “अनुमानमिति” कथ्यते । वात्स्यायनोपि “लिङ्गेन मितेन अर्थस्य अनु पश्चान्मानमनुमानम्” इति अनुमानप्रमाणस्य लक्षणमेतत्- “लिङ्गपरामर्शोऽनुमानम्” इति । लिङ्गं तद् भवति यद् व्याप्तिबलेनार्थं गमयति । अनुमानं हेतुभूमिकं भवति । यदि हेतुः शुद्धो भवति तदानुमानमपि भवति शुद्धम् । अहुद्धो हेतुर्हेत्वाभास इत्युच्यते । अनुमानविभागे तथा विरोधादीनां विषये बह्व्यः विप्रतिपत्तयः वर्तन्ते । तार्किकैः अनुगतजातिः अङ्गीक्रियते । आगमविषयेपि विरुद्धप्रतिपत्तयः दृश्यन्ते ।

**<u>उपमानम्</u>** – उपमानं तु स्वतन्त्रप्रमाणम् । प्रसिद्धवस्तुसाधर्म्यादप्रसिद्धस्य साधनं यत्र भवति तत् उपमानम् । उपमानस्य महत्वमुपपादयन् वात्स्यायनः –यथा मुद्गस्तथा मुद्गपर्णी इत्युपमाने प्रयुक्त उपमानात् संज्ञासंज्ञिसंबन्धं प्रतिपाद्यमानस्तामौषधीं भैषज्याय हरति ।





**<u>शब्दः</u>** –“आप्तोपदेशः शब्दः” इत्यभिहितम् न्यायसूत्रे । वस्तुनो यथार्थरूपवेत्ता 'आप्त' इति कथ्यते ।

तत्वबुभुत्सूनां एवंरीत्या विरुद्धदार्शनिकोक्त प्रक्रिया दर्शनेन क्वचित् संशयो जायते क्वचित् विपरीतज्ञानमपि सम्भवति । अत एव परमकारुणिकाः वायोः तृतीयावतारभूताः , सर्वज्ञाचार्याः भगवतः आदेशेन भुवि अवतीर्य श्रीमदानन्दतीर्थाः इति नाम्ना तुरीयाश्रमं प्राप्य सज्जनोद्दारोद्देशेन भगवतः वेदव्यासस्य सम्मतान् सर्वमूलग्रन्थान् व्यरचयत् । तेषां मध्ये प्रमाणलक्षण ग्रन्थोऽपि दशप्रकरणान्तर्गतं एकं प्रकरणम् ।

श्रीमदानन्दतीर्थभगवत्पादैः अस्मिन् प्रमाणलक्षणाख्यग्रन्थे सकलवादिभिः उक्त प्रमाणलक्षणानि निरस्य **“यथार्थं प्रमाणं”** इति प्रमाणस्वरूपं सयुक्तिकं प्रतिपादितम् ।
आदौ लक्षणस्य लक्षणं, तथा उद्देशपरीक्षादीनां लक्षणं उक्त्वा लक्षणविभागः कृतः । प्रत्यक्षं,अनुमानं,आगमः इतित् त्रीन्परिच्छेदान् कृत्वा ह्यक्षादित्रितयं प्रमाणं इति यद्व्यासराजश्रीपादैः उक्तं, तथा प्रमाणानां विभागः कृतः । प्रत्यक्षं अनुमानं आगमः इति त्रीण्येव प्रमाणानि इति सयुक्तिकं प्रतिपादितम् । एतेन परकीयोक्तप्रमाणस्वरूपलक्षणसङ्ख्यादीनां निरासः कृतः ।

अर्थापत्ति उपनामयोः अनुमाने एव अन्तर्भावप्रकारं प्रदर्श्य, तयोः पृथक् प्रामाण्यं निराकृतम् । एवं उपक्रमादीनां समाख्यादीनामपि पृथक् प्रामाण्यं निराकृत्य अनुमानान्तर्भावप्रकाशश्च उपवर्णितः ।
अनुपलब्धेः प्रत्यक्षाद्यन्तर्भावः, तथा सम्भवपरिशेषयोः अनुमानान्तर्भावः प्रदर्शितः । सर्वज्ञानानां सविकल्पकत्वं उद्घोष्य, निर्विकल्पकप्रत्यक्षवादिनां मतं निराकृतम् । अंयोगः एक एव सन्निकर्षः इत्युक्त्वा षट्विध सन्निकर्षाणां मतं अपहसितम् । समवायस्तु अप्रामाणिक एव । धर्मिकल्पनातो वरं धर्मकल्पनं इति न्यायानुरोधेन स्वरूपसम्बन्धस्यैव सम्बन्धत्वं उक्त्वा समवायरूप सम्बन्धस्य खण्डनं कृतम् ।
साक्षिणः प्रामाण्यं समर्थितं श्रीमदानन्दतीर्थभगवत्पादैः विशेषरूपेण । तथा स्मृतेरपि प्रामाण्यं व्यवस्थापितम् । अनुमानपरिचेदे पञ्चावयव नियमः खण्डितः । तार्किकोक्तपञ्चहेत्वाभासानां मध्ये केचित् हेतुदोषाः एव न इति प्रदर्श्य पञ्चत्वसङ्ख्या खण्डिता । उपाधेः दूषकताबीजं च उपपादितम् । भिन्नश्च भिन्नधर्माश्च पदार्था निखिला अपि इत्यादिना अनुगतजातिमतं निराकृतम् । जगतः मित्थ्यात्वसाधनाय मायावादिभिः उक्तानुमानस्य खण्डनं विस्तरेण कृतम् । प्रत्यक्षस्य वर्तमानमात्रग्राहित्वशङ्कां परिहृत्य त्रिकालबाध्यत्व ग्रहणसामर्थ्यं स्पष्टीकृतम् ।
आश्रयासिद्धि,व्यधिकरणासिद्धि,साध्याप्रसिद्ध्यादीनां अनुमानदोषत्वभङ्गः सयुक्तिकं प्रतिपादितः । असतोपि साधकत्वं च समर्थितम् । विपर्ययं अनङ्गीकुर्वतां मीमांसकादीनां मतं निराकृतम् । अन्ते प्रमाणादिनिरूपणस्य प्रयोजनादिकं च प्रदर्शितम् ।
**<u>उपसंहारः --</u>**

न्यायदर्शनस्य बहुवादितत्ववादित्वात् विद्वांसस्तदीयं तत्वज्ञानं नाधिकं सन्तोषजनकं मन्यन्ते । त इदमपि वदन्ति यन्न्यायदर्शनमीश्वरं जगतो निमित्तकारणं स्वीकृत्य वस्तुतस्तस्मिन् मानवीयभावगतदौर्बल्यानि सन्निवेशयतीति । प्रमाणविषयिणीं व्याख्यां मीमांसाञ्च विधाय तद्यानि तत्वानि उद्भावयामास तेषां प्रयोगं तु दर्शनान्तराण्यपि कुर्वाणानि लक्ष्यन्ते ।

**परिशीलितग्रन्थानां नामानि**

- ✓ ***श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचित प्रमाणलक्षणम् – व्यासमध्वसंशोधनद्वाराप्रकटितम्***
- ✓ ***सर्वदर्शनसङ्ग्रहः – भण्डार्कर् ओरियण्टल् रीसर्च इन्स्टिट्यूट्, पुणे***
- ✓ ***श्रीविजयीन्द्रतीर्थश्रीचरणैः विरचित-सर्वसिद्धान्तसारासारसङ्ग्रहः – मन्त्रालयप्रकटनम् ।***
- ✓ ***श्रीविजयीन्द्रतीर्थश्रीपादैः विरचित प्रमाणलक्षणभाववर्णनटीका – अप्रकटितमातृका-व्याससमध्वसंशोधसंस्थायामुपलभ्यते ॥***

XXXXXXXXXXXXXXXXXXXXX

# श्रीमद्भागवतीयशिक्षातत्वविमर्शः

**डा. मखलेशकुमारः** [18]

भगवान् नारायणःस्वयमेव श्रीमद्भागवतमहापुराणस्य आदिवक्ता अस्ति।सर्वप्रथमं भगवान्नारायणः एव पुराणमिदं भवभीताय ब्रह्मणे अददात्। पुराणमेतद् ब्रह्मातः देवर्षिनारदः, ततः व्यासदेवः, व्यासदेवात् शुकदेवः प्राप्तवान् । सः शुकदेवः परीक्षिते उपदिदेश ।

कस्मै येन विभासितोऽयमतुलो ज्ञानप्रदीपः पुरा
तद्रूपेण च नारदाय मुनये कृष्णाय तद्रूपिणा ।
योगिन्द्राय तदात्मनाथभगवद्राताय कारुण्यतः
तच्छुध्दं विमलं विशोकममृतं सत्यं परं धीमहि।।श्रीमद्भागवते.१२–१३–१९

[18] सह-आचार्यः, पुराणेतिहासविभागः, श्रीसदाशिवपरिसरः, पुरी, ओडिशा





श्रीमद्भागवते प्रकाशितेन अनेन ज्ञानेन परीक्षित् "अहं ब्रह्माऽस्मि" इति उद्घोषितवान् । "**मर्त्यावतारस्तु मर्त्यशिक्षणं**"इति भागवतोक्तहनुमत्वचनानुसारं ज्ञायते यत् भगवान् अज्ञाने निमग्नानां मर्त्यानां शिक्षणार्थमेव अवतरति। भगवदवतारस्य अन्यानि अपि कारणानि भवन्ति, परन्तु शिक्षणमिति सर्वेषु कारणेषु प्रामुख्यं भजते। यतो हि कर्तुमकर्तुमन्यथाकर्तुं सर्वसमर्थस्य भगवतः अवतारेण बिनाऽपि तस्य संकल्पमात्रेण सर्वाणि कार्याणि सिध्द्यन्ति। प्रतीयमानप्रपञ्चोऽपि "एकोऽहं बहुस्याम्"इति भगवतकृतसंकल्पस्य परिणामः वर्तते। उपर्युक्तवचनेन स्पष्टं यत् संकल्पमात्रेण असंख्यानां ब्रह्माण्डानां कर्ता भगवान् भुवि अवतीर्य स्वाचरणेन, कर्मणा, सदुपदेशेन च मर्त्यान् शिक्षयति। "महाजनो येन गतः सपन्थाः" इत्यनुसारं वयं मनुष्याः भगवच्चरितमाधारिकृत्यैव स्वजीवनं धन्यं कुर्मः।
वेदविभाजनपूर्वकं सप्तदशपुराणानि ब्रह्मसूत्रादीन् महाभारतञ्च रचयित्वा अपि आत्मानं खिलं मन्यमानस्य व्यासस्य खिद्यतः तस्य आश्रमे नारदःअभ्यगाद् , व्यासशोकस्य कारणं ज्ञात्वा देवर्षिनारदःतं भगवतोऽमलं यशः वर्णयितुमादिदेश ,तदा व्यासः भागवतीं संहितां कृत्वा निवृत्तनिरतं स्वपुत्रं शुकमध्यापयामास–

सं संहितां भागवतीं कृत्वानुक्रम्य चात्मजम् ।
शुकमध्यापयामास निवृत्तनिरतं मुनिम्।। श्रीमद्भागवते १–७–८

विद्या भागवतावधिः, विद्यावतां भागवते परीक्षा ,निगमकल्पतरोर्गलितं फलमित्याद्यैः वचनैः एतस्य पुराणस्य महत्वं बहु जायते । प्रायः सर्वाणि शास्त्राणि अस्मिन् पुराणे चर्चितानि सन्ति । विद्वान्सः भागवतपदस्य व्युत्पत्तिं कुर्वन् कथयन्ति यत् भासते प्रकाशते ब्रह्म इति भ, गीयते नारदादिभिः इति ग,वर्तन्ते सर्वशास्त्राणि इति व, तरन्ति इतरे जनाः इति त , अर्थात् पुराणस्यास्य अनुसन्धानेन परावरे ब्रह्मणि निष्णाताः सर्वे मनुष्याः संसारसागरमनायासेन तरन्ति । पुराणमेतद् भगवतः शब्दमयीमूर्तिः। यतो हि स्वधामोपगमकाले उध्दवेन प्रार्थितः भगवान् स्वकीयं प्रभापुञ्जं तेज पुराणेऽस्मिन् निधाय अगच्छत्।अत एव भगवति स्वधामोपगते सति कलियुगे अज्ञानावृतचक्षुषां कृते एषः पुराणार्कः उदितः–

कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सह।
कलौ नष्टदृशामेष पुराणार्कोऽधुनोदितः।। श्रीमद्भागवते. १–३–४३,४४

अष्टादशसहस्रश्लोकात्मके पुराणेऽस्मिन् प्रायः सर्वत्र शिक्षातत्त्वं परिलक्ष्यते,तथापि तावत् शिक्षा पदस्य कः अर्थः?का च परिभाषा, लक्षणं किम् इति विचार्यमाणे सति ज्ञायते यत् शिक्ष विद्योपादाने इति धातोःअप्रत्ययपूर्वकं टाप् कृते सति शिक्षा शब्दः निष्पद्यते , यस्यार्थः भवति अध्यनमध्यापनञ्च । शिक्षते, विद्योपादीयते अनया इति शिक्षा अर्थात प्राणी यया साधनप्रणाल्या ज्ञानमुपार्जयति सा शिक्षा इति अभिधीयते। अनया शिक्षया शिष्यगुर्वोर्मध्ये ज्ञानस्य आदानं प्रदानं च भवति । गुरुरध्यापयति शिष्यः अध्ययनं करोति । शिक्षां विना आदर्शचरित्रस्य च स्थापना न स्यादिति । शिक्षाविदः शिक्षायाः परिभाषां स्वस्वमतानुसारं प्रदत्तवन्तः। पाश्चात्याः शिक्षाशब्दस्य

पर्यायः एजुकेशनमिति स्वीकुर्वन्ति । एजुकेशन इति शब्दः लैटिनभाषायां एडुकेयार इति। तत्र शब्दस्यास्य अर्थः भवति– बहिरागमनम् अर्थात् मनुष्यमात्रे अन्तर्निहितशक्तीनां परिस्फुटनमिति । भगवान् स्वराटिति पदेन अभिधीयते इत्यर्थः स्वयंसिध्दं ज्ञानमिति । जीवः भगवतः अंशः। भगवदंशे जीवेऽपि ज्ञानं विद्यते एव इति निश्चयप्रचम्। अनया शिक्षया तद् ज्ञानं बोध्यते इति ।

वेदाङ्गरूपेणापि शिक्षा प्रसिध्दा । शिक्ष्यन्ते, वेदानामुपदिश्यन्ते स्वरवर्णादयः यन्नासौ शिक्षा इति सायणाचार्येण शिक्षाशब्दं परिभाषितम् अर्थात् वेदमन्त्राणां शाखानुसारं शुध्दोच्चारणनियमाः शिक्षा इति । वेदेषु उदात्तानुदात्तस्वरितश्चेति त्रिविधाः स्वराः प्रसिध्दाः। स्वरहीनः मन्त्रः मिथ्यार्थमेव व्यनक्ति, तेन यजमानस्येव हानिः भवति यथा इन्द्रशत्रुः वृत्रासुरः स्वरस्य अपराधात् मृतः। इन्द्रशत्रो इत्यत्र तत्पुरुषस्याभिप्रेतत्वेऽपि इन्द्रः शत्रुः यस्येति बहुब्रीह्यर्थं एव स्वरव्यतिक्रमादापातितः। उक्तञ्च शिक्षायाम्–

**मन्त्रो हीन स्वरतो वर्णतो वा**
**मिथ्याप्रयुक्तो न तमर्थमाह ।**
**स वाग्वज्रो यजमानं हिनस्ति**
**यथेन्द्रशत्रुः स्वरतोऽपराधात् ।।**

भागवतेऽपि – **हतपुत्रस्ततस्त्वष्टा जुहावेन्द्राय शत्रवे ।**
**इन्द्रशत्रो विवर्धस्व माचिरं जहि विद्विषम् ।।**
**अथान्वाहार्यपचनादुत्थितो घोरदर्शनः।**
**कृतान्त इव लोकानां युगान्तसमये यथा ।।**

श्रीमद्भागवते. ६।९।११,१२

अतएव शुध्दोच्चारणमत्यावश्यकम् । तेन विना महती हानिः भवति । पाणिनीयानारदीय–याज्ञवल्क्य–माण्डूकीयशिक्षेत्यादिरूपेण शिक्षाग्रन्थाः, प्रतिवेदं प्रातिशाख्य ग्रन्थाश्च बहुप्रचलिताःइति । शिक्षया केवलं व्यक्तित्वविकासः न अपितु सुशिक्षितेन मनुष्येन समाजस्यापि महान् उपकारः जायते । यतो हि मानवस्तु सामाजिकः प्राणी भवति। अतः तस्य सच्चरित्रता सुयोग्यं समाज जनयति,सुयोग्येन समाजेन राष्ट्रस्यापि कल्याणं जायते। शिक्षाविशेषज्ञाः बहुशः विचार्य निर्धारितवन्तः यत् यया चराचरस्यास्य जगतः सर्वविधं कल्याणमेव स्यात्, सा शिक्षा इति ।

एषा शिक्षा श्रीमद्भागवते द्विविधा प्रतिपादिता लौकिकी,पारमार्थिकी च। लोके कथं वर्तितव्यम्?व्यवहारः कथं स्यात्? प्राणीमात्रं प्रति किं कर्तव्यम्? वर्णाश्रमव्यवस्था पालनेन किं जायते? जीविकानिर्वाहं कथं करणीयम्। आपध्दर्मे कथं भवितव्यम् । एतेषु विषयेषु पारङ्गता यया





स्यात् सा लौकिकी शिक्षा इति। स्थूलं जगत् विहाय सूक्ष्मे परमात्मनि तदाकारता एव पुरुषार्थमिति पारमार्थिकी शिक्षा। उत वा परमात्मनः प्राप्तिः यया स्यात् सा पारमार्थिकी शिक्षा इति। लौकिकशिक्षया एव मनुष्यः पारमार्थिकीशिक्षायामग्रेसरति । यतो हि पारमार्थिकी शिक्षा लक्ष्यं भवति । लोके वेदविहितकर्मणः परिपालनेन मर्यादारक्षणेन मनुष्यः परमात्मानं प्राप्तुं शक्नुयात् । प्रत्येकेऽस्मिन् जीवे बीजरूपेण परब्रह्म विद्यते। जीवभावस्य अपनोदनपुरस्सरं ब्रह्मभावस्थितिप्रापणं मानवशिक्षायाः मूलमुद्देश्यम्। सृष्टिकर्त्ता ब्रह्मा मायया विवधानि शरीराणि सृष्ट्वा तैःसर्वैरतुष्टहृदयः सन् सर्वस्यान्ते ब्रह्मावलोकयोग्यता सम्पन्नं पुरुषं विधाय प्रसन्नतां प्राप। यथा–

**सृष्ट्वा पुराणि विविधान्यजयाऽऽत्मशक्त्या**
**वृक्षान् सरीसृपपशून् खगदंशमत्स्यान्।**
**तैस्तैरतुष्टहृदयःपुरुषं विधाय**
**ब्रह्मावलोकधिषणं मुदमाप देवः।।** श्रीमद्भागवते. ११–९–२८

बहु सम्भवान्ते सुदुर्लभं मानुष्यमिदं लब्ध्वा यः मृत्युं यावद् निःश्रेयसाय न यतेत् सः पतेदिति। येषु मनुष्येषु पूर्णरूपेण अध्यात्मतत्त्वविषयकं पर्यालोचनं न भवति ते मानवाः केवलमेव पञ्चभौतिकस्थूलशरीररूपेण प्रकाशन्ते। तेषां पक्षे पुरुषार्थं केवलं भौतिकजगतःउन्नतिसाधनमिति। अतःतादृशाः ते सांसारिकसुखादिसाधनानामुन्नयनमेव शिक्षायाः उद्देश्यमिति स्वीकुर्वन्ति। भागवते तु स्थूल–सूक्ष्म–कारणेति शरीरत्रयोपाधिसम्वलितजीवःएव मानवःइति स्वीकृतम्। स्थूलसूक्ष्मकारणशरीरत्रयस्य क्रमशःपरिशोधनादिकं कृत्वा मनुष्यःस्वकीयमूलस्वरूपे ब्रह्मणि यदावस्थानं करोति तदैव परिपूर्णतां प्राप्नोति। अत एव अस्याःब्रह्मविद्यायाःसाधनप्रणाली एव आदर्शशिक्षा भवितुमर्हति। भौतिकोन्नतिरपि न त्याज्या अपितु साधनरूपेण ग्राह्या। पुंसःअधोक्षजे भगवति यतःभक्तिः जायते सः धर्मः। भागवते धर्मादर्थश्च कामश्चेत्यादिमतं निराकृतम्। मोक्षः एव अपवर्गः। मोक्षप्रयोजनकस्य धर्मस्य फलत्वाय अर्थः नोपकल्पते। धर्म एव एकान्तं नियतं फलं यस्य तस्य अर्थस्य कामो लाभाय न हि स्मृतः। कामस्य तु इन्द्रियप्रीतिः फलं न भवति। यावता जीवेत तावान् एव कामस्य लाभःअर्थात जीवनपर्याप्तः एव कामः सेव्य इति।जीवस्य पुण्यकर्मभिःजायमानप्रसिद्धः स्वर्गादिः प्रयोजनं न अपितु तत्त्वजिज्ञासा एव परमं लक्ष्यम्।ज्ञानिनः स्वमतानुसारं तच्च तत्त्वं नानाविधं प्रतिपादयन्ति अतः भागवते परमार्थतत्त्वं निरुपितम्।यच्च औपनिषदैःब्रह्मेति,हैरण्यगर्भैः परमात्मेति, सात्त्वतैः भगवानिति कथ्यते। एतदेव अद्वयं द्वैतरहितं ज्ञानं तत्त्वविदः परमं तत्त्वमिति वदन्ति।यथा–

**धर्मः स्वनुष्ठितः पुंसां विष्वक्सेन कथासु यः।**
**नोत्पादयेद्यदि रतिं श्रम एव हि केवलम्।।**
**धर्मस्य ह्यापवर्ग्यस्य नार्थोऽर्थायोपकल्पते।**
**नार्थस्य धर्मैकान्तस्य कामो लाभाय हि स्मृतः।।**

कामस्य नेन्द्रियप्रीतिर्लाभो जीवेत यावता।
जीवस्य तत्त्वजिज्ञासा नार्थो यश्चेह कर्मभिः।।
वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम्।
ब्रह्मेति परमात्मेति भगवानिति शब्द्यते।। श्रीमद्भागवते.१–२–८तः११

जीवनस्य कृते अतिप्रयासस्यावश्कता नास्ति। यावत् जठरं भ्रियेत देहिनां तावदेव स्वत्वं भवति। अतः जीवनं तु अनायासेनापि भवितुं शक्यते इति कटाक्षपूर्णदृष्ट्या शिक्षितं मुनिना शुकदेवेन–

सत्यां क्षितौ किं कशिपोः प्रयासै–
बाँहौ स्वसिद्धे ह्युपबर्हणैः किम्।
सत्यञ्जलौ किं पुरुधान्नपात्र्या
दिग्वल्कलादौ सति किं दुकूलैः।।
चीराणि किं पथि न सन्ति दिशन्ति भिक्षां
नैवाङ्घ्रिपाः परभृतः सरितोऽप्यशुष्यन्।
रुद्धा गुहाः किमजितोऽवति नोपसन्नान्
कस्मात् भजन्ति कवयो धनदुर्मदान्धान्।। श्रीमद्भागवते. २–२–४,५

उक्तञ्च मुण्डकोपनिषदि यत् **द्वे विद्ये वेदितव्ये परा अपरा च**।तत्र वेदादयःअपरा विद्या।यया अक्षरमधिगम्यते, सा परा विद्या इति। अस्योपनिषद्वाक्यस्य भावार्थः श्रीमद्भागवते प्रियव्रत–ध्रुव–प्रह्लादादिचरितेषु सन्दर्शितम्।शिक्षायाःप्रारम्भस्तु भौतिकोन्नतिं संलक्ष्य प्रवर्तते परन्तु शिक्षायाःपूर्णपर्यवसानमध्यात्मज्ञानलाभेनैव भवति । भवता किमधीतम्? इति पित्रा पृष्टः भक्तप्रवरः प्रह्लादःकथयति, यःमनुष्यः विष्णोःश्रवणं कीर्तनं स्मरणं पादसेवनम् अर्चनं वन्दनं दास्यं सख्यम् आत्मनिवेदनमिति नवलक्षणां भक्तिं करोति तेनोत्तममधीतमिति मन्ये।यथा–

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्।।
इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा।
क्रियते भगवत्यद्धा तन्मन्येऽधीतमुत्तमम्।। श्रीमद्भागवते.७–५–२३,२४

तपसा त्यागेन च शिक्षणं सुकरमिति कारणात् विद्यार्थिजीवनं तपोपयमिति भारतीयसंस्कृतौ स्वीकृतम्। महाभारते विद्यार्थिनः जीवनमित्थं निर्दिष्टम्–

सुखार्थिनः कुतो विद्या नास्ति विद्यार्थिनः सुखम्।
सुखार्थी वा त्यजेद्विद्यां विद्यार्थी वा त्यजेत्सुखम्।। म.भा.उद्योगपर्वणि.३–६

भागवतकाले शिष्याः गुरुकुलाश्रमं प्रति गत्वा तत्राचार्येण सह सरलजीवनयापनपूर्वकं ज्ञानार्जनं कुर्वन्ति स्म।सप्तमेकादशस्कन्धयोर्मध्ये गुरुकुले पालनीयं ब्रह्मचर्याश्रममधिकृत्य





नारदकृष्णयोःमुखेन सुन्दरं वर्णनं कृतम्। शिष्यः गुरुकुलाश्रमे प्रविश्य ब्रह्मचर्यं प्रतिगृह्णाति स्म।ब्रह्मणि चरतीति ब्रह्मचारी इत्यनुसारं सः गुरुकुले इन्द्रियसंयमनपूर्वकं सर्वदेवमयेनाचार्येण विद्यार्जनं करोति स्म। प्राचीनकाले आचार्याः अपि ब्रह्मचर्यपरायणाः तपोमयाः आदर्शभूताःभवन्ति स्म। यः शास्त्रर्थान् अवचिनोति,पुनः स्वयमपि तदनुसारमाचरति च स आचार्यःइति ।

भागवतकाले गुरुःन केवलं शिष्यान् अध्यापयति अपितु संतानवत् पालयति स्म।गुरुकुलप्रवेशसमये एव उपनयनसंस्कारो भवति स्म। उपनयनस्यार्थः गुरुसमीपे नयनमिति। श्रीमद्भागवते वर्णितं यत् स्वयं नारायणोऽपि श्रीकृष्णावतारे भ्राता बलरामेण साकं ह्यवन्तीपुरवासिनं काश्यं सान्दीपनिं मुनिं गत्वा धनुर्वेद–धर्मशास्त्रादीन् विषयान् गुरुणा सकृन्निगदमात्रेण संजगृहीतवान्।यथा–

अथो गुरुकुले वासमिच्छन्तावुपजग्मतुः।
काश्यं सान्दीपनिं नाम ह्यवन्तीपुरवासिनम्।।
यथोपसाद्य तौ गुरौ वृत्तिमनिन्दिततताम्।
ग्राहयन्तावुपेतौ स्म भक्त्या देवमिवादृतौ।। श्रीमद्भागवते.१०–४५–३१तः३५

शिक्षायाः नास्ति काचिदवधिः, आजीवनं शिक्षा जायते । केवलं गुरुमुखेन शिक्षा न भवति अपितु मातरमारभ्य चराचरजगतः शिक्षा प्राप्यते। भागवते भगवान् कपिलः मातरं देवहूतिं योगतत्त्वं शिक्षयति। पिता व्यासःपुत्रं शुकं भागवतीं संहितामध्यापयति। माता मदालसा पुत्रमलर्कं राजशास्त्रशिक्षणपुरस्सरं परमार्थमपि समुपदिशति। अवधूतःदत्तात्रेयःचतुर्विंशतिभिः गुरुभिः पृथक्– पृथक् शिक्षामनुकरोति।

श्रीमद्भागवतमहापुराणं भक्तिप्राधान्यमस्ति भक्तिरेव भागवतस्य प्रतिपाद्यविषयः। अतःविविधैरुपायैः भगवद्भक्तिमेव शिक्षयत्यैतत् पुराणम् । तैः उपायैः लौकिकं पारमार्थिकं चोभयविधिं शिक्षणं भवति । भगवद्भक्त्या मनुष्यः भगवन्तं स्वहृदये आबध्नाति । भक्तस्य हृदये बद्धः भगवान् भक्तं कदापि न त्यजति। अजितेन्द्रियः भक्तः विषयैः बाध्यमानोऽपि स्वप्रगल्भया भक्त्या कदापि नाभिभूयते, यथोर्जिता भगवद्भक्तिः भगवन्तं साधयति तथा योगसांख्यतपत्यागादिभिः न जायते । एकनिष्ठया भक्त्या अहं ग्राह्यः इति भगवता श्रीकृष्णेन उद्घोषितं भक्तोध्दवम्प्रति–

बाध्यमानोऽपि मद्भक्तो विषयैरजितेन्द्रियः।
प्रायःप्रगल्भया भक्त्या विषयैर्नाभिभूयते ।।
यथाग्निः सुसमृध्दार्चिः करोत्येधांसि भस्मसात् ।
तथा मद्विषया भक्तिरुध्दवैनांसि कृत्स्नशः।।
न साधयति मां योगो न सांख्यं धर्म उध्दव ।
न स्वाध्यायस्तपस्त्यागो यथा भक्तिर्ममोर्जिता ।।
भक्त्याहमेकया ग्राह्यः श्रध्दयाऽऽत्मा प्रियः सताम्।

भक्तिः पुनाति मन्निष्ठां श्वपाकानपि सम्भवात् ।।

श्रीमद्भागवते.११–१४–१८तः२१

अतएव श्रीमद्भागवते भक्त्याङ्गरूपेण शिक्षा अपि बहुधा निरूपिता। पुराणेस्मिन् प्रश्नोत्तर– संवादोपाख्यानव्याख्यान–रूपकोपमा–उदाहरणानुकरणात्मचरितादिमाध्यमेन शिक्षणं भवतीति प्रतिपादितम्। यया शिक्षणं सा शिक्षा इति। श्रीमद्भागवते प्रारम्भे एव सूतमुनिं प्रति शौनकादिमुनयः प्रश्नानि कृतवन्तः, यस्योत्तरे सः सूतः परीक्षितशुकदेवसंवादमुपस्थाप्य उपाख्यानादिवर्णनपुरस्सरं सम्पूर्णं भागवतं वर्णयामास । एषा प्रश्नोत्तरप्रणाली शिक्षाशास्त्रिभिः अद्यापि आदृता ।

संवादमाध्यमेनापि शिक्षा दीयते।श्रीमद्भागवते नारदव्यास–परीक्षिध्दर्म–विदुरोध्दव–मनुकर्दम–कपिलदेवहूति–नारदयुधिष्ठिर–श्रीकृष्णोद्धवादिसंवादमाध्यमेन अनेके विषयाः प्रतिपादिताः, येनापि शिक्षा ग्रहणं भवत्येव। उपाख्यानं पुराणस्योपकरणमस्ति। अतः विभिन्नेषु संवादेषु उपाख्यानानि समुपवर्ण्य शिक्षा उद्घोषिता इति। भागवते भरतोपाख्यानं, ध्रुवोपाख्यानं, प्रह्लादोपाख्यानं, अवधूतोपाख्यानं,गजेन्द्रोपाख्यानञ्च स्वतत्वगाम्भीर्येण महत्वपूर्णं स्थानं विभर्ति। एतैःउपाख्यानैःभगवद्भक्तिमाहात्म्यं भगवन्माहात्म्यञ्च प्रकाशितम्। विष्णुभक्तानां अवमानेन कीदृशी दुष्परिणतिः भवति तद् वर्णितं दक्षयज्ञध्वंसोपाख्याने। परमवैष्णवं शिवमज्ञाय दक्षस्य दुर्दशा संजाता । अतः विष्णुभक्तान् प्रति द्वेषो न करणीयम् इति शिक्षा अस्मादुपाख्यानात् समुपलभ्यते। ध्रुवोपाख्यानात् विष्णुभक्तस्य भगवन्तं प्रति अहैतुकी अचला भक्तिः प्रतिपाद्यते ।वेनोपाख्यानमाध्यमेन नास्तिकः भगवद्भक्तिरहितः भक्तविद्वेषः जीवःचरमां दुर्गतिं प्राप्नोति इति शिक्षितम्। प्राचीनबर्हिप्राचेतसोपाख्यानाभ्यां संयुक्ततया हरिभक्तिः प्रतिपादिता । गृहस्थाश्रमः षड्रिपुजयाय दुर्गस्वरूपः, जितेषु षड्रिपुषु गृहे वने वा वासःस्यात्,तेन न कापि विप्रतिपत्तिःभवति।इयं शिक्षा प्रियव्रतोपाख्यानात् लभ्यते। ऋषभदेवोपाख्यानेन शिक्षा जायते यत् भगवद्भक्तिलाभेन पूर्णमनोरथाः भक्ताः अनायासेनैव समुपस्थिते पुरुषार्थे समादरं न प्रदर्शयन्ति । तेषां मते तु भक्तिरेव सातिशयं सुदुर्लभा। भक्तः मुक्तिप्रदानेच्छोःभगवतः सकाशात् मुक्तिमपि नाङ्गी करोति। ऋषभदेवः योगिनां वांच्छितां स्वयं समुपस्थितां च सिध्दिमपि उपेक्ष्य भगवद्भक्तिलाभार्थं प्रयासमकरोत् इत्यनेन भक्तेः श्रेष्ठत्वं प्रतिपादितम्।भरतोपाख्यानेन संसारं प्रति अत्यासक्तिरेव बन्धनस्य बीजं इति प्रतिपादितम्। अत्र भगवद्भक्तेः श्रेष्ठत्वं संसारार्णवतारकत्वञ्च व्याख्यातम्। अजामिलोपाख्यानात् पापमकुर्वन् जीवः यदि यथोचितं प्रायश्चित्तं न कुर्यात् तर्हि मरणादन्तरं नरकयातनां प्राप्नोति ।अतः प्रायश्चित्तकर्मणा पापसमूहं विनाशयित्त्वा जीवःभगवतपदस्यधिकारी इति शिक्षितम्। वृत्रासुरोपाख्यानेन हरिभक्तेः परमोपादेयत्वं, जगतः विनश्वरत्वं, हरिभक्तिबलेन मायापाशछेदनत्वञ्च समुपदिष्टम्।

दुरूहविषयस्य शिक्षादानकाले व्याख्यानस्य आवश्यकता भवति। अवबोधनस्य अभावेन शिक्षणं निरर्थकं भवति। श्रीमद्भागवते पुरञ्जनोपाख्यानं भवाटवी वर्णनं रूपके स्तः। अतः





विषयगाम्भीर्यकारणात् रूपकं प्रतिपाद्य पुनःव्याख्यानपुरस्सरं तयोः सरलीकरणमपि कृतं भगवता वेदव्यासेन।पुरं जनयति इति पुरञ्जनो नाम जीवः। जीवः स्ववासनानुसारं शरीरमुत्पादयति। जीवस्य संसारासक्तिवशात् भगवद्विस्मृतिर्जायते। परिणामतः जीवःदुर्गतिं प्रप्नोति। तथैव भवं संसारमेव अटवीम् अरण्यमिति। अस्यामटव्यां षड्विधदस्यवः सार्थं विलुम्पन्तीति। अस्य रूपकद्वयस्य पुनःव्याख्यानपुरस्सरं सरलीकरणमपि कृतम्। एषा सरलीकरणप्रक्रिया अद्यापि शिक्षाप्रदाने उपयुज्यते एव।

उपमा उदाहरणञ्च प्रदाय कृतशिक्षणं प्रभावी भवति। अत एव भागवतस्य श्लोकेषु **“गोप्यःश्रियं द्रष्टुमिवागतां पतिम्”**तथा च **“यथोरगं सुप्तमबुद्धिरज्जुधीः”** इत्यादिवत् उपमोदाहरणादीनां प्रदर्शनं विषयबोधनार्थं बहुकृतमिति। अनुकरणादिना अपि शिक्षा जायते, यथा अवधूतः दत्तात्रेयः अनुकरणं कृत्वा चतुर्विंशतिभिःगुरुभिःशिक्षावृत्तिभिः शिक्षणं गृहीतवान्।यथा–

**यतो यदनुशिक्षामि यथा वा नाहुषात्मज।**

**तत्तथा पुरुषव्याघ्र निबोध कथयामि ते।।**श्रीमद्भा.११–७–३२तः३६

श्रीमद्भागवते प्रतिपादिता एषानुकरणप्रणाली इदानीमपि बहु उपयोगिनी। अनुकरणपूर्वकं सर्वे मानवाः स्व–स्व चरितमाजीवनं अद्यापि शिक्षयन्ति।

आधुनिकशिक्षाप्रणाल्यां शिक्षाङ्गत्वेन क्रीडा–व्यायाम–भ्रमणादीनां प्रयोगः क्रियन्ते। श्रीमद्भागवतेऽपि तृतीये एकादशस्कन्धे ब्रह्मचर्ययोगाभ्यासादीन् समुपवर्ण्य एतेषां महत्वं सुष्ठु प्रतिपादितम्।श्रीकृष्णस्य गोपबालकैः सह बहुविधा क्रीडा,वनभोजनादिकं, गोपीभिः सह जाता रासलीला च दशमे स्कन्धे संलक्ष्यते एव यथा–

**अविदूरे व्रजभुवः सह गोपालदारकैः।**

**चारयामासतुर्वत्सान् नानाक्रीडापरिच्छदैः।।**

**क्वचिद् वादयतो वेणुं क्षेपणैः क्षिपतः क्वचित्।**

**क्वचित् पादै किङ्किणीभिः क्वचित् कृत्रिमगोवृषैः।।**

**वृषायमाणौ नर्दन्तो युयुधाते परस्परम्।**

**अनुकृत्यरुतैर्जन्तूंश्चेरतुः प्राकृतौ यथा ।।** श्रीमद्भा.१०–११–३८तः४०

एतस्मिन् वर्णने शारीरिकचेष्टानां क्रीडारुपेणोपयोगस्तथा वन्यपशूनां स्वाभाविक्यः चेष्टा अपि बालकैः क्रीडारुपेण स्वीकृताः इति। यमुनापुलिने कन्दुकक्रीडापि भवति स्म। रासलीलायां तु नृत्यगीतादिकमपि संन्दृश्यन्ते एव।

एवम्प्रकारेण श्रीमद्भागवतस्थविविधप्रसङ्गानाश्रित्य मया शिक्षायाःविवेचनस्य प्रयत्नः कृतःस्वकीये ह्यस्मिन् शोधपत्रे इति शम्।

**XXXXXXXXXXXXXXXXXXXXX**

# संस्कृतवाङ्मये मानवीयमूल्यानि

डा.पि.वेङ्कट्रावः[१९]

साम्प्रतं वयं शिक्षायां प्रशासने राजनीतिक्षेत्रे किं बहुना जीवनस्य सर्वस्मिन्नपि रङ्गे प्रतिदिनं प्रवर्धमानां मूल्यावनतिमवलोकयामः। अस्माकं नीतिनिर्धारकाः अधुना एनमंशं साक्षात्कुर्वन्तः अनुभवन्तश्च नितरां दूयन्ते। दूरदर्शनवार्तापत्रिकादिमाध्यमेन प्रसार्यमाणासु वार्तासु भ्रष्टाचारवार्ता एव प्रचुराः। आसामवलोकनेन इदमवश्यं स्फुटं भवति यत् साम्प्रतं देशे सर्वस्मिन्नपि रङ्गे औत्कर्षस्य, कर्मनिष्ठायाः, राष्ट्रियभावनायाः आवश्यकता च नितरां वरीवर्तीति।

मानवव्यवहारस्य निर्धारकतत्त्वानि भवन्ति मूल्यानि। मानवेन कथं प्रवर्तितव्यं कथं नेति निर्धारणे निकषोपलायन्ते तानि। मूल्यमिति पदम् आङ्ग्लभाषायाः Value इत्याख्यस्य अनुवादरूपम्। Value इति आङ्ग्लेयं पदं लाटिन्भाषायाः Valerie इति धातोः निष्पन्नम्। यस्यार्थः बलवत्त्वं शक्तिमत्त्वं वा। मूल्यानि तत्प्रारम्भस्तरे वैशिष्ट्यवैविध्येन आवश्यकता-संवेगाभिरुचीनां रूपे दृश्यन्ते। यदीमानि व्यक्तिजीवने निश्चितानि भूत्वा परिनिष्ठितानि भवन्ति तथा सामाजिकानुमोदनं प्रामाणिकताश्च प्राप्य मूल्यत्वेन परिगण्यन्ते।

कस्या अपि नागरिकतायाः सांस्कृतिकप्रगतिः तद्देशीयनागरिकैः सुनिर्मितां मूल्यव्यव-स्थामुपजीवति। संसारस्य प्राचीनसभ्यतासु भारतीयदार्शनिकविकासेन मूल्यानां प्रचुरं प्राधान्यं दत्तम्। अनन्तरकालिकाः दार्शनिकसम्प्रदायाः, कलाविज्ञानादीनि च प्राचीनमूल्यव्यवस्थात् एव उत्पन्नानि। वस्तुतो विमृशामश्चेत् मानवीयमूल्यविषयिणी चिन्तनधारा मानवस्य सामा-जिकजीवनप्रारम्भादेव उपाक्रान्ता। जीवितुं, ज्ञातुम्, आनन्दितुश्च आकाङ्क्षा नितरां नैसर्गिकी। इमे एव सच्चिदानन्दरूपेण मानवव्यक्तित्वस्य पक्षरूपेण व्यपदिश्यन्ते। प्रत्येकमपि मानवः आत्मनिष्ठाम् इमामपेक्षं न केवलं जानाति प्रत्युत स्वीयसहचरा अपि इमा अपेक्षाः धरन्तीति अवगच्छति। एषु सदिति पक्षः जीवितुं, चिदानन्दौ तु विकासार्थं मानवं प्रेरयति। अत एव मानवः जीवितुं विकसितुमेव स्वीयान् समान् प्रयत्नान् विदधाति। मानवः मत्सहचरा अपि इमा अपेक्षा धरन्तीति ज्ञानं धरेत् तथा तेषामपेक्षाणां स्वीयापेक्षाणाश्च सम्पूरणविषये पार-स्परिकविरोधो न स्यात्, परं स्वीयसहचराभिलाषपूर्तये मयाऽपि प्रयतनीयमित्येषां प्रवृत्ति-मात्मनि जनयेत्। अत्रैव मानवस्य नैतिकसामाजिकजीवनस्य उदयः। स्वेच्छाऽपेक्षाभिस्सह इतरेच्छापेक्षाणां सम्पूर्तिविषयकं चिन्तनमेव नैतिकतायाः सामाजिकजीवनस्य च मूलभूत-सिद्धान्तः। यथोक्तम् -

यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सये॥ (ई.उप.६)

प्रत्येकस्मिन्नपि देशे उत्पन्नं तद्देशीयानां संस्कृतिजीवनयोः आदर्शाकाङ्क्षाणाश्च दर्पणायते। भारतीयानां संस्कृतिजीवनादर्शाकाङ्क्षाः संस्कृतवाङ्मयदर्पणे सुष्ठु प्रतिबिम्ब्यन्ते। केनचिद्विदुषा मूल्यतथ्ययोरन्तरम् इत्थं प्रादर्शि - तथ्यानि ज्ञायन्ते मूल्यानि तु याथार्थीक्रियन्ते इति। इत्थं मूल्यं साध्यवस्तु तथ्यं तु सिद्धवस्तु। मूल्यं न केवलमधिगम्यते प्रत्युत प्रशंस्यते च। मूल्यं मानसिकशाब्दिकशारीरिकस्वभावानामपेक्षत इति कृत्वा तस्मिन् तत्प्राप्तिमार्गोपायाः तत्फलश्च अन्तर्निहितं भवति। यथोक्तम् - मनसा यथार्थचिन्तनम् ऋतम्। वचसा यथार्थभाषणं सत्यम्। वपुषा यथार्थाचरण धर्मः इति। भारतीयसम्प्रत्यये धर्मार्थकाममोक्षाः प्रत्येकमपि मानवस्य जीवनमूल्यत्वेन स्मृत्यादिभिः निर्दिष्टाः। एष्वर्थस्तु कामप्राप्तिसाधनं भवति चेत् धर्मः मोक्ष-साधनोपायत्वेन अङ्गीकृतः। धर्मार्थकामाख्यत्रिवर्गः उपचारमूल्यं भवति। मूल्यानि सर्वथा मानवीयानि भवन्ति यतः अन्ये प्राणिनः स्वीयमूलप्रवृत्त्या प्रेरितास्सन्तो व्यवहरन्ति न तु मानव इव मूल्यप्रेरितः। मूल्यप्रवृत्तयस्तु तथ्यसहयोगिनः। परं मूल्यानि न तथ्यसहयोगीनि। मूलभूत-पशुप्रवृत्तीः अतिरिच्य मानवेषु परिपक्वताप्राप्त्यर्थं तीव्राभिलाषो भवति। अयमेवाभिलाषः पुरुषार्थचतुष्टयभावनायाः मूलकन्दः। अयं संस्कृतरानपेक्षते। संस्कारपदमेव परिशुद्धिभावनां द्योतयति। इमे एव संस्काराः वर्णाश्रमधर्मपालने सार्थकाः भवन्ति। मानवीयस्य परिपक्वता- प्राप्त्यभिलाषस्य अस्य मूलं कर्मसिद्धान्ते द्रष्टुं शक्यते। मूल्यानामात्मसात्करणमेव आत्म- साक्षात्कारो परिणमति। इत्थं ज्ञाता ज्ञातव्यत्वेन परिणमते। इयश्च परिणमनप्रक्रिया मानव-

[19] प्रवाचकः, शिक्षाविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

Note- Printout of this paper can be accepted along with CERTIFICATE OF APPRECIATION only for official use.



जातेः दैवकृतवरदानमेव। वस्तुतः इयमेव मृगमानवयोः भेदकारिणी काचन रेखैव। ईदृशात्म-साक्षात्कार एव वेदान्ते साक्षिपदेन अभिधीयते। इयं परिपक्वभावना मानवात्मनि स्थिता आध्यात्मिकव्यक्तिरूपेण परिणमयति। यद्यपि आत्मनिश्चयशक्तिः आत्मविमर्शनाद् भिद्यते। मानवे स्थिता आत्मावरणरूपा अविद्यात्वेन कथ्यते। परं मानवजातिः स्वीयलक्ष्यं मोक्षप्राप्तौ स्वीयाशक्ततां च अभिजानाति। वस्तुतः आदर्शं यथार्थश्च इत्युभयं मानवो जानाति। मानवे-तिहासे श्रेयःप्रेयसोः प्राप्तिविषयकः सङ्घर्षः वस्तुतो विस्मयजनकः। अस्यामेव प्रक्रियायाम् औत्तम्यं, नैतिकता, दया, पुण्यमितीमानि विकासं समवाप्य धर्मे समग्रतां प्राप्नवन्। धर्मः भौतिकावश्यकतानां विधिपूर्वकप्राधान्यं ददाति न तु भौतिकेच्छानां कृते। (आवश्यकता निसर्गा, इच्छा तु अप्राकृतिकी) अतः स्वार्थेच्छानियमनस्य उत भोगेच्छापरिमितेः महत्प्राधान्यं दत्तं धर्मे। एतत्साधनचतुष्टयरूपेण अभ्यस्यते। अत्रैव दर्शनं पदं निदधाति।

सच्चिदानन्दमार्गेण मानवैः महोच्चमूल्यं प्राप्तव्यं भवति। एतदत्रावश्यं देयं भवति यत् मूल्यानि संसारविकासप्रक्रियायाः उत्पन्नवस्तूनि न, प्रत्युत अलौकिकतत्त्वानि। मोक्षप्रापको धर्मः शिवसत्यप्रतिनिधिश्चेत् कामप्रापयिता अर्थः शक्तिसुन्दरयोः प्रतिनिधिभूतः। शिवसत्य-युगलम् आध्यात्मिकश्चेत् शक्तिसुन्दरमनुभवगम्यम्। प्रथमं युगलं मानवैः स्वजीवने किमधि-गन्तव्यमिति सूचयति। द्वितीयश्च युग्मं तैः सहजतया किं प्राप्तुमिष्यते इति च सूचयति। भारतीयं दर्शनं सकलमपि मूल्यविमर्शकमेव नान्यत् किमपीति आचार्य हिरियण्णस्य मतम्। अतः भारतीयदर्शनानुसारं मूल्यं नाम पुरुषार्थः। धर्मार्थकाममोक्षरूपचतुर्विधपुरुषार्थाः मूल्यत्वेन परिगण्यन्ते अस्मद्दर्शनेषु। तद्विवेचनमत्र प्रस्तूयते।

पुरुषार्थाः

पुरुषस्य अर्थः पुरुषार्थः इति व्युत्पत्त्या पुरुषस्य प्रयोजनमित्यर्थोऽस्मात् लभ्यते स च चतुर्विधः। यथा अग्निपुराणे - "धर्मार्थकाममोक्षाश्च पुरुषार्था उदाहृताः" इति, तथैव मनुरपि - "एतच्चतुर्विधं विद्यात् पुरुषार्थप्रयोजनम्" इति।

तत्र धर्मः - "धरति लोकान् ध्रियते पुण्यात्माभिरिति वा" इति धर्मः हितोपदेशकारो वदति-

एक एव सुहृद्धर्मो निधनेऽप्यनुयाति यः।
शरीरेण समं नामं सर्वमन्यत्तु गच्छति॥ (हितोपदेशः १.५९)
पात्रे दानं मतिः कृष्णे मातापित्रोश्च पूजनम्।
श्रद्धा बलिर्गवां ग्रासः षड्विधं धर्मलक्षणम्॥ (पाद्मोत्तरखण्डम्)

धर्माङ्गानि

ब्रह्मचर्येण सत्येन तपसा च प्रवर्तते
दानेन नियमेनापि क्षमाशौचेन वल्लभ।
अहिंसया सुशान्त्या च अस्तेयेनापि वर्तते
एतैर्दशभिरङ्गैस्तु धर्ममेव प्रसूचयेत्॥

अर्थः

लोकेऽस्मिन् बहुपुण्यसापेक्षत्वेन दुःखलभ्यं नरत्वं धर्मादिसाधनोपायत्वेन सुसंस्कर्तु-मेवास्मत् पूर्वजैः पुरुषार्थानां व्यवस्था विहिता। "पुरुषैः अर्थ्यते याच्यते योऽसौ" इति पुरुषार्थः। जगति सर्वोऽपि आत्मनः सुखमीहते। तच्च सुखं तदैव लभते यदा तस्यावश्यकताः, इच्छाश्च पूर्णा भवन्ति। एतद् ध्यात्वैव पुरुषार्थश्चतुर्विधः प्रकल्पितः - धर्मार्थकाममोक्षश्चेति।

उक्तं खलु महाभारते -

धारणाद् धर्ममित्याहुर्धर्मो धारयते प्रजाः।
यत् स्याद् धारणसंयुक्तः स धर्म इति निश्चयः॥
(महाभारतम्, कर्णपर्व ६९.५९)

यद्यप्यत्र भारतीयसंस्कृतौ भौतिकी आध्यात्मिका चौन्नतिः समाना तथापि भौतिक्या उन्नत्याः कृते "अर्थाख्यस्य पुरुषार्थस्य सेवनमनिवार्य"मिति सर्वविदितमास्ते। सर्वोऽपि लोक-व्यवहारोऽर्थेनैव सिद्ध्यति। तस्माल्लोकः अर्थं स्पृहयते। "अर्थ्यते सर्वैः इति अर्थः" इति अर्थ शब्दस्य व्युत्पत्तिः सार्थका एव। "आत्मनः भौतिकावश्यकतापूर्त्या सहैव धर्मकामौ

Note- Printout of this paper can be accepted along with CERTIFICATE OF APPRECIATION only for official use.

पुरुषार्थावपि साधयेन्नरः” इति अर्थाख्यस्यास्य पुरुषार्थस्याश्यः। तदुक्तं नीतिवाक्यामृताख्ये ग्रन्थे - “यतः सर्वप्रयोजनसिद्धिः स अर्थः” इति।

कामः

कामो मानवजीवस्य तृतीयः पुरुषार्थः। पुरुषार्थेषु धर्मार्थयोर्यावत्प्राधान्यं तावदेव अस्यापि विद्यते। “काम्यत इति कामः” इत्यनया व्युत्पत्त्याऽखिलेच्छानां ग्रहणं भवति। काम-पदेन यासां पूर्त्या मानवो मनसा सन्तोषमनुभवति। मनस्तोषकरः काम इति कथने नास्ति दोषः। सोऽयं कामो द्विविधः। धर्ममूलोऽधर्ममूलश्चेति। तत्र स्वाभिलषितैन्द्रियसुखभोगा-वाप्तये धर्मानुकूलो व्यापारः प्रथमः। असावेव पुरुषार्थाभिधानः कामपदवाच्यो भवति। स्वेप्सितं पदार्थमासाद्य या तृप्तिरुत्पद्यते सा काम इति व्यपदिश्यते। कामप्राप्तिः पुण्यकर्मणामुत्तमं फलमिति मन्यते। तदुक्तं महाभारते -

द्रव्यार्थस्पर्शसंयोगे या प्रीतिरुपजायते।
स कामश्चित्तसङ्कल्पः शरीरं नास्य दृश्यते॥
इन्द्रियाणां च पञ्चानां मनसो हृदयस्य च।
विषये वर्तमानानां या प्रीतिरुपजायते॥
स काम इति मे बुद्धिः कर्मणां फलमुत्तमम्॥ (महाभारतम्)

मोक्षः

पुरुषार्थेषु मोक्ष एव परमः पुरुषार्थः। एष निर्विवादः। धर्मार्थकामाः संसारं प्रति व्यक्तिं प्रवर्तयन्ति। मोक्षस्तु संसारबन्धनान्निवर्तयति। इदमेव निदानं यन्मुक्तये विभिन्नधर्मसम्प्रदायाश्च सदैव साधनाम् आमनन्ति। मन्त्र-तन्त्र-यन्त्रैर्वा मोक्षप्राप्तिः न भवितुमर्हति। अमी मोक्षप्राप्ति-साधने साहाय्यं केवलं विदधति। वैराग्यं हि ज्ञानस्य मुख्यं साधनम्। तस्य च प्राप्तये वर्णा-श्रमपालनमनिवार्यम्।

संसारोऽयं सागर इति समुद्घोषयन्ति विपश्चिदः। संसारसागरेऽस्मिन् कर्मविपाकस्य बलीयस्त्वात् दुःखं प्रतिपदं समापतत्येव। दुःखोदधौ निमग्नः धैर्यमेवावलम्बयेत्। आत्मशक्त्या दुःखं निरसितुं शक्यते। आत्मशक्तिर्हि सर्वोदयस्य मूलम्। इयं चात्मशक्तिर्ज्ञानेन भवति। ज्ञानाग्निना अनेन सर्वकर्मप्रदाहे मोक्षावाप्तिः भवति।

जीवनमेतन्न केवलं भोगार्थमेव अपितु आत्मोन्नतेः प्रमुखं साधनम् इति भावना मानवं देवत्वं प्रापयति। तदन्वितो जनः सर्वभूतेषु एकत्वं समीक्षते। जगदिदं सर्वनियन्त्रा, सर्वाधि-पतिना, सर्वशक्तिमता, सर्वज्ञेन, सर्वकल्याणगुणस्वरूपेण परमात्मना व्याप्तम् इत्यवगच्छति।

ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।
यस्मिन्सर्वाणि भूतान्यात्मैवाभूद् विजानतः।
तत्र को मोहः कः शोकः एकत्वमनुपश्यतः॥

इति ईशोपनिषद्वाक्यैः सर्वत्रैकत्वदर्शनेन मानवः शोकम् अतितरिष्यति। एवं जन्ममृत्युभ्यां मुक्तिः, संसारबन्धनान्मुक्तिः, सर्वविधेभ्यो दुःखेभ्यो मुक्तिः, परमात्मस्वरूपज्ञानम्, आत्म-परिज्ञानं सर्वाशानां विनाशश्च मोक्ष इति व्यपदिश्यते।

उपसंहारः

तत्रादिमः पुरुषार्थोऽस्ति धर्मः। धर्म एव भारतीयसंस्कृतेः प्राणः। अस्मत्संस्कृतिप्रति-निधिभूतानां वेदानां मूलं धर्मः। समाजस्य धारणे पोषणं चायमेव करोति। असावेव मानव-कल्याणं मोक्षाख्यं पुरुषार्थं च साधयति। समस्तमपि विश्वं सूत्रेणैकेन अयमेव बध्नाति। अहिंसा, सत्यम्, अस्तेयम्, शौचम्, इन्द्रियनिग्रहः, दया, क्षमा, आर्जवम्, दानम् एतानि धर्मसाधनानि। “परोपकारः पुण्याय पापाय परपीडनम्” इति इदं धर्मसर्वस्वम्। इत्थं भारतीय संस्कृतौ मूलरूपेण धर्म प्रतिष्ठितः। धर्म एव पुरुषार्थचतुष्टये प्रधानः। धर्ममुपजीव्य इतरे पुरुषार्थाः प्रकाशन्ते।

उक्तं च चाणक्यसूत्रेषु - सुखस्य मूलं धर्मः। धर्मस्य मूलम् अर्थः। वृत्तिमूलम् अर्थः। अर्थमूलौ धर्मकामौ। सुखेन जीवनं यापयितुमसौ पुरुषार्थः। संसारे सर्वस्यापि जनस्य चतस्रो अवस्थाः धर्मशास्त्राणि प्रतिपादयन्ति। वर्णाश्रमधर्मपालनेन मनः शुद्धं भवति। तदा अर्थ- कामाभ्यां वितृष्णा जायते। धर्मस्य फलं वरमिति विज्ञाय धार्मिकः पुरुषो धर्माय अर्थमेव न यत्किञ्चिदपि त्यक्तुमुद्यतो भवति। धर्मादर्थकामौ सिध्यत इति स्वाभाविकम्।





References

1. Chakrabarti, Mohit (1997), “Value Education changing Perspectives”, New Delhi, Kanishka Publishers, Distributors.
2. Gupta, N.L. (1997), “Educational Ideals and Institutions in Mahabharata”, New Delhi : Mohit Publications.
3. Kondada Ramayya, P. (1997) - “The light of Ramayana”, Hyderabad : Arsha Vijnana Trust.
4. Kulshrestha, S.P. (1969) - “Test and Manual for a test of Democratic Values”, Lucknow: Indian Psychological Corporation.
5. Venkataiah N. (1988) - “Value Education”, New Delhi: A.P.H Publishing Corporation.

XXXXXXXXXXXXXXXXXXXXX

# गीताऽमृततत्त्वानां व्यावहारिकं विश्लेषणम् ।

बिपिनकुमारझा[20], दिपेशविनोदकतिरा[21] च

जगतीह नानाविधतापानामनुस्वीतरूपेणाध्यात्मिकाधिभौतिकाधिदैविकत्रिविधतापैः जनाः अहर्निशं सन्त्रस्ताः दरीदृश्यन्ते। एभिस्त्रिविधतापैः न हि दर्शनादृतेमुक्तिः। दर्शनानाम्महत्वं साम्प्रतिके युगे नूनमेव नितरामपेक्षितमस्ति। तत्रापि गीताजीवनदर्शनस्य महत्वं सर्वाधिकं भजते। यतो हि साम्प्रतं जगति सर्वत्र अशान्तिः विक्षोभः आतङ्कः लुण्ठनं स्तेयं हिंसा अनाचारः दुराचारः अत्याचारश्च प्रवर्तमानः विश्वमानसं विभीषयन्ति, निरागसः बालाः युवानः वृद्धाश्च निहन्यन्ते अबलाऽपह्रियन्ते पथिगृहे यात्रायाञ्च जनाः आत्मानमसुरक्षितमनुभवन्ति। मानवीयः विश्वासः खण्डितः दृश्यते। नैतिकमूल्यानि जीवनादपाकृतानि भवन्ति। धर्ममुपेक्ष्यार्थकामञ्च समाद्रियेते। एतस्यां विषमपरिस्थितौ गीताजीवनदर्शनसुधामयाः आचारादर्शाः अतीवोपयुक्तास्सन्ति। इह

[20] सह-आचार्यः, साहित्यविभागः, श्रीसदाशिवपरिसरः, पुरी, ओडिशा, IIT Mumbai इत्यस्य शोधच्छात्रश्च।

[21] IIT Mumbai इत्यस्य शोधच्छात्रः

शोधपत्रे एतेषामेव विवेच्यविषयानां चर्चा विद्यते येन वयं अहर्निशं भवनिधितरणं कर्तुं क्षमाः भवामः।

## परिचयः

भागीरथरथखातावच्छिन्नजलप्रवाहरूपेयम्परमपवित्रसुगीता महामुनिवेदव्यासप्रणीतस्य महाभारतग्रन्थस्य भीष्मपर्वणः पञ्चविंशाध्यायतः प्रायस्सप्तशतीरूपा गीतेयं सङ्घर्षमय-मानवजीवनस्य चिरन्तनी गाथा। गीता स्वत एव आचारशास्त्रं विद्यते। गीता-प्रतिपादितेन दर्शनेन मानवास्संसारसागरन्तीर्त्वा परमपुरूषार्थं लब्धुं शक्नुवन्ति। दुःखितोऽर्जुन प्रथमोऽध्याये जुघोष-

**''धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत्'**

स एव अर्जुनोऽग्रे जगाद-

**''स्थितोऽस्मि गत सन्देहः करिष्ये वचनं तव''।**

उपनिषत्सु ये भावाः केवलदार्शनिकपद्धत्या लिखितास्सन्ति; त एवात्र मनोहरशैल्या गीतायाङ्गुफितास्सन्ति। तद्यथा-

**''सर्वोपनिषदो गावो, दोग्धा गोपालनन्दनः।**
**पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत्।।''**

यत्किमप्यत्र नास्ति तन्नान्यत्र विद्यते-

**धर्मे ह्यर्थे च कामे च मोक्षे च भरतर्षभ।**
**यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्॥**

## महत्त्वम्





इह लौकिकजीवनं कथं सम्यक् रूपेण स्यात्; तथा कथं सांसारिकजञ्जालसङ्घर्षसङ्ग्रामे जयः स्यात्; कथं काले सति पारलौकिकी शान्तिः स्यादित्यादि जिज्ञासा सर्वथा भवत्येव। कुत्र गतिरिति जिज्ञासायामुच्यते यत्- गीतायामेव। सांसारिकपारलौकिकिसमस्यानां समाधानत्वेन गीतैव पुरतो याति।

## कर्मप्राधान्यम्-

साम्प्रतिकयुगे कर्तव्यप्रमाद एको महान् व्याधिः। एषः सर्वविनाशजनकः। न क्वचिदेतादृक् स्थानं यत्र एतस्यौषधेः उपलब्धता स्यात्। गीतायां जीवमात्रस्य कृते कर्तव्यपथदर्शनं कृतमस्ति। सर्वे जीवाः[22] स्व-स्वकर्तव्यपथे यथानियतं चलन्ति किन्तु मानवनां कृते बुद्धिवैशिष्ट्यमपि विद्यते। एतदुपयुज्य मानवाः कर्तव्येषु प्रमादं कुर्वन्ति। येन समाजे विच्छृङ्खलता आपतति। गीता शास्त्रप्रतिपादितं, यथानियतं[23] कर्तव्यानुपलनाय कथयति। यदि जनाः गीतानुदेशानुपालनं करिष्यन्ति तर्हि राष्ट्रस्य विकासः अवश्यमेव भविष्यतीति निश्चप्रचम्।

## आध्यात्मिकी दृष्टिः

हितोपदेशे उक्तमस्ति[24] आत्मानममरं मत्वा एव विद्यामर्थञ्च चिन्तयेत्। **गीतायामेतस्य विशदविवरणं प्राप्यते यत्र आध्यात्मिकतत्वमहत्त्वमहिमामण्डितं विद्यते। आध्यात्मिकरूपेणोन्नतिः[25] राष्ट्रस्य कृते अनिवार्यतत्त्वरूपे विद्यते। आध्यात्मतत्वेषु दृष्टिः समुन्नतये आवश्यकीति मे मतिः।** गीतायां यत् आत्मनः स्वरुपविचारः प्रतिपादितः अस्ति तद्वारा जीवने स्थायित्वं आयाति मानसकष्टेन च निवृत्तिर्भवति। गीतायां प्रतिपादितं मतं स्वीकृत्य जनाः धैर्य- भावमाप्नुवन्ति। गीता

[22] 'न हि कश्चित् क्षणमपि, जातु तिष्ठत्य कर्मकृत'
कार्यते ह्यवशः कर्म, सर्वः प्रकृतिजैर्गुणैः।।
[23] 'तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ।
ज्ञात्वा शास्त्रविधानोक्तं कर्मकर्तुमिहार्हसि।।'
[24] अजरामरवत् प्राज्ञो विद्यामर्थञ्च चिन्तयेत्।
गृहीत इव केशेषु मृत्युना धर्ममाचरेत्॥
[25] ''अजो नित्यः शाश्वतोऽयं पुराणो''
''न हन्यते हन्यमाने शरीरे।।''

त्रिविधाहारं[26] प्रतिपादयति। जीवने कीदृक्कर्म करणीयङ्कीदृक् च निषिद्धमिति सर्वमत्र सम्यक् रीत्या विवेचितम्।

## शरीरस्यौचित्यम्

इह जगति मानवाः यत्किञ्चिदपि कार्यं कुर्वन्ति तत्र सर्वत्र शरीरस्य महत्ता अस्ति एव इति सर्वविदितम्। दैनन्दिनजीवनस्य विहाराहाराचारविचारमपि सम्यकरीत्या प्रतिपाद्यते गीतायाम्। कदा शयीत कदा वा जाग्रीयात्, भोक्तव्यं, भ्रमितव्यं सर्वेषां विचाराणामुपलब्धिर्भवति[27]।

## आत्मसंयमः

आत्मसंयमस्तु[28] समाजस्योन्नतये अत्यावश्यकतत्त्वरूपे विद्यते। अद्यतनकाले इह संसारे दुःखस्य मूलकारणं मानसिकी व्यथा। शनैः शनैः युवानः अवसादग्रस्तावस्थाम्प्राप्नुवन्ति। एते जनाः अविवेकिभूत्वा ते आत्मघातिनः भवन्ति। दिनानुदिनमात्महन्तृणां प्रतिशतं वर्धते। तस्य मूले मनुष्यस्य मानसिकचपलता एव विद्यते। अत्र आध्यात्मिकतायाः महत्त्वं सर्वथा विद्यते एव।

**‘अंसशय महाबाहो मनो दुर्निग्रहं चलम्।‘**

**अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते।।**

[26] आयुः सत्व बलारोग्यसुखप्रीतिविवर्धनाः।
रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्विक प्रियाः।।
कट्वम्ललवणात्युष्णतीक्ष्णरुक्षविदाहिनः।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः।।
यातयामं गतरसं पूति पर्युषितं च यत्।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्।।

[27] ’युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।
युक्तस्वप्नाबोधस्य योगो भवति दुःखहा।

[28] ‘ध्यायतो विषयान्पुसः सङ्गस्तेषूपजायते।
सङ्गात्सञ्जायते कामः कामात्क्रोधोऽभिजायते।।
क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः।
स्मृतिभ्रंशाद बुद्धिनाशो बुद्धिनाशात्प्रणश्यति।।





इति संक्षेपेन यथामतिः गीतास्थतत्वानां विवेचनं सञ्जातम्। यदि गीतानुसारेण सम्यग्विचिन्त्य जनाः कार्यङ्कुर्युस्तर्हीहलौकिकपारलौकिक शान्तिञ्चाप्नुयुः इति मतिः। एवमन्ते अनाथनाथश्रीजगन्नाथकरुणावरुणालयकृपासिन्धोश्चरणकमलयोः प्रणिपत्य विरमामि विस्तरात्।

॥ इति शम्॥

## सहायकग्रन्थाः


- ’स्तोत्ररत्नावली‘ प्रकाशन-गीताप्रेस गोरखपुर वर्ष-2009
- शङ्करस्तोत्रमुक्तावाली सम्पादको अनुवादकश्च डॉ. शरदिन्दुकुमारत्रिपाठिनः प्रकाशन- स्थानम्-कांचीकामकोटिपीठ शङ्कराचार्यमठम्, वाराणसी, वर्ष-2003
- श्रीमद्भगवदगीता शाङ्करभाष्य, प्रकाशनस्थान-गीताप्रेस गोरखपुर वर्ष-2008
- श्रीमद्भगवदगीता (हिन्दी अनुवाद) प्रकाशन स्थान- गीताप्रेस गोरखपुरम वर्ष-2009


XXXXXXXXXXXXXXXXXXXXX

# व्याकरणं तत्सम्बद्धं भाषाविज्ञानञ्च

रामसेवक झा[२९]

**भाषाया यत्तुविज्ञानं सर्वाङ्गं व्याकृतात्मकम्।**

**विज्ञानदृष्टिमूलं तद् भाषाविज्ञानमुच्यते।।**

(कपिलः)

भाषाभावयोरविच्छिन्नः सम्बन्धो भवति। भावभिव्यक्तीकरणे भाषाया अनन्यसाधारणं नैजं दायित्वमस्ति। चिरं यावद् व्यवह्रियमाणासु भाषासु काचिदन्यतमैव स्वीयं परिनिष्ठितरूपत्वं प्राप्नोति। संस्कृतभाषा तु गीर्वाणवाणीनाम्ना प्रसिद्धा। सर्वासु भाषासु विद्यमानानां शब्दानां वाक्यानाञ्च व्युत्पादनार्थं परिमार्जनार्थञ्च किमपि व्याकरणमपि दृष्टिगोचरीभवति। अन्यासां भाषाणां यानि व्याकरणानि, तेषां प्रयोजनं वाक्यानां शब्दानाञ्च शुद्धाशुद्धिसम्पादनमात्रम्। संस्कृतव्याकरणस्य तु न केवलं शब्दव्युत्पत्तिमात्रं प्रयोजनम्, किन्तु ततोऽन्यदपि प्रयोजनमस्ति। संस्कृतभाषायां बहूनि व्याकरणानि सन्ति, तानि च अष्टसु यद्वा नवसु संख्यासु विभक्तानि।

[29] शोधच्छात्रः तिरुपतिविद्यापीठम्, आ.प्र.

अष्टसु यद्वा नवसु संस्कृतव्याकरणेषु सम्प्रति पाणिनीयं व्याकरणं प्रसिद्धं मूर्द्धन्यञ्च स्थानमलभत। पाणिनीयं व्याकरणं संस्कृतभाषायां विद्यमानानां वाक्यानां शब्दानाञ्च व्युत्पत्तिं सम्पादयति, शब्दानाञ्च वास्तविकं मूलं स्वरूपं किमिति प्रश्नं समादधाति शब्दानां वास्तविकस्वरूपसम्पादनेन च मोक्षमपि सम्पादयति। अत एव पाणिनीयव्याकरणस्य भागत्रयं विद्वास: कृतवन्त:। तद्यथा – प्रक्रियांश:, परिष्कारांश:, अर्थांशश्च।

प्रक्रियांशे शब्दानां व्युत्पत्ति:। तद्यथ – 'राम + आलय: = रामालय:' इत्यत्र दीर्घसन्धि:। राम इत्यत्र रम्धातु: प्रकृति: घञ् इति प्रत्यय:। अस्मिन् भागे वैयाकरणसिद्धान्तकौमुदीत्यादयो ग्रन्था: प्रसिद्धा:।

परिष्कारांशे लक्षणानां परिष्कार:। तद्यथा – 'अर्थवदधातुरप्रत्यय: प्रातिपदिकम्' इति सूत्रे किं नामार्थवत्त्वम्। वृत्तिमत्त्वमर्थवत्त्वमिति प्राचीना वैयाकरणा:। नवीना वैयाकरणास्तत्र परिष्कारं कृतवन्त:। "एतत्संज्ञाफलभूतविभक्ती-तरसमभिव्याहारानपेक्षया लोके अर्थविषयकबोधजनकत्वमर्थवत्वम्"। अस्मिन् भागे लघुशब्देन्दुशेखरादयो ग्रन्था: प्रसिद्धा:।

अर्थांशे तु दर्शनभाग: शब्दानां मूलं स्वरूपं किमिति प्रश्नस्य समाधानम्। शब्दस्य यन्मूलं स्वरूपम्, तदेव शब्दब्रह्मनाम्ना व्याकरणदर्शने प्रसिद्धम्। तदुक्तं श्रीभर्तृहरिणा [1]-

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।**
**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यत:।।**

शाब्दिकैर्व्यङ्ग्यव्यञ्जकरूपेण द्विविधं शब्दमङ्गीकृतम्। तदुक्तं व्याकरण-दर्शनस्य मूर्द्धन्यभूते ग्रन्थे वाक्यपदीये [2]-

**द्वावुपादानशब्देषु शब्दौ शब्दविदो विदु:।**
**एको निमित्तं शब्दानामपरोऽर्थे प्रयुज्यते।।**

व्यञ्जक: शब्द: प्राकृतध्वनिनाम्ना, व्यङ्ग्यश्च शब्द: स्फोटनाम्ना वैयाकरणसम्प्रदाये प्रसिद्धिमागत:। वक्तुर्विवक्षया कण्ठताल्वदिव्यापारेण उच्चार्यमाण: श्रोता च श्रोत्रेन्द्रियेण परिगृह्यमाणो वैखरीनाम्ना प्रसिद्ध: शब्दोऽन्त:करणे स्थितस्य शब्दतत्त्वस्य व्यञ्जक:। अन्त:करणे स्थितं शब्दतत्त्वं घट: पट इत्यादिव्यञ्जकध्वनिना घटपटाद्यात्मना अभिव्यक्तं सद् घटपटादिपदार्थान् बोधयति। यदन्त: स्थितं शब्दतत्त्वम्, स एव आत्मा। तदुक्तं श्रीभर्तृहरिणा वाक्यपदीये [3]–

**अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम्।**
**प्राहुर्महान्तमृषभं येन सायुज्यमिष्यते।।**

अपि च [4]-

**तस्माद्य: शब्दसंस्कार: सा सिद्धि: परमात्मन:।**
**तस्य प्रकृतितत्त्वज्ञस्तदाब्रह्मामृतमश्नुते।।**

शब्दानां संस्कार: परमात्मन: प्राप्तेरूपाय:। शब्दस्य प्रवृत्तितत्त्वं यश्च जानाति, स शब्दब्रह्मामृतमश्नुते। शब्दब्रह्मामृतमशित्वा च मुक्तो भवति। किञ्च यदन्त: शब्दतत्त्वं तदेव वाक्यस्य सत्यं स्वरूपम्। तदुक्तम् [5]-





**यदन्त: शब्दतत्त्वं तु नादैरेकं प्रकाशितम्।**
**तदाहुरपरे शब्दं तस्य वाक्ये तथैकता।।**

यथा वेदान्तिनो –वदन्ति सर्वं खल्विदं ब्रह्म। तथा संस्कृतभाषाया: पाणिनीयं व्याकरणं ब्रूते- सर्वं खल्विदं शब्दब्रह्मति। वाच्यवाचकात्मकं नामरूपात्मकञ्च सर्वं खल्विदं जगत् शब्दतत्त्वोपादानभूतम्। अस्य सर्वस्य ब्रह्माण्डस्योपादानं शब्दतत्त्वम। शब्दतत्त्वं प्रकाशाप्रकाशयोरपि प्रकाशकम्। तदुक्तं श्रीभर्तृहरिणा [6]-

**वाग्रूपता चेन्निष्क्रामेदवबोधस्य शाश्वती।**
**न प्रकाश: प्रकाशेत सा हि प्रत्यवमर्शिनी।।**

यदि अवबोधस्य ज्ञानस्य शाश्वती वाग्रूपता निष्क्रामेत् प्राणिषु न स्यात्। तर्हि प्रकाशोऽपि न प्रकाशेत। यत: सा वाग्रूपता प्रत्यवमर्शिनी। तदित्थं गीर्वाणवाण्या: सम्प्रति विद्यमानं व्याकरणं पाणिनीयाष्टाध्यायीनाम्ना प्रसिद्धं शब्दस्य प्रक्रियात्मकं दार्शनिकञ्च स्वरूपं प्रतिपादयति। संस्कृतेतरभाषाव्याकरणापेक्षया श्रेष्ठं विशिष्टञ्च महत्त्वं पाणिनीयव्याकरणस्य दृष्टिगोचरीभवति।

सम्प्रति समुपलभ्यमानं भाषाविज्ञानं तु शब्दस्य कण्ठताल्वादिव्यापारेण वक्त्रा समुच्चार्यमाणं श्रोत्रा च श्रोत्रेन्द्रियेण परिगृह्यमाणं ग्रन्थेषु लिपिरूपेण परिदृश्यमानं यद् बाह्यं स्वरूपं तदेव प्रतिपादयति। वाचश्च यत् तुरीयं स्वरूपं यन्मनुष्या वदन्ति, तावन्मात्रे भाषावैज्ञानिकानां गति: ।

अस्मिञ्जगति यद्यर्थस्य पूर्णं स्वरूपं यथार्थतया परिसमाप्तिताय च अस्माभिर्ज्ञातुं वाञ्छ्यते, अपि च भाषाया: सरलतमरूपस्यापि तत्त्वं जिज्ञास्यते, तदाऽस्य ब्रह्माण्डस्य स्वरूपं सृष्टिश्चेति विषयद्वयमवश्यमेव ज्ञातव्यम्। श्रोतुर्वक्तुश्चेत्युभयोरपि बुद्धौ स्थितं तत्त्वमपि वेदितव्यम्। अन्यथा शब्दार्थौ पूर्णतया ज्ञातुं ग्रहीतुञ्च न शक्यते। अर्थात् सृष्टिमूल एव भाषातत्त्वं वर्तते। यथा बीजे एको महीरुहस्तिष्ठति, यदि तदबीजं न स्वीक्रियते तदा शाखापल्लवादिविशिष्टं वृक्षत्वमपि सम्यग्रूपेण स्थितं न स्यात्। एवं भाषाया अपि तत्त्वं विद्यते।

वाचस्तुरीयभागस्य बाह्यशब्दस्य व्याख्यानपरायणं भाषाविज्ञानं त्रिविधं दृष्टिगोचरीभवति – 1. व्याख्यानात्मकम् 2. वर्णनात्मकम् 3. ऐतिहासिकञ्च। कस्य वर्णस्य किं स्थानमित्यादिप्रश्नानां समाधानं व्याख्यानात्मकभाषाविज्ञानेन, भाषाणां यत्तुलनात्मकमध्ययनं तद् वर्णात्मकेन भाषाविज्ञानेन, शब्दानां यद्वा भाषाणामितिहास: स ऐतिहासिकेन भाषाविज्ञानेन सम्पाद्यते। भाषाविज्ञानस्य एते ये त्रयो भागा वर्तन्ते, ते सर्वे प्रायेण पाणिनीयव्याकरणस्य प्रक्रियांशेऽन्तर्भूता:। यश्च पाणिनीयं व्याकरणं तस्य शाखाश्च नाधीतवान् स भाषाविज्ञानकुशलो नैव सम्भवति। भाषाविज्ञाने प्रतिपादितेन केनचित्तथ्येन संस्कृतव्याकरणस्य सामञ्जस्यं केनचिच्च तथ्येन विरोध:। तद्यथा उदात्तादिस्वरानुसारेण अर्थपरिवर्तनमङ्गीकुर्वन्ति पाणिनीयवैयाकरणा:।

तत्र संस्कृतभाषायां त्रय: स्वरा: - 1. उदात्त: 2. अनुदात्त: 3. स्वरित:। ताल्वादिषूर्ध्वभागेषु निष्पन्नस्य अच उदात्तस्वर:, ताल्वादिषु अधोभागे निष्पन्नस्य अचोऽनुदात्तस्वर:, उदात्तत्वानुदात्तत्वे वर्णधर्मौ यस्मिन् समाहितौ भवतस्तस्याच: स्वरितस्वर:। उदात्तादिस्वरानुसारेण अर्थपरिवर्तनं पाणिनीयव्याकरणस्य महाभाष्ये दृष्टिगोचरं भवति। तद्यथा [7]–

**दुष्ट: शब्द: स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।**

**स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्।।**

देवासुरसंग्रामे स्वरस्यापराधाद् महाननर्थः सञ्जातः। संस्कृतिरिक्तासु कासुचिद् भारोपीयभाषासु उदात्तादिस्वरानुसारेण अर्थः परिवर्तितः सञ्जातः। **चीनदेशे** एकस्यैव शब्दस्य उदात्तादिभेदेन अर्थो नितरां बेभिद्यते। तद्यथा – कवैई क्वोक-शब्दे इकारस्य उदात्तस्वरेण उच्चारणे सति दुष्टो देशः इत्यर्थोऽवगम्यते। तस्य च अनुदात्तस्वरेण समुच्चारणे तु विशिष्टो देशः इत्यर्थः पूर्वापेक्षया भिन्न एव जायते। एवम् **अफिरिकीभाषायामपि** एकस्यैव शब्दस्य उदात्तादिस्वरानुसारेण अर्था भेदं प्राप्नुवन्ति।

भाषावैज्ञानिकाः समुपलभ्यमानानां मूलस्वराणां संवृतादिभेदेन विभाजनं कृतवन्तः। ते यथा – 1. संवृतः 2. अर्धसंवृतः 3. अर्धविवृतः 4. विवृतः। एतेषां चतुर्णां संवृतादीनां भेदानुसारेण मूलस्वराणाञ्च मुख्यतया अष्टौ भेदान् ध्वनिविदः सम्पादयन्ति। ते यथा संवृतार्धसंवृतार्धविवृतविवृतभेदेन अग्रस्वराणां पश्चात् स्वराणाञ्च चत्वारो भेदा भवन्ति। अनयोश्चतुरश्चतुरो भेदान् सङ्कलय्य अष्टौ भेदाः संख्यायन्ते।

एवं ् व्यञ्जनानाञ्च प्रतिवेष्टितादिभेदेन वर्गं कृतवन्तः तद्यथा –1. स्पर्शः 2.. प्रतिवेष्टितः 3.. स्पर्शसङ्घर्षी 4.. अनुनासिकः 5.. पाश्विकः 6.. लुण्ठितः 7.. उत्क्षिप्तः 8. सङ्घर्षी 9.. अर्द्धस्वरः।

वस्तुतस्तु ऐतिहासिकभाषाविज्ञानविदामिदमनुसन्धानं संस्कृतव्याकरणदृशा अथ च प्रातिशाख्यकाराणां मतानुसारेण अविचारितरमणीयं दृष्टिपथं समायाति। ह्रस्वानामेकारादीनां लुण्ठितादिवर्णानाञ्च दोषग्रस्तत्वात् संस्कृतवाङ्मये वेदादौ तेषां प्रयोगो न दृष्टिगोचरीभवति। वैदिकयुगे लुण्ठितादिवर्णानामभावः सञ्जातः इत्येतावता वेदेषु तेषां समुपलब्धिर्न दृश्यत इति वक्तुं न युज्यते। महाभाष्यकारो भगवान् पतञ्जलिर्महाभाष्यस्य पस्पशाह्निके आकृत्युपदेशात् सिद्धमिति चेत् कृतवान्। तद्यथा –

संवृतः, कलाः, ध्मातः, एणीकृतः, अम्बूकृतः, अर्द्धकः, ग्रस्तः, निरस्तः, प्रगीतः, उपगीतः, क्ष्विण्णः, रोमश इति। ऋग्वेदप्रातिशाख्यस्य चतुर्दशपटले इतोऽप्यधिका वर्णदोषाः कथिताः। शब्दानां शुद्धोच्चारणे असामर्थ्यात् प्रमादाद्वा दोषग्रस्ता वर्णाः समुच्चार्यन्ते। पालिप्राकृतभाषयोः केरलान्ध्रतमिलकर्णाटकमहाराष्ट्रमध्योत्तरप्रदेशविहारवङ्गहिमाञ्चलारूणाञ्चल- प्रान्तीयभाषासु इतोऽतिरिक्तासु भारोपीयभाषासु अमेरिकनभाषासु च विद्यमाना ये वर्णाः संस्कृतभाषायां न समुपलभ्यन्ते ते दोष-ग्रस्ताः संवृतादिदोषग्रस्तत्वादेव ते वर्णाः संस्कृतभाषायां न समुपलभ्यन्ते। अस्मिन् विषये संस्कृतव्याकरणदृशा यत्समाधानं कृतं तद् भाषाविज्ञानविद्भिः शिरसा स्वीकरणीयम्। सत्यमिदं प्रतिभाति। दोषग्रस्ता दोषरहिताः सार्थका निरर्थका वर्णात्मका ध्वन्यात्मकाश्च सर्वे शब्दाः सूक्ष्मरूपेण स्वमूलस्वरूपे लीनाः। वक्तुर्विवक्षया च प्रादुर्भवन्ति।

इग्यणोर्वैज्ञानिकतां प्रतिपादयन्ति भाषाविज्ञानविदः। व्यञ्जनानां मध्ये कस्यचिदपि व्यञ्जनस्य स्वरात्मकं रूपं न दृष्टिगोचरीभवति। किन्तु ‘यवरल’ इति यणवर्णानां स्वरात्मकं रूपं दृश्यते। व्यञ्जनानामुच्चारणं स्वरं विना न भवति। व्यञ्जनानि च कदापि स्वररूपेण न दृश्यन्तेः किन्तु यकारादिवर्णचतुष्टयमेतदपवादभूतं विद्यते। एतेषां वर्णानां स्वरात्मकमपि स्वरूपं दृश्यते। यकारादिवर्णचतुष्टयस्य स्वरात्मकं स्वरूपं क्रमशः ‘इ, उ, ऋ, लृ’ इति स्वरचतुष्टयं विदितव्यम्। अत एव भगवान् पाणिनिः ‘इग्यणः सम्प्रसारणम्’ इति सूत्रेण यकारादिवान्तस्य





वर्णचतुष्टयस्य सम्प्रसारणं समादिष्टवान्। किञ्च न केवलमन्तस्थवर्णानां स्वरीभूतं स्वरूपम् ‘इ, उ, ऋ लृ’ इति वर्णचतुष्टयम्, अपि तु इकारादिस्वरचतुष्टयस्यापि व्यञ्जनीभूतं स्वरूपं यकारादयो विद्यन्ते। ‘सुदध्युपास्यः मध्वरिः धात्रंशः लाकृतिः’, इत्यादिषु इकारदीनामेव यकाराद्यादेशाः। ‘इयाज, उवाच’ इत्यादिषु च यकारदीनाम् इकाराद्यादेशा दृश्यन्ते। एवम् इग्यणोः परस्परमभेदो दृश्यते। केवलमुच्चारणदृष्ट्या तयोर्यत्किञ्चिद्भिन्नत्वं श्रोत्रेन्द्रियेण प्रतियते। यकारादिवर्णचतुष्टयस्य वैशिष्ट्यं प्रदर्शयता तेषां स्वरात्मकमेकं स्वरूपं प्रतिपादितम्।

भगवता पतञ्जलिना शब्दानां साधयता ‘स्थानिवदादेशोऽनल्विधौ’ (पा.सू.1.1.56) इति सूत्रस्य महाभाष्ये – ‘अनित्यत्वविज्ञानं तु तस्मादुपसंख्यानम्’ इति वार्तिकस्य व्याख्यावसरे-

अनित्यत्वविज्ञानं तु भवति, नित्याः शब्दाः नित्येषु नाम शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमनपायोपजनविकारिभिः। तत्र स एवायं विकृतश्च इत्येतन्नित्येषु नोपपद्यते। इति।

तदित्थं शाब्दिकानां मतानुसारेण शब्दानां नित्यत्वाद् भाषावैज्ञानिकानां विकासवादोऽपि बाधितः सुधी + उपास्य = सुदध्युपास्य इति शब्दद्वयं परस्परं पृथग् भिन्नञ्च वर्तते, न तु सुधी उपास्यः सुदध्युपास्यशब्दात्मना परिवर्तितः, उभयो रूपं भिन्नं भिन्नं वर्तते। सुधी उपास्य इत्यस्य उच्चारणप्रसङ्गे सुदध्युपास्य इत्युच्चारणीयम् । तच्च साधु। तथैव अपभ्रंशशब्दानां परिनिष्ठितानाञ्च संस्कृत-शब्दानां पृथक्-पृथक् सत्ता वर्तते, न तु संस्कृतशब्दा एव अपभ्रंशरूपेण यद्वा अपभ्रंशशब्दा एव संस्कृतशब्दरूपेण परिवर्तिताः। सर्वे साधवोऽसाधवश्च शब्दाः कुत्रचिद् ब्रह्माण्डे वर्तन्ते। शब्दानां नित्यत्वे स्वीकृते सति भाषान्तराणि आविर्भवन्ति। यथा राष्ट्रभाषा भारतीया हिन्दीभाषा। एषा भाषा पालिप्राकृतसंस्कृतापभ्रंशाङ्गलभाषीयशब्दानां परस्परं मिश्रणेन सम्पन्ना। एवमन्यासामपि भारतीयभाषाणां विश्वभाषाणाञ्च समभिव्यक्तिविषये विचारणीयम्। भाषान्तरीयशब्दानां परिवर्तनेन, विपरिणामेन वा भाषान्तरस्य न सृष्टिः, शब्दानां नित्यत्वात् तेषां विपरिणमनासम्भवात्।

किञ्च शब्दानित्यत्वपक्षेऽपि कापि भाषा कस्याश्चिद् भाषाया जननी सम्भवति। उच्चरितः शब्दः क्षणिकः तत्स्थानेऽन्यः क्षणिकः शब्दः समभिव्यक्तः। उच्चरितः कर्णशब्दः क्षणिकः प्रध्वस्तः, तस्मिन् प्रसङ्गेऽन्य अपभ्रंशः कानशब्दः अभिव्यक्तः, न तु कर्ण एव कानरूपेण परिवर्तितः, उच्चरितस्य प्रध्वंसित्वात्, तस्य परिवर्तनासम्भवात्। सुस्थिरस्यैव वस्तुनः परिवर्तनं सम्भवति। यथा स्थिरस्यैव मृत्पिण्डस्य घटरूपेण परिवर्तनम्, तथा शब्दो मृदादिवन्न सुस्थिरः। अस्यां स्थितौ शब्दानित्यत्वपक्षेऽपि न हि कस्यचित् शब्दस्य शब्दान्तरात्मना विपरिणयः। एवं शब्दानित्यत्वपक्षेऽपि न काचिद् भाषा अन्यां भाषां जनयति, किन्तु अस्मिन् पक्षे भाषान्तरीयशब्दानां क्षणिकत्वात् तत्स्थाने अन्या भाषा समभिव्यक्ता भवति। शब्दानामभिव्यक्तिपक्षे तेषामभिव्यक्तिरनित्य, वक्त्रोद्घाता विनश्यन्ति, न शब्दाः। शब्दनित्यवादिमतानुसारेण भाषाणां समभिव्यक्तिविषये विचारः कर्तव्यः।।

**सन्दर्भसङ्केतः –**

1. वाक्यपदीयम् - 01 / 01
2. तदैव - 01 / 44
3. तदैव - 01 / 31
4.. तदैव - 01 / 132
5. वाक्यपदीयम् - 02 / 30
6. तदैव - 02 / 125
7. महाभाष्यम् - (पशपशाह्निकम्)

**सन्दर्भग्रन्थसूची –**


1. शुक्लः, श्रीरामगोविन्दः (1990) **वाक्यपदीयम्** , चौ.सं.संस्थान, वाराणसी
2. डॉ.श्रीमति.सन्तोषमितलः(2006)**भाषाशिक्षणेनवाचार**:,नवचेतनापब्लिकेशन्स, जयपुर।
3. द्विवेदी, डॉ. कपिलदेवः (2010) **भाषा-विज्ञान एवं भाषाशास्त्र**, विश्वविद्यालयप्रकाशन, वराणसी।


XXXXXXXXXXXXXXXXXXXXXXX

## शाकटायनव्याकरणसूत्राणां पाणिनीयदृष्ट्यासमीक्षणम्

**राजीवसेठी**[30]

बहुषु प्राचीननव्यवैयाकरणेषु पाणिनिः सर्वातिशायीति सर्वे उररीकुर्वन्ति। महर्षिपाणिनिना अष्टाध्याय्यां नैके आचार्याः स्मृताः तेषु शाकटायनः अन्यतमः। संस्कृतव्याकरणपरम्परायां शाकटायननाम्ना द्वौ व्याकरणग्रन्थौ प्रसिद्धौ। एकः पाणिनिस्मृतोऽपरः पाणिन्युत्तरवर्ती। 'लङः शाकटायनस्य' तयोः प्रथम आर्षत्वेन, द्वितीयश्च अनार्षत्वेन जैन इत्यभिधीयते। महर्षिपाणिनिना स्वतन्त्रे शाकटायनस्य नाम वारत्रयं समुद्धृतवान्। 'लङः शाकटायनस्य' (3.4.111), 'व्योर्लघुप्रयत्नतरः शाकटायनस्य' (8.6.18), 'त्रिप्रभृतिषु शाकटायनस्य' (8.4.50)। शाकटायनः 'व्याकरणशास्त्रप्रवक्ता' (3100) इति मनुते महर्षिपतञ्जलिः। शाकटायनस्य कालस्तु 3100 विक्रमवर्षेभ्यः पूर्वमेव। अभिनवशाकटायनः पाणिनेरनन्तरं (900) नवमशताब्द्यां 'शाकटायन' इति नाम्ना कश्चन आचार्यो बभूव। यः

[30] शोधच्छात्रः ला.ब.शा.सं.विद्यापीठम्, नवदेहली





संस्कृतव्याकरणसाहित्ये 'पाल्यकीर्तिशाकटायनः' 'जैनशाकटायनः' 'अभिनवशाकटायनः' इत्यादिभिरुपाधिभिः प्रसिद्धिं प्रापयामास। वादिराजसूरिः पार्श्वनाथचरिते

कुतस्तया तस्य सा शक्तिः पाल्यकीर्त्तेर्महौजसः।
श्रीपदश्रवणं कुरुते यस्य शाब्दिकान् कुरुते जनान्।।[31]

पाणिनीयसूत्रप्रमाणेन सिध्यति यदस्य ग्रन्थकर्ता जैनपाल्यकीर्त्तिः। पाणिनिमुनेरनुसारं 'या धातोः', 'द्विष्' धातोश्च लङ्लकारे प्रथमपुरुषबहुवचने 'अयान्' 'अद्विषन्' इति रूपद्वयं सिद्धयति। 'लङः शाकटायनस्य' (3.4.111) इत्यनुसारेण शाकटायनमुनिना प्रोक्तमतं स्वीकृतम्। तन्मतेऽ अयुः, अद्विषुः इति रूपद्वयं सिध्यति। आहत्य अयान्, अयुः तथा अद्विषन्, अद्विषुः एतानि रूपाणि सिद्धानि।[32] पाणिनिपरवर्तिभिः सर्वैश्च वैयाकरणैः उपर्युक्तानां चतुर्णां रूपाणां सिद्धिः निर्दिष्टा यथा कातन्त्रे **'अन् उस् सिजभ्यस्त– विदादिभ्योऽभुवः'**[33], चान्द्रव्याकरणे **'लङोद्विषश्च वा'**[34], **'लङो वा'** जैनेन्द्रव्याकरणे[35], तथा शाकटायन– व्याकरणकर्त्रा पाल्यकीर्तिना तथैव विलिखतम् **'आद्द्विषो झेर्जुस् वा'**[36] अत्र अनेन 'वा' शब्दस्य प्रयोगः कृतः, यदि पाल्यकीर्तिशाकटायनः पाणिनिपूर्ववर्ती अभविष्यत् तदा सः 'आद्द्विषो झेर्जुस्' इत्थं सूत्रं व्यरचयिष्यत्, अत एव समुपलब्धस्य शाकटायन व्याकरणस्य कर्ता अभिनवशाकटायनः पाल्यकीर्तिरस्ति न तु प्राचीनशाकटायनः।

**उताः स्वः 1.1.2 – (शाकटायनव्याकरणम्)**

**भाव्योऽग् – 1.1.4 (शा. व्या.)**

अणुदित्सवर्णस्य चाप्रत्ययः 1.1.69 (पाणिनिव्याकरणम्)

**विशेषः** – उदित् सर्वणस्य ग्राहको भवति इत्यर्थोऽपि अणुदित्–सूत्रेण सिध्यति पाणिनीयतन्त्रे। एवमेव विधीयमानसवर्णान् न गृह्णाति इत्यर्थोऽपि अस्मादेव बृहत्सूत्रात् लभ्यते। किन्तु उदित् सवर्णस्य ग्राहको भवति, इत्यर्थपरतया **उताः स्वः** इति लघुभूतं सूत्रं प्रणीतम्, विधीयमानः सवर्णान् न गृह्णातीति इत्यर्थपरतया तु **भाव्योऽग्** इति लघुभूतं सूत्रं प्रणीतम्। विधीयमानः सवर्णान् गृह्णातीति अर्थः सिद्धः। एवञ्वच पाणिनिसूत्रसिद्धमर्थं लघुभूतेन सूत्रद्वयेन सङ्ग्रहीतवान् शाकटायनः। अपि च अत्र पक्षे अयमपि एको विशेषो वर्तते यत् प्रत्ययः शब्दस्य विधीयमानार्थकत्तवम् अप्रसिद्धञ्चेत्, कृत्रिमाकृत्रिमपरिभाषया कृत्रिमस्य प्रत्ययसंज्ञकस्य अणादेरेव ग्रहणञ्चेत् तदा भाव्यमानाभ्यामादेशमागमाभ्यां सवर्णग्रहणं न इत्यैतदर्थं भाव्यमानेन सवर्णानां ग्रहणन्न इति परिभाषापि पाणिनितन्त्रेऽङ्गीकर्त्तव्या। एवञ्च बृहत्सूत्रमङ्गीकृत्य पुनः

[31] वादिराजसूरि पार्श्वनाथचरितम् – 1/25
[32] लङः शाकटायनस्य, अष्टाध्यायी 3/4/111, द्विषश्च, अष्टाध्यायी 3/4/112
[33] कातन्त्रव्याकरणे (दुर्गसिंहवृत्ति) आ. प्र. 154
[34] चान्द्रव्याकरणे 1/4/43
[35] जैनेन्द्रव्याकरणे 2/4/91
[36] शाकटायनव्याकरणे 1/4/106

नूतनपरिभाषापि अङ्गीकर्त्तव्या। शाकटायनतन्त्रे तु **भाव्योऽग्** इति सूत्रेण विधेयः सर्वोऽपि यावदुपात्तः तावतः ग्राहकः इत्युक्त्वात् न कोऽपि दोषः। अपि च अण् इति सवर्णान् गृह्णातीति वचनाभावाद्। तपरः योऽणः सः केवलं तत्कालस्यैव ग्राहक इति नियमस्यापि आवश्यकता नास्ति।

**स्वः स्थानास्यैक्ये 1.1.6 (शा.व्या.)**

**तुल्यास्यप्रयत्नं सवर्णम् 1.9.9 (पा.व्या.)**

**विशेषः** – यद्यपि उभयोस्सूत्रयोः समानार्थकत्वं तथाप्यत्र शाकटायनसूत्रे बहुलाघवमनुभूयते तथाहि सवर्णमिति बृहत्संज्ञास्थाने ''स्व'' इति लघुभूतसंज्ञाकृता। तुल्यास्यप्रयत्नमित्यर्थपरतया स्थानास्यैक्ये इति शब्दः प्रयुक्तः। पाणिनिसूत्रे **''तुल्यास्यप्रयत्नं''** इति शब्दस्य बहुविग्रहो वक्तव्यः। अत्र तु विग्रहवाक्ये क्लेशो नास्ति। अपि च पाणिनिसूत्रे ''आस्य'' शब्देन स्थानं विवक्षितम्। तस्मात् ''आस्य'' शब्देन मुखग्रहणवारणाय आस्ये भवम् आस्य इति विग्रहः आपतितः। अत्र आस्य शब्देन आस्ये भवमिति विग्रहेन प्रयत्नो विवक्षितः। एवञ्च यद्यपि सूत्रार्थयोः भेदो नास्ति तथापि सूत्रस्वरूपे अनेन लाघवं सम्पादितमिति वर्तते।

**दाधाध्वब् 1/1/13 शा. व्या.**

**दाधाध्वदाप् 1/1/10 पा. व्या.**

**विशेषः** – पाणिनीयतन्त्रे दाप्दैपोः घुसंज्ञावारणाय ''अदाप्'' इति पर्युदासः कृतः। अत्र तु **''दाधाध्वब्''** इति सूत्रन्यासेन उक्तोऽर्थ साधितः। तथाहि अत्र न्यासे अप् इति न बकारः। अपितु पकारस्यैव जश्त्वेन निर्देशः। अतः अप् इत्यस्य न विद्यते पकारः अनुबन्धत्वेन यस्य सः इति विग्रहमाश्रित्य पकारानुबन्धरहितः इत्यर्थो लभ्यते। तेन दाप्दैतोः दारुपत्वेऽपि पकारानुबन्धत्वात् घुसंज्ञा न भवति। एवञ्च यद्यपि सूत्रस्वरूपे महल्लाघवन्न प्रदर्शितं। तथापि ''घ्वदाप्'' इत्यस्य स्थाने ''घ्वप्'' इति न्यासः ईषद् वा लाघवं सम्पादत्येव।

**घ्यसख्यद्वन्द्वपतीदुत् 1.1.40 (शा. व्या.)**

**शेषोघ्यसखि 1.4.7 (पा.व्या.)**

**विशेषः** – पाणिनितन्त्रे ह्रस्वे इवर्णोवर्णान्तयोः नदीसंज्ञार्थम् **''यूस्त्राख्यौ नदी''** इत्यस्मात् सूत्रात् ''ह्रस्वश्च इति पदमनुवर्तनीयम्''। अन्यथा यूस्त्राख्याविति सूत्रे यू इति पदेन दीर्घयोः ग्रहणात् अत्रापि दीर्घाविव इत्येव गृह्येयाताम्, अतः क्लेशोऽयं सोढव्यः। अपि च सखिभिन्नस्य इवर्णान्तस्य घिसंज्ञा इत्युक्ते पतिशब्दे घिसंज्ञा प्राप्नुयादिति, तस्या संज्ञा वारणीया किन्तु तस्यैव पतिशब्दस्य समासे तु घिसंज्ञा इष्टा। तस्मात् व्यासे संज्ञा वारणीया, समासे तु संज्ञा संग्राह्या इति ''पतिः समास एव'' इति बृहत्पृथक्सूत्रमारम्भणीयम्। प्रकृततन्त्रे तु अनुवृत्त्यपेक्षां विना संशयञ्च विना इदुत् इति साक्षात् ह्रस्वयोरेव निर्देशः कृतः। अपि च एकसंज्ञाधिकारादेव सिद्धे ''शेष'' ग्रहणमिति स्पष्टार्थम्, स्पष्टं कौमुद्याम्, प्रकृते अनावश्यकं ''शेषं'' ग्रहणन्न कृतम् इत्यापि लाघवम् अपि च पति शब्दस्य व्यासे संज्ञावारणाय समासे संग्रहाय च





अनेन अद्वन्द्वपति सूत्रे निर्देशः कृतः। तेन द्वन्द्वानवयवस्य केवलपतिशब्दस्य संज्ञा नास्तीति सिद्धं द्वन्द्वावयवस्य संज्ञा तत्प्रयुक्तं कार्यं पूर्वनिपातः पतिसुतौ इत्यादिषु सिध्यति। ननु तन्त्रेऽस्मिन् भूपतिः इत्यादि समासघटकपतिशब्दस्यापि द्वन्द्वानवयवत्वात्, संज्ञा न स्यादिति वाच्यम्। यतोहि असखि इत्युक्तेऽपि सुसखि इत्यादि समुदायस्य सखिरुपत्वभावात् निषेधात्प्रवृत्तेः घिसंज्ञात्वात् पाणिनीयतन्त्रेऽपि इष्टमेव तद्वदत्रापि केवलपतिशब्दस्य निषेधः। भूपतिः इति समुदायस्य तु पतिरुपत्वाभावात् नास्ति निषेधः इति ग्रन्थकृतः आशयः स्यात्। एवञ्चानावश्यकानि पदानि विहाय सूत्रान्तरोक्तञ्चार्थं संगृह्यैकसूत्रेणाभीष्टं सम्पादितमिति महल्लाघवं वर्ततेऽत्र।

**मिदचोऽन्त्यात् 1.1.45 (शा.व्या.)**

**मिदचोऽन्त्यात्परः 1.1.47 (पा.व्या.)**

**विशेषः** – पाणिनितन्त्रे अनेकालादेशः सर्वादेशो भवति। एवञ्च अनङ् प्रभृतयोऽपि अनेकाल्त्वात् सर्वादेशाः भवेयुः। अतः तद्वारणाय ''अनेकाल'' इति सूत्रबाधकतया **ङिच्च** इत्यपरं सूत्रमारम्भरणीम् इत्यापतितम्। प्रकृततन्त्रे तु **ङिच्च** इति सूत्रार्थसंगृह्य **शिदङिदल** इति न्यासः कृतः। अत्रैव सूत्रे ङिदादेशस्य तस्य सर्वादेशस्य प्राप्तिरेव नेति बाध्यबाधकभावादिविचारक्लेशः एव नास्ति इति लाघवम्।

**टिदादिः 1.1.53 (शा.व्या.)**

**किदन्तः 1.1.54 (शा. व्या.)**

**आद्यन्तौ टकितौ 1.1.46 (पा.व्या.)**

**विशेषः** – पाणिनियतन्त्रे **आद्यन्तौ टकितौ** इति सूत्रं प्रणयनात् कः आगमः आद्यवयवो भवति, कः अन्तावयवो भवति इति संशये तत्परिहाराय यथासंख्यानियमः आश्रणीयः। तथा सति एकस्य एकत्र अन्वयात् अन्यस्य अन्यत्र अन्वयात्, साहित्याभावात् द्वन्द्वसमासो नोपपद्यते, इत्याक्षेपः उदेति। अतः प्रथमं साहित्यावच्छिन्नस्यय साहित्यावच्छिन्नेऽन्वय इति समाससमुपाद्य अनन्तरं यथासंख्यसूत्रसमारम्भसामर्थ्यात् प्रत्येकमन्वयः स्वीकर्त्तव्यः। एवञ्च बहुक्लिष्टकल्पनया दोषः परिहार्योऽस्ति। अस्मिन् तन्त्रे तु टिदादिः किदन्तः इति पृथक् पृथक् सूत्रारम्भात् समासोपपादन क्लेशः यथासंख्यसूत्रारम्भसामर्थ्याश्रयणादिक्लेशस्तु नास्ति। प्रत्युत सूत्रं विभक्तिं तथापि मात्रा गौरवन्तु नास्ति इति लाघवमपि वर्तते।

**तस्मादादेः 1.1.48 (शा.व्या.)**

**तस्मादित्युत्तरस्य 1.1.67 (पा.व्या.)**

**विशेषः** – पाणिनितन्त्रे पञ्चमीनिर्देशनक्रियमाणं कार्यं परस्पर भवतीति बोधार्थम्। ''तस्मादित्युतरस्य'' इति सूत्रं प्रणीतम्। एवं परस्य यत्कार्यं विहितं तत्तस्यादेः बोध्यमिति बोधयितुं ''आदेः परस्य'' इति पृथक सूत्रं प्रणीतम्। अत्र तावत् सूत्रद्वयार्थमपि संगृह्य एकं सूत्रं प्रणीतं **तस्मादादेः** इति। तस्मिन् सूत्रे **''षष्ठ्याः स्थानेन्तेऽल''** (1.1.47) इति सूत्रात् षष्ठ्याः इति सूत्रात् षष्ठयाः इति पदमनुवर्तते। एवञ्च पञ्चमीविशिष्टस्य षष्ठ्यन्तार्थस्य परस्य विधीयमानविधिः आदेरलः स्थाने

भवति इति सूत्रार्थः लघुनैव न्यासेन सिध्यति अपि च तन्त्रेऽस्मिन् अयं महान् विशेषः यत् पाणिनितन्त्रेऽपि "**तस्मादित्युत्तरस्यादेः**" इति एकेनैव सूत्रेण सूत्रद्वयार्थः संगृहीतुं शक्यते। तथापि तत्र किमर्थं तथा न कृतमिति चेत् **अनेकाल्शित्सर्वस्य** इति सूत्रेण **आदेः परस्य** इति सूत्रस्य "**अष्टाभ्य औश्**" इत्यादौ बाधः इष्यते। यदि "**तस्मादित्युत्तरस्यादेः**" इति एकं सूत्रं क्रियते। तदा "**अनेकाल्शित्सर्वस्य**" इति सूत्रापेक्षया आदेरित्यंशस्य परत्वेन आदेरित्यंशः एव "**अनेकाल्शित्सर्वस्य**" इति सूत्रं बाधते। तस्मात् तत्र पृथक् पृथक् सूत्रं प्रणीतम्। अत्र तु सूत्रद्वयं एकीकृत्यापि "**अनेकाल्शित्सर्वस्य**" इति समानार्थक "**शिदङि्दल्**" (1.1.49) इति सूत्रापेक्षया पूर्वमेव पठितम् "**अनेकाल्शित्सर्वस्य**" (1.1.48) इत्स्यैव बाधकत्वं सिद्धम्। सूत्रस्वरूपेऽपि लाघवं सम्पन्नमिति।

**उपसंहारः**

शाकटायानव्याकरणं पूर्णतयासरलतास्पष्टतादृष्ट्या एकं महत्वपूर्णं शब्दानुशानसनमस्ति। शाकटायनव्याकरणस्य रचनोद्देश्यं सहजरूपेण व्याकरणपाठनम्। बहुत्रानेन पाणिनितन्त्रापेक्षया लाघवे सम्पादितेऽपि सूत्रस्वरूपविषये वा अनुवृत्यादिविषये वा दोषपरिहारोपायविषये वा सर्वत्र पाणिनितन्त्रमुपजीव्यैव कृतमिति नूतनात्वाभावाद् प्रसिद्धिं न गतमिति भाति। शाकटायानव्याकरणस्य चिन्तामणिवृत्तौ यक्षवर्मणा अस्य शब्दानुशासनस्य सर्वाङ्गीणता प्रकटीकृता। इष्टिर्नेष्टा न वक्तव्यं सूत्रतः पृथक्।

**संख्यातं नोपसंख्यातं यस्य शब्दानुशासने।**
**इन्द्रचन्द्रादिभिः शाब्दैर्यदुक्तं शब्दलक्षणं,**
**तदिहास्ति समस्तं च यन्नेहास्ति न तत् क्वचित्।।**

**सन्दर्भग्रन्थ–सूची**

1. जिज्ञासु पं0 ब्रह्मदत्तः, अष्टाध्यायीप्रथमावृत्ति, प्यारेलालकपूरट्रस्ट, अमृतसर–1965
2. उपाध्यायबलदेव, संस्कृत शास्त्रों का इतिहास, शारदामन्दिरम् वाराणसी
3. चान्द्रव्याकरणम्, चन्द्रगोमिन्, सम्पा0 क्षितीषचन्द्रचटर्जी, पूना
4. जैनेन्द्रव्याकरणम्, आचार्यभयचन्द्र, भारतीयज्ञानपीठप्रकाशनम् काशी, 1971
5. महाभाष्यम्, पतञ्जलि, चौखम्भासंस्कृत प्रतिष्ठान, देहली
6. व्याकरणसिद्धान्त कौमुदी, पाण्डेय गोपालदत्त, चौखम्भासंस्कृत प्रतिष्ठान, देहली
7. शाकटायनव्याकरणम्, शाकटायन, अमोघावृत्तिसहितम्, भारतीयज्ञानपीठप्रकाशनम् काशी, 1971
8. जैनाचार्यो का संस्कृत व्याकरण में योगदान, डॉ. प्रभाकुमारी, निर्माण प्रकाशन, दिल्ली

# विवेकचूडामणौ दार्शनिकतत्त्वविश्लेषणम्





**दयानन्दपाणिग्राही**[३७]

भारतीयानां प्रतिष्ठाहेतुषु दर्शनप्रस्थानमन्यतम्। वेदशास्त्रनिर्मथितमध्यात्मनवनीतरूपं भवति दर्शनशास्त्रम्। सत्यानुसन्धानं दर्शनशास्त्रस्य मुख्यमुद्देश्यम्। परमपुरूषार्थप्राप्तिः दर्शनशास्त्रस्य मुख्यं लक्ष्यं भवति। मोक्षैक्यगम्यमिदं दर्शनशास्त्रं बहुविधं भवति। एतच्च प्रस्थानद्वयेन विभक्तं सत् वैदिकमवैदिकमिति नामभ्यां ख्यातम्। वैदिकप्रस्थानं षड् विधम् अस्ति । एतदेव आस्तिकदर्शनमित्युच्यते। षड् आस्तिकदर्शनेषु वेदान्तदर्शनं परमतत्त्वप्रतिपादनेन मूर्धन्यं स्थानमावहति। तत्र च अद्वैतवादः विशिष्यते। अद्वैतवेदान्तदर्शनस्य मुख्यं प्रतिपाद्यं जीवब्रह्मैक्यं भवति। शोकनिवृत्तिः परमानन्दप्राप्तिश्च दर्शनस्यास्य प्रमुखं प्रयोजनम्।

अद्वैतवेदान्तस्य सुमहतीप्रतिष्ठायां हेतुः आचार्यः शङ्करः एव। आविश्वम् आचारर्यशङ्करेण अद्वैतवादस्य प्रतिष्ठा कृता। तादृशस्य पुण्यश्लोकस्य आचार्यशङ्करस्य कृतिषु विवेकचूडामणि नाम प्रकरणग्रन्थः किमपि विशिष्टस्थानं विधत्ते। सोऽयं ग्रन्थः ५८३पद्यैः उपनिबद्धःअचार्यैः। अत्यन्तगम्भीरस्य आत्मतत्त्वस्य सरलावगाहनाय नितान्तमुपकरोति अयं विवेकस्य चूडामणिरूपो ग्रन्थः। आत्मैक्यतत्त्वाभ्युपगमार्थं ग्रन्थेऽस्मिन् दार्शनिकतत्त्वानां विश्लेषणं कृतं वर्तते। तदत्र स्थालीपुलाकन्यायेन किञ्चिदेव उपस्थाप्यते।

अद्वैतवेदान्तदर्शनस्य सारसंग्रहात्मकं पद्यम् अचार्यः एवमामनति-

**वेदान्तसिद्धान्तनिरुक्तिरेषा ब्रह्मैव जीवः सकलं जगच्च**
**अखण्डरूपस्थितिरेव मोक्षः ब्रह्माद्वितीयं श्रुतयः प्रमाणम्। इति।**

श्रुतिसारतत्त्वप्रतिपादनेन अद्वैतवेदान्तदर्शनमत्यन्तं महत्वपूर्णमस्ति। तत्र उपनिषद् ऋषयः कथयन्ति – सर्वं खल्विदं ब्रह्म , तत्वमसि, ब्रह्मैवेदं विश्वम्, एकमेवाद्वितीयम् इति। एतदेव तत्त्वमाविष्करोति आचार्यशङ्करः वेदान्त सिद्धान्त निरुक्तिरेषा इत्यादीना। वेदान्तसिद्धान्तस्य सारभूतमिदमेववचनं भवति यत् जीवः ब्रह्मैव, परिदृश्यमानविश्वमिदं ब्रह्मणः एवरूपम्, आत्मनः अविद्याग्रन्थिनिर्मुक्तिपुरःसरम् अखण्डास्थितिः एव मोक्षः, एकमेवाद्वितीयं तत् ब्रह्म अस्ति,ब्रह्मणः अद्वितीयत्वे श्रुतयः एवप्रमाणमिति। एतदेव वेदान्तसिद्धान्तस्य सारभूतं वचनमिति अचार्यशङ्करस्य भणितिः।

परमपुरूषार्थं प्रति प्रतिबन्धकं भवति अज्ञानम्। तदेव सर्वानर्थमूलं भवति।वैदिकदर्शनप्रस्थाने सर्वैः अपि दार्शनिकैःदुःखम्, अहङ्कारः, अज्ञानम्, अव्यक्तम्, अविद्या, माया, संसारश्च मोक्षप्रतिबन्धकहेतुत्वेन स्वीकृतःअस्ति। एतेषां परस्परं केवलं वाचनिकं भेदो तत्त्वतः न कोऽपि एतेषु भेदः अवलोक्यते। तत्र अहङ्कारः सांख्यानुसारं प्रकृत्याः कार्यं तदेव बुद्धितत्त्वमिति सांख्यदर्शने ख्यातमस्ति। वेदान्तदर्शने तस्यैव बुद्धितत्त्वस्य अन्तःकरणमिति नामान्तरं भवति। न्यायदर्शने मनः इति कथितं भवति। योगदर्शने चित्तमिति उच्यते। नित्यशुद्धस्वभावस्य आत्मनः अहङ्कारतत्त्वसंसर्गात् संसारीत्वम्। अविद्याकार्यस्य अहङ्कारस्य स्वरूपं विवेकचूडामणिग्रन्थे एवं वर्णितम् –

[37] वेदान्तविभागाध्यापकः, रा.सं.संस्थानम्, पुरी

**अहङ्कारः सः विज्ञेयः कर्ताभोक्ताभिमान्ययम्।**
**सत्तादि गुणयोगेनावस्थात्रितयमश्नुते ।।(वि.चू.१०६)**

चित्प्रतिबिम्वविशिष्टमन्त:करणमेव चक्षुरादौ शरीरे च अहमित्यभिमानेन विद्यमानमहङ्कार इति। अहङ्कारयुक्त: जीव: एव कर्ता भोक्ता च भवति। सत्वरजस्तमोरूपा: त्रयगुणा: प्रकृते: कार्यं भवति। सत्वादिगुणकारणत: तस्य एव जीवस्य अवस्थात्रयं सम्भवति। एवञ्च सत्वगुणयोगेन स्वप्नम्, रजगुणयोगेन जाग्रत्, तमोगुणयोगेन सुषुप्त्यादि च अवस्थां प्राप्नोति जीव:। गुणानामुत्कर्षापकर्षयोगेन जीवे विक्रिया: परिलक्ष्यन्ते।

परिदृश्यमानमिदं जगत् सच्चिदानन्दस्वरूपे ब्रह्मण्यध्यस्तमित्यत: जीवेनानुभूयमानं सुखं तद्धेतुकं भवति। ब्रह्मण: रूपत्रयं भवति। तत्र प्रथममस्ति, द्वितीयं भाति, तृतीयं प्रियमिति। जगदिदमध्यस्तत्वात् जगदस्ति, घट: भाति, इदं मेऽभीष्टमित्यादि व्यवहार: जीवस्य सम्भवति। संसारदशायां जीवेनानुभूयमानानां सुखदु:खानां प्रतीति: विषयाणमानुकूल्यप्रातिकूल्येन च भवति। एतदेव उक्तमाचार्येण –

**विषयाणामानुकूल्ये सुखी-दु:खी विपर्यये**
**सुखं दु:खं च तद्धर्मः सदानन्दस्य नात्मनः।।इति।।(वि.चू.१०७)**

एवञ्च सुखदु:खादय: अविद्याकार्यस्य अन्त:करणस्य भवति। विषयाणमानुकूल्ये सुखानुभूति:, तत्प्रातिकूल्ये च दु:खानुभूति: इति ।

सकलं जगत् माया विजृम्भितमिति। मायाकारणत: एव जीव: स्वयं स्वस्वरूपं ज्ञातुं न प्रभवति। दर्शनशास्त्रे मायातत्त्वमत्यन्तं गहनं सर्वविभ्रमकारकं भवति। तादृशस्य मायातत्त्वस्य स्वरूपं विवेकचूडामणिग्रन्थे एवं वर्णयति आचार्य: -

**अव्यक्तनाम्नी परमेशशक्तिः अनाद्यविद्या त्रिगुणात्मिका परा**
**कार्यानुमेया सुधीयैव माया यया जगत् सर्वमिदं प्रसूयते** ।। इति।

मायातत्त्वं मोक्षस्य प्रतिबन्धकं भवति। एतच्च अत्यन्तं विलक्षणमस्ति। साक्षाात् यस्मान्माया नोपलभ्यते तस्मात् तदव्यक्तमिति कथ्यते। एतत् मायातत्त्वं सत्व-रज-तमोगुणात्मकं भवति। एतत् स्वरूपं कार्यद्वारा अवगतं भवति। परमेश्वरस्य ब्रह्मण: अनन्यशक्तिरूपमिदं मायातत्त्वम्। एतस्यापराभिधानमविद्या भवति। एतस्या आदित्वं नास्ति। अत: इयम् अनादि इति। अनया मायाशक्त्या परिदृश्यमानस्य जगत: उत्पत्तिर्भवति इति। एतत् मायातत्त्वं सत्वासत्वाभ्यां विलक्षणमनीर्वचनीयमस्ति। यस्मात् बाध्यते तस्मात् माया न सद्रूपा, यस्मात् प्रतीयते तस्मात् नात्यन्तमसत् अर्थात् सद्रूपा इति । एवमुभय सत्वासत्वधर्मविलक्षणात् माया अनीर्वचनीया अस्ति। एतदेवोक्तमाचार्येण –

**सन्नाप्यसन्नाप्युभयात्मिकानो भिन्नाप्यभिन्नाप्युभयात्मिकानो**
**सङ्गाप्यनङ्गाप्युभयात्मिकानो महाद्भुताऽनिर्वचनीयरूपा ।(वि.चू.१११)**

इति ।

Note- Printout of this paper can be accepted along with CERTIFICATE OF APPRECIATION only for official use.



विवेकचूडामणिग्रन्थे अद्वैतमतसम्मतस्य साक्षितत्त्वस्यापि वर्णनं नितरां रमणीयमस्ति। तत्र साक्षि नाम – उदासनत्वे सति द्रष्टृत्वमिति। साक्षिस्वरूपं वर्णयता उक्तमाचार्येण-

**प्रकृति-विकृतिर्भिन्नः शुद्धबोधस्वभावः**
**सदसदिदमशेषं भासयन्निर्विशेषः।**
**विलसतिपरमात्मा जाग्रदादिष्ववस्था-**
**स्वहमहमिति साक्षात्साक्षिरूपेण बुद्धेः। (वि.चू.१३७)**

बन्धहेतु: मन:-

**नह्यस्त्यविद्या मनसोतिरिक्ता**
**मनोह्यविद्या भवबन्धहेतुः।**
**तस्मिन्विनष्टे सकलं विनष्टं**
**विजृम्भितेऽस्मिन् सकलं विजृम्भते।(वि.चू.१७१)**

एवंसकलं तत्त्वं परिपूर्णं भवति विवेकचूडामणिग्रन्थरत्नम्। एतस्याध्ययनेन विवेचनेन समीक्षणेन आलोचनेन च सम्यग् रूपेण वेदान्ततत्त्वानामर्थं ज्ञातुं शक्यते।


सन्दर्भग्रन्थसूची-

विवेकचूडामणि:–गीताप्रस्,गोरखपुरम्,
प्रकरणाष्टकम्(शङ्कराचार्यकृतम्)–चौखम्बाविद्याभवनम्,वाराणसी
वेदान्तपरिभाषा– चौखम्बा विद्याभवनम्,वाराणसी,
वेदान्तसार:(सदानन्दमुनिकृत:)– चौखम्बा विद्याभवनम्,वाराणसी।
ब्रह्मसूत्रम्– चौखम्बा विद्याभवनम्,वाराणसी,


XXXXXXXXXXXXXXXXXXXXX

# भारतीयदर्शने सांख्याचार्यः कपिलः

**अशोककुमारमीना**[३८]

प्राय: सर्वे प्राणिनो जीवनरक्षणार्थ प्रयासं कुर्वन्ति । पशूनां जीवनं प्राय: निरुद्देश्यं भवति, कारणं वर्तते यत् ते विवेकशून्या: भवन्ति । किन्तु मनुष्य: विवेकशील: प्राणी अस्ति । स: स्वस्य संसारस्य च यथार्थज्ञानं प्राप्त्यर्थं जीवनयापनं करोति । अत एव, जिज्ञासुना, दु:खसंतप्तेन तथा च चिरविश्रान्त्या उच्छुकेन मानवेन दर्शनस्य आविर्भाव: जात: । अत एव दर्शनस्य चरमलक्ष्यं मोक्षो भवति । मनुस्मृतौ भगवता: मनुना कथितम् -

[38] सांख्ययोगविभागाध्यक्ष:, रा.सं.संस्थानम्, पुरी

Note- Printout of this paper can be accepted along with CERTIFICATE OF APPRECIATION only for official use.

‘‘सम्यक दर्शनसम्पन्न: कर्यभिर्न निबद्धते ।
दर्शनेन विहीनस्तु संसारं प्रतिपाद्यते ।। मनुसंहिता ६।६४।।

सर्वेषां प्राचीनार्वाचीनां नास्तिकास्तिकानां भारतीयानां दार्शनिक विचारा: एव भारतीयदर्शनं कथ्यते । कतिपयमनुष्या: वेदमूलकं भारतीयदर्शनं हिन्दूदर्शनस्य पर्यायं मन्यन्ते । किन्तु सर्वदर्शन संङ्ग्रहकारेण माधवचार्येण वेदविरोधिनां चार्वाक-जैन-बौद्धदर्शनानां भारतीयदर्शने स्थानं दत्वा भारतीयदर्शनस्य व्यापकत्वं प्रातिपादितम् । प्राचीनमतानुसारं भारतीयदर्शनस्य भागद्वयम् अस्ति-आस्तिक: नास्तिकश्च ।

आस्तिकदर्शनानि षडवर्तन्ते - मीमांसादर्शनं वेदान्तदर्शनं सांख्यदशर्णनं योगदर्शनं न्यायदर्शनं वैशेषिकदर्शनं च । नास्तिकदर्शने चावार्कजैनबौद्धदर्शनानि वर्तन्ते । अत्र नास्तिक दर्शनस्य तात्पर्य वर्तते वेद विरोधिदर्शनम् - ‘‘नास्तिको वेदनिन्दक: ।’’

**सांख्यदर्शनम् -** सांख्यदर्शनं द्वैतवादिदर्शनं वर्तते । सांख्यदर्शने द्वे तत्वे मन्यतेप्रकृति: पुरुषश्च । सांख्यदर्शनस्य प्रर्वतको महर्षिकपिल: आसीत् । सांख्यदर्शने ईश्वरस्य अस्तित्वं प्रतिपादितं नास्ति । अत एव सांख्यदर्शनस्य अत एव सांख्यदर्शनस्य अन्यन्नाम निरीश्वरसांख्यमपि वर्तते ।

सांख्यदर्शनम् अत्यन्तप्राचीनं दर्शनम् अस्ति । भारतीय दार्शनिकवाङ्मये सांख्यदर्शनस्य प्राचीनत्वं निर्विवादं स्वीकृतम् ।

उक्तम् - ‘‘भारतीयदार्शनिकमनीषिण: सार सांख्ये एव निहित:’’ । मन्यते यत् प्राचीनकाले सांख्यमेव सकलं दर्शनम् आसीत् तथा च दृष्टिभेदात्प्रस्तानभेदानुसारेण अन्य दर्शनानां उत्पतिर्जाता । श्वेताश्वतरोषनिषदि (६।१३) सर्वप्रथमं सांख्यशब्द: प्रयुक्त: । ‘सांख्य’ शब्दस्य निष्पति: संख्याशब्दात् अण् प्रत्ययोगात् भवतितथा च सम् उपसर्गपूर्वकं ख्यान्-धातो: चक्षिङ-प्रत्यययोगेन ‘संख्या’ शब्द: निर्मित: । यस्य अर्थो भवति - सम्यक् ख्याति: ज्ञानं वा । महाभारते उक्तम् -

सांख्यदर्शनसम्मता सम्यक् ख्याति: वर्तते - चेतनपुरुषस्य अचेनप्रकृते: पृथकज्ञानम् । सांख्याचार्ये: सम्यक् ख्याति इत्ययस्य कृते ‘सत्वपुरुषान्यताख्याति:’ ‘विवेकख्याति:’ इत्यादीनि नामानि अभिहितानि ।

सांख्यदर्शनं भारतवर्षस्य दर्शनेषु तथा च अन्येषु शास्त्रेषु मुकुटरुपेण शोभायमानम् अस्ति । अथर्ववेदे तथा च कठ-प्रश्न-श्वेताश्वतर-मैत्रायणि उपनिषत्सु सांख्यदर्शनस्यपरिभाषा मिलति । भारतीय परम्परायां - ज्ञानं च लोके यदिहास्ति कञ्चित् । संख्यागतं तच्च मतं महात्मन ।। इत्यस्य महाभारतस्य वचनानुसारं अस्य दर्शनस्य शीर्षस्यस्थानं वर्तते ।

यद्यपि सांख्यदर्शनस्य आचार्याणां प्रामाणिकसूची उपलब्धा नास्ति तथापि प्रसिद्धाचार्याणां मतौ सांख्यसूत्रां महर्षिकपितस्य एव मन्यते । भारतीय परम्परायां महर्षिकपिल: आदिविद्वान तथा च सांख्यदर्शनस्य प्रवर्त्तक: मन्यते । प्राचीन दार्शनिकसाहित्येषु कपिलस्य अनेकश: उल्लेखो वर्तते । ऐतिहासिकद्वष्ट्या श्वेताश्वेतरोषपिषदि सर्वप्रथमं कपिलस्य उल्लेख: कृत: -





‘‘ऋषि प्रसूतं कपिलं यस्तमग्रे ज्ञाने विभर्ति जायमानं च पश्येत् ।’’ (४/२)

भगवद्गीतायांकृष्ण: स्वयं कथयति -

‘‘अश्वत्थ: सर्ववृक्षाणां देवर्षीणां च नारद: ।
गन्धर्वाणां चितरथ: सिद्धानां कपिलो मुनि: ।।’’ (१०/२६)

महाभारतेऽपि (१२/३३९/६८) तथा च (१२/३४९/६५) सांख्यप्रवर्तकस्य कपिलस्य उल्लेखो वर्तते । विष्णुपुराणे (२/२४/९) भागवतपुराणे (१/३) तथा गरुडपुराणे (२/१/२८) अपि कपिल: विष्णो: अवतारो मन्यते । महर्षिकपिल: सांख्यदर्शनस्य उपदेशं आसुरये दत्तवान् । अस्य प्रमाणं कृतम् । कपिलस्य उल्लेख: अन्येषु प्राचीनेषु साहित्येषु अपि मिलति । यथा - प्रह्लादपुत्र:

असुर-कपिल: (वैधायनधर्मसूत्र २।६।३०) धर्मसूत्रकार: कपिल: (कपिलस्मृति:) उपपुराणकार: कपिल: (कपिलस्मृति:) तथा च विश्वामित्रपुत्र: कपिल: (कूर्मपुराणं १।१९) परञ्च एतेषु कोऽपि सांख्यशास्त्रस्य प्रर्वतको नास्ति । केवलं कर्दम् - देवहूते: पुत्र: कपिल: एव सांख्यशास्त्रस्य प्रर्वत्तको वर्तते । एतिहासिकविचारकानां मतानुसारेण सांख्यपद्धते: विचारस्य आरम्भ: नवम् शताब्द्यां मन्यन्ते । आचार्यईश्वरकृष्ण: सांख्यकारिकाया: अन्ते अस्य शास्त्रस्य परम्पराया: निर्धारणं कृतवान् -

‘‘पुरुषार्थज्ञानमिदं गुह्यं परमर्षिणा समारप्यातम् ।
स्थित्युत्पत्ति प्रलयाभिश्चन्त्यन्ते यत्र भूतानाम् ।।
एतत् पवित्रग्रयं मुनिरासुरयेऽनुकम्पया प्रददौ ।
आसुरिरपि पञ्चशिखाय तेन च बहुधा कृतं तन्त्रम् ।।
शिष्यपरम्परयागतमीश्वरकृष्णेन चैतदार्याभि: ।
संक्षिप्तमार्यमतिन सम्यग् विज्ञाय सिद्धान्तम् ।।’’

महर्षिकपिलप्रणीतं सांख्यसूत्रं आर्वाचीनरचना नास्ति । यद्यपि माधवाचार्य: सर्वदर्शनसंग्रहे अस्या: रचनाया: उल्लेखं कृतवान् तथापि तस्य समकालिक: माधवमंगिमहोदय सूतसंहितायां सांख्यसूत्रस्य सूत्राणाम् उल्लेखं कृतवान् । अत एव सांख्यसूत्रस्य प्राचीनता स्वयं प्रमाणिता ।

मन्यते यत् भागवतकाले एव सांख्यम् ‘‘कालार्क भक्षितम्’’ जातम् अत एव सांख्यशास्त्रस्य पुनरुद्धारार्ध महर्षिकपिल: तत्वसमूहस्य सम्यक् निर्णयं कृतवान् । इह खलु भगवान्, हिरण्यगर्भो योगस्यादिभो वक्ता, तथा च हिरण्यगर्भोऽत्र परमषे: कपिलस्य संज्ञाभेद:, यथोक्तं -

‘‘विद्यासहायवन्तमादित्यस्यं समाहितम् ।
कपिलं प्राहुराचार्या: साङ्ख्यनिश्चितनिश्चिता: ।।’’

यथोक्तं - ‘‘हरिण्यगर्भो योगस्य वक्ता नान्य: पुरातन:’’ इति योगियाज्ञवल्क्येन हिरण्यगर्भस्यादिगुरुत्वबोधनादिति, सूत्रवाक्यार्थमुपसंहरति - योगस्यानुशासनं शास्त्रमधिकृतं वेदितत्यमिति, शिष्यैरिति शेष:, वेदितव्यमितिपूरणेनसूत्रस्य शिष्याबधनार्थकत्वं सूचितं योगस्य च फलं

सूत्रभाष्पप्योः स्थाने स्थाने वक्ष्यमाण मयोत्तसूत्रावतारिकायामपि सङ्क्षेपाद्वक्ष्यते । ''योगः समाधिः स'' च सार्वभौमश्चित्तस्य धर्म'' इति, योग समाधिः चित्तवृतिनिरोधः ।

वेद, स्मृति, पुराण, महाभारत, सांख्यकारिका सांख्यशास्त्रस्य चितकः प्रमुखा आचार्यः अग्रलिखितः निम्नासक्ति । महर्षिकपिला आसुरि, पञ्चाशिख, विन्ध्यवासी जैगीषत्य, वार्षग्व्य, वोढु, देवल, असित, सनक, सनातन, सनत्कुमार, मृगु, शुक्र इत्यादि ।

पञ्चमे कपिलो नाम सिद्धेशः कालविप्लुतम् ।

प्रावाचासुरये सांख्यं तत्वग्रामविनिर्णयम् ।।

नैवं कपिलादिस्मृतीनामनुष्ठेये विषयेऽवकाशोऽस्ति..... । कपिल प्रभृतीनां चार्ष ज्ञानमप्रतिहतं स्मर्यते । तस्माच्छति सामान्यमात्रेण भ्रमः सांख्यप्रणेता कपिलः श्रौत इति ।

सांख्यं संख्यात्मकत्वाच्च कपिलादिभिरुच्यते ।

एततत्वात्मकं कृत्वा जगद्वेधा अजीजनत् ।। (३/२६)

तेन च बहुधा कृतं तन्त्रम्' अर्थात् पञ्चशिखेन मुनिना बहुधा कृतं तन्त्रम् षष्टितन्त्राख्यं षष्टिखण्डकृतमिति ।

'ऋषिप्रसूतं कपिलं यस्तमग्रे ज्ञाने र्बिभर्ति जायमानं च पश्येत्' (श्वेता.उप. ५/२)

श्वेताश्वतर उपनिषद एव उक्तं ऋषि प्रसूतं कपिलं यस्तमग्रे इत्यादि भास्कराचार्ये हिरण्यगर्भ स्वीकृते ।

सनकश्च सनन्दश्च तृतीयश्च सनातनः । कपिलश्चासुरिश्चैव वैदुः पञ्चशिखस्तथा । सप्तैते ब्रह्मणः पुत्राः.......... । महाभारत शान्ति कपिलं परमषिर्श च यं प्राहुर्यतयः सदा ।

अग्निः स कपिलो नाम साङ्ख्ययोगप्रवर्तकः ।। महाभारत शान्ति पञ्चमो कपिलो नाम सिद्धेशः कालविप्तुम् ।

प्रोवाचासुरये साङ्ख्यं तत्वग्राम-विनिर्णयम् ।। भागवत ।।१/३।।

आदिविद्वान कपिल इति । ........ कपिलोनाम विष्णोरवतारविशेषः प्रसिद्धः । स्वयम्भूर्हिरण्यगर्भस्तस्यापि साङ्ख्ययोगप्राप्तिर्वेदे श्रूयते । स एवेश्वरविद्वान कपिलो विष्णुः स्वयम्भूरिति भावः । एवं प्रकारेण महर्षिकपिलः स्वसमये सुप्रसिद्धः अग्रगामी च दार्शनिको विद्वान आसीत् इति शम् ।

XXXXXXXXXXXXXXXX





# किरातार्जुनीयस्य आद्यसर्गद्वये त्रिवर्गसङ्घर्षः

डा. अनुपमारायली[39]

मानवजीवनं तु सुखदुःखसमन्वितम् । तत्र च कामोन्मुखः मनुजः सर्वदा दुःखमुपभुङ्क्ते । तदा सः स्वसमस्याः अतिक्रम्य आनन्दप्राप्तिम् इष्यमाणः तदर्थं प्रयतमाणश्च भवति । किन्तु तमानन्दम् अप्राप्तः अपूर्वकामः सः मार्गान्तरान्वेषणे अटति । यथोक्तं तैत्तिरीयम्-

**"समुद्र इव कामः । न वै कामस्य अन्तोऽस्ति, न समुद्रस्य ।"** [1]

कामोत्सुकस्य तस्य जीवनस्य अज्ञानान्धकारे ज्ञानज्योतिं ज्वालयति धर्मार्थकामाभिधानः त्रिवर्गः । अयं त्रिवर्गः मानवजीवने प्रमुखस्थानमावहति । यथोक्तं रामायणे -

**"धर्मार्थकामाः खलु जीवलोके समीक्षिता धर्मफलोदयेषु ।**
**ये तत्र सर्वे स्युरसंशयं मे भार्येव वश्याभिमता सपुत्रा ॥"**

सत्यविनयदयाधार्मिकवादीनामुत्तमगुणानां,कामलोभभोगाधिकारेर्ष्याऽहंभावादीनां च अज्ञानान्धकारादीनां परस्परसङ्घर्षः सर्वत्र, सर्वथा च विद्यते । इत्थं नराः धर्मार्थकामैः सह सङ्घृष्यन्ते । क्वचित्ते चञ्चलचित्ताः भवन्ति | अज्ञानान्धकारस्य दमनमेव मानवस्य वास्तविक-विजयः | मानवाय एतादृशलक्ष्यं साधयितुं धर्म एव अग्रभूमिः | यतोहि त्रिवर्गेषु अन्यतमेन धर्मेण चोदितः मनुजः जयापजयसुखदुःखादिविषयान् अधिगन्तुं प्रभवति | यथोक्तं मनुस्मृतौ -

**"धर्मार्थावुच्यते श्रेयः कामार्थौ धर्म एव च |**
**अर्थ एवेहि वा श्रेयस्त्रिवर्ग इति तु स्थितिः ||"**

**किरातार्जुनीये त्रिवर्गदृष्ट्या पात्रविवेचनम् -**

महाकविभारविविरचितकिरातार्जुनीयमहाकाव्ये विद्यमानप्रमुखपात्राणि क्वचित् त्रिवर्गसमन्वितानि क्वचित् त्रिवर्गसङ्घर्षितानि च दृश्यन्ते | तत्रापि

1. (II-2.5-6)

विशिष्य काव्यस्य आद्यसर्गत्रये द्रौपदीभीमार्जुनधर्मराजादीनां पात्रेषु त्रिवर्गैः सह सङ्घृष्यमाणं व्यक्तित्वं दृश्यते | एकतः द्रौपदीभीमार्जुनाः समस्यग्रन्थिकृदः भूत्वा धर्मराजं उद्वेजयन्ति चेद् अन्यतः

[39] हैदराबादकेन्द्रियविश्वविद्यालयस्य Post Doctoral Research Associate.

धर्मराजः ग्रन्धिभेदकस्सन् तान् समादधाति | भीमादीनां पात्राणि तु अर्थकामाभ्यां मिथुनीकृतानि सन्ति | धर्मराजस्तु इतरेषां भीमादीनाम् उद्बोधनेन त्रिवर्गैः सह सङ्घृष्यमाणोऽपि व्यासमुनेः वचांसि श्रुत्वा धर्मबद्धो भवति |

काव्येऽस्मिन् दुर्योधनस्य साक्षात्प्रवेशः यद्यपि नास्ति तथापि वनेचरोक्तदुर्योधनस्य राज्यपालनविधिं श्रुत्वा तस्य (दुर्योधनस्य) राजनीतिज्ञता ज्ञायते | स्वल्पकालव्यापृते विर्णिलिङ्गिनः वनेचरस्य वचनेषु सुहृद्गूढचरराजधर्मादीनां प्रतिपादनेन तस्यौन्नत्यं माहात्म्यं च प्रतीयते |

**वनेचरस्य धार्मिकता -**

आदौ तावत् काव्यस्य प्रथमसर्गे एव वनेचरः सुहृद्धर्मं गुप्तचरधर्मं च प्रतिपादयति | राज्ञा नियुक्तैः गुप्तचरैः कदापि राजा न वञ्चनीयः | राज्ञे प्रियं वा अप्रियं वा सर्वमेव निवेदनीयम् -

**"क्रियासु युक्तैर्नृपचारचक्षुषो न वञ्चनीयाः प्रभवोऽनुजीविभिः |**
**अतोऽर्हसि क्षन्तुमसाधु साधु वा हितं मनोहारि च दुर्लभं वचः ||" * 1**

तथैव राजसचिवयोः स्वभावं निर्दिश्य तयोरानुकूल्यमेव राज्यस्य समृद्धेः कारणमिति वदन् उभयोरपि धर्ममुवाच -

**"स किंसखा साधु न शास्ति योऽधिपं हितान्न यः संश्रुणुते स किंप्रभुः |**
**सदानुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसम्पदः ||" * 2**

**दुर्योधनस्य त्रिवर्गसन्तुलनम् -**

'किरातार्जुनीय' महाकाव्यस्य मूलाधारस्तु महाभारतम् | स्वभावेन दुर्योधनो जिह्म इति मूलमैतिह्यं प्रमाणम् | परन्तु नानाशास्त्रवैदुष्यपूर्णः भारविः नारिकेलफलसम्मितपाकेन नयवर्त्मनि दर्योधनस्य अप्रतिमं पाण्डित्यमाविश्चकार |

1. (I-4) * किरातार्जुनीयम् |
2. (I-5)

नृपासनस्थोपि सुयोधनः वनाधिवासिभ्यः पाण्डवेभ्यः शङ्कितभयः द्यूतछद्मना जितं राज्यं पुनः नयेन जेतुं उद्युक्तोऽभवत् | अतः नयवर्त्मनि साफल्यं प्राप्तुं त्रिवर्गसेवानिरतिः अत्र इत्थं निरूप्यते |

**त्रिवर्गसेवी दुर्योधनः-**

जितेन्द्रियः निरलसः सन् सः दुर्योधनः नयेन अनवरतम् अहर्निशं प्रजानुरञ्जनात् पुरुषार्थं वितनुते -





**"कृतारिषड्वर्गजयेन मानवीमगम्यरूपां पदवीं प्रपित्सुना |**
**विभज्य नक्तन्दिवमस्ततन्द्रिणा वितन्यते तेन नयेन पौरुषम् ||"1 ***

सद्गुणसमन्वितः नैकस्मिन्नपि पुरुषार्थे विशेषसङ्गी दुर्योधनः सेवनसमयविभाजनं विधाय धर्मार्थकामानां त्रिविधपुरुषार्थानां समानानुरागेण सेवयति स्म |

**"असक्तमाराधयतो यथायथं विभज्य भक्त्या समपक्षपातया |**
**गुणानुरागादिव सख्यमीयिवान् न बाधतेऽस्य त्रिगणः परस्परम् ||"2 ***

**दुर्योधने धर्मः -**

अपगतमानः दुर्योधनः सेवकसुहृद्बान्धवान् निजपरिवारजनवत् सानुरागेण पश्यति स्म -

**"सखीनिव प्रीतियुजोऽनुजीविनः समानमानान् सुहृदश्च बन्धुभिः |**
**स सन्ततं दर्शयते गतस्मयः कृताधिपत्यामिव साधु बन्धुताम् ||" 3 ***

अयं स्वयं जितेन्द्रियस्सन् शत्रुं सुतञ्च उभयं प्रति समदृष्ट्या समाचरन् धर्मस्य व्यतिक्रमं निवारयन् धर्मं रक्षति स्म -

**"वसूनि वाञ्छन्न वशी न मन्युना स्वधर्म इत्येव निवृत्तकारणः |**
**गुरूपदिष्टेन रिपौ सुतेऽपि वा निहन्ति दण्डेन स धर्मविप्लवम् ||" 4 ***

सद्गुणैः सह समलङ्कृतो दुर्योधनः सर्वतः प्रजाः रक्षन् तासामभ्युदयं नयति -

**"उदारकीर्तेरुदयं दयावतः प्रशान्तबाधं दिशतोऽभिरक्षया |**
**स्वयं प्रदुग्धेऽस्य गुणैरुपस्नुता वसूपमानस्य वसूनि मेदिनी ||" 5 ***

1.(I-9) 4.(I-13)
2.(I-11) 5.(I-18)
3.(I-10) * किरातार्जुनीयम् |

**दुर्योधने अर्थः -**

राजनीत्यां चतुर्विधानामुपायानां विनियोगे दुर्योधनः अतिकुशलः| तस्य निर्बाधं सामनीतिः धनदानरहितं प्रचुरमर्थवितरणं सत्कारं परित्यज्य न प्रवर्तते –

**"निरत्ययं साम न दानवर्जितं न भूरि दानं विरहय्य सत्क्रियाम् |**
**प्रवर्तते तस्य विशेषशालिनी गुणानुरोधेन विना न सत्क्रिया ||" 1 ***

इत्थं चतुर्णामुपायानां कुशलविनियोगेन ते उपायाः सम्यक् संवर्धयन्ति -

**"अनारतं तेन पदेषु लम्भिता विभज्य सम्यग्विनियोगसत्क्रियाः |**

**फलन्त्युपायाः परिबृंहितायतीरुपेत्य सङ्घर्षमिवार्थसम्पदः ||”** [2]*

एवं राज्यं परिपालयन्तं दुर्योधनं सर्वे राजानः तं प्रसन्नतापूर्वकमनुगच्छन्ति -

**“न तेन राज्यं क्वचिदुद्यतं धनुः कृतं न वा कोपविजिह्ममाननम् |**

**गुणानुरागेण शिरोभिरुह्यते नराधिपैर्माल्यमिवास्य शासनम् ||”** [3]*

दुर्योधनराज्यपालनवर्णनमाध्यमेन आदावेव कविना राजनैतिकावधारणा कृता | वनेचरस्य माध्यमेन शत्रोः शासनव्यवस्था, प्रजास्थितिः, आर्थिकदशादीनां वृत्तान्तानां परिचयः दत्तः |

**दुर्योधने कामः -**

नक्तं दिवं विभज्य त्रिवर्गं सेवते दुर्योधनः इत्यनेनैव अस्य कामनिरता न वर्तते धर्ममतिरिच्येति अवगम्यते | अयमेवांशः अत्रोच्यमाने सन्दर्भे स्पष्टीक्रियते | दुर्योधनः कुटिलस्वभावं दमित्वा राज्यं प्राप्तुकामः धार्मिकजीवनं यापयति | सः नृपासनस्थोऽपि राज्यभ्रष्टाद् युधिष्ठिरात् पराभवस्य भीत्या कथञ्चित् राज्यं स्थायीरूपेण प्राप्तुमिच्छुकः आसीत्-

**“विशङ्कमानो भवतः पराभवं नृपासनस्थोपि वनाधिवासिनः |**

**दुरोदरच्छद्मजितां समीहते नयेन जेतुं जगतीं सुयोधनः ||”** [4]*

**द्रौपद्याः भाषणम्-**

वनेचरोक्तवचनानि श्रुत्वा प्रतिपक्षनिमित्तजन्येन दुःखेन अतिशयेनाभिभूता सती द्रौपदी शालीनतां परित्यज्य 'कान्ता सम्मिततयोपदेश' इव युधिष्ठिरं वक्तुं

1. (I-12)
2. (I-15)
3. (I-21)
4. (I-7)

* किरातार्जुनीयम् |

प्रस्तुता भवति | लोकेऽस्मिन् क्रोधरहितः पुरुषो न सम्मानं लभते न तु तस्मात् कश्चित् बिभेतीति शत्रोरुन्नतिं दृष्ट्वाऽपि शान्तं सन्तं युधिष्ठिरं कुप्यति द्रौपदी -

**"अवन्ध्यकोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः |**

**अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषादरः ||”** [1]*

स्वपालनीयानुजानां दयनीयां दशां सम्पश्यन्नपि कथं धर्मराजः स्वस्थचित्तः प्रतीकाररहितः इति तस्याम् आश्चर्यं जनयति | इयं विपत्तिः न हि दैवकृता अपितु स्वप्रमादजनिता इति स्वीयाभिप्रायं प्रकटय्य युधिष्ठिरं प्रतीकाराय प्रेरयति -

**“पुरः सरा धामवतां यशोधनाः सुदुःसहं प्राप्य निकारमीदृशम् |**

**भवादृशाश्चेदधिकुर्वते रतिं निराश्रया हन्त हता मनस्विता ||”** [2]*





**द्रौपद्यां धर्मः-**

द्रौपदी सोद्वेगेन राजधर्मं बोधयति | लोके यथा भार्यापहरणं गर्हितं प्रतिष्ठाविनाशकं तथैव राजलक्ष्म्या अपीति सा युधिष्ठिरं आक्षिपति-

**“गुणानुरक्तामनुरक्तसाधनः कुलाभिमानी कुलजां नराधिपः |**

**परैस्त्वदन्यः क इवापहारयेन्मनोरमामात्मवधूमिव श्रियम् ||”** [3]*

यो हि राजाऽमोघक्रोधो भवति तस्य वशे सर्वे प्राणिनः भवन्ति | अतः राज्ञा काले क्रोधसम्पन्नेन भवितव्यम् -

**“अवन्ध्यकोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः |**

**अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषादरः ||”** [4]*

अन्ते सा युधिष्ठिरे विद्यमानस्य सहजस्य क्षात्रस्य तेजसः आविष्करणस्य विषये तं सम्प्रेर्य कैवल्यकार्यवद् राजकार्यं न शान्ति-साध्यम् इति बोधयति -

**“विहाय शान्तिं नृप धाम तत्पुनः प्रसीद सन्धेहि वधाय विद्विषाम् |**

**व्रजन्ति शत्रूनवधूय निःस्पृहा शमेन सिद्धिं मुनयो न भूभृतः ||”** [5]*

1. (I-33)
2. (I-43)
3. (I-31)
4. (I-33)
5. (I-42)

* किरातार्जुनीयम् |

**द्रौपद्याम् अर्थः -**

द्रुपदात्मजा राजपुत्री राजपत्नी च सती राज्यसुखानि इच्छति | वनवासे भीमार्जुननकुलसहदेवानां दुर्दशां धर्मराजं सूचयति | यथा रक्तचन्दनचर्चितः महारथः भीमो अधुना पादगामी सन् गिरिगुहान्तरेषु पर्यटन्नस्ति –

**“परिभ्रमँल्लोहितचन्दनोचितः पदातिरन्तर्गिरि रेणुरुषितः |**

**महारथः सत्यधनस्य मानसं दुनोति नो कच्चिदयं वृकोदरः ||”** [1]*

महेन्द्रविक्रमेऽर्जुनोऽपि यः पूर्वदेशान् विजित्य बहुलं धनमानयत् तस्यैव शक्तिरधुना केवलं वल्कलवस्त्रादाने विनियोजिता दुष्प्रयोजिता-

**“विजित्य यः प्राज्यमयच्छदुत्तरान् कुरूनकुप्यं वसु वासवोपमः |**

**स वल्कवासांसि तवाधुनाऽऽहरन् करोति मन्युं न कथं धनञ्जयः ||”** [2]*

तथैव नकुलसहदेवयोर्दीनदशां पश्यन्नपि कथं धर्मराजः स्थिरचित्तः अस्तीति तथा आश्चर्यं

प्रकटितम् -

**“वनान्तशय्याकठिनीकृताकृती कचाचितौ विष्वगिवागजौ गजौ |” 3 ***

**द्रौपद्यां कामः -**

द्रुपदात्मजायां राज्यं प्राप्तुम् इच्छा तु अस्ति एव | सा युधिष्ठिरं शत्रून् जित्वा राज्यमाप्नुयात् इति उद्बोधयति | वनवासे पतीनां पूर्वापरसम्पद्विपद्दशां दृष्ट्वा दुःखैरभिभूता भवति |

**भीमभाषणम् -**

भीमोऽपि द्रौपद्याः वचनानि समर्थयन् धर्मराजं युद्धाय प्रेरयति | धर्मराजे ईदृशीं दुर्दशां प्रापिते सति दैवसम्मानितपुरुषकारोऽपि नश्यतीति भीमस्याभिप्रायः | विकासमानानां शत्रूणां राजकीयं तेजः, अनुत्साहेनोपेक्षमाणानां तेषां सम्पदश्च लोकनिन्दाभयेन शीघ्रम् अपगच्छन्ति | अतः वर्धमानः शत्रुः न कदापि उपेक्षणीयः इति सः युधिष्ठिरं प्रेरयति -

**“अनुपालयतामुदेष्यतीं प्रभुशक्तिं द्विषतामनीहया |**
**अपयान्त्यचिरान्महीभुजां जननिर्वादभयादिव श्रियः ||” 4 ***

1. (I-34)
2. (I-35)
3. (I-36)
4. (II-10)

* किरातार्जुनीयम् |

वृकोदरः अतिरथः भीमः पराक्रमशाली सन्नपि अन्तःपुरनिवासिनीनां नारीणां वाचः वृथा अथवा मिथ्यावचनं इति न परिगणयति | सः युधिष्ठिरं प्रति कथयति - द्रौपद्युक्तवचनं सर्वथा उचितमस्ति | तत्तु बृहस्पतेरपि आश्चर्यकरम् | तन्नारीजनोक्तिरिति मत्वा कदाऽप्युपेक्षणीयं नास्ति | यथाऽल्पमात्रे श्रेष्ठभेषजे बहुगुणा भवन्ति, तथैव द्रौपदीवचने बहुगुणाः दृश्यन्ते इत्युक्त्वा द्रौपद्याः वचनं समर्थयति –

**“परिणामसुखे गरीयसि व्यथकेऽस्मिन्वचसि क्षतौजसाम् |**
**अतिवीर्यवतीव भेषजे बहुरल्पीयसि दृश्यते गुणः ||” 1 ***

युधिष्ठिरं पुरुषार्थप्राधान्यं बोधयन् भीमः मानधनस्योन्नतं स्थानम् आरोढुमिच्छतः धीरस्य स्वपुरुषार्थमेव विपत्तिनिवारणाय साधनं भवतीति प्रतिपादयति -

**“अभिमानवतो मनस्विनः प्रियमुच्चैः पदमारुरूक्षतः |**
**विनिपातनिवर्तनक्षमं मतमालम्बनमात्मपौरुषम् ||” 2 ***

तथैव पराक्रमहीनं पुरुषं विपत्तयः आक्रमन्ति | विपदाक्रान्तं पुरुषं भविष्यत्कालः त्यजति | तथा





च आसन्नक्षयस्य अगौरवं अवश्यम्भावि | एवञ्च महत्वहीनस्य राज्यलक्ष्म्याः निवासः न भवति -

**“विपदोऽभिभवन्त्यविक्रमं रहयत्यापदुपेतमायाति |**
**नियता लघुता निरायतेरगरीयान्न पदं नृपश्रियः ||” 3 ***

**युधिष्ठिरनयवैदुष्यम्-**

द्रौपदीभीमयोः उत्तेजपूर्वकभाषणेन सामान्यजनस्तु प्रेरितः भवति | किन्तु सार्थकनामधेयः धर्मराजः तयोः सम्भाषणं श्रुत्वाऽपि उद्वेगं न प्राप्य, विना विचारं क्रियमाणं कार्यं विपदां स्थानमिति आत्मानं समर्थयति -

**“सहसा विदधीत न क्रियामविवेकः परमापदां पदम् |**
**वृणुते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः ||” 4 ***

1.(II-4)
2.(II-13)
3. (II-14)
4. (II-30)

* किरातार्जुनीयम् |

कर्त्तव्यरूपबीजानि विवेचनजलेन सिञ्चनीयानि | तदैव लोकः फलान्वितः भवतीति तस्याभिप्रायः -

**“अभिवर्षति योऽनुपालयन्विधिबीजानि विवेकवारिणा |**
**स सदा फलशालिनीं क्रियां शरदं लोक इवाधितिष्ठति ||” 1 ***

**युधिष्ठिरे धर्मः -**

राजधर्मं प्रतिपादयन् जिगीषवः नृपाः प्रभूतं फलसिद्धिम् आकाङ्क्ष्य विवेकबुद्ध्या क्रोधमपनयन्ति | नोचेत् कृष्णपक्षीयचन्द्रकला इव शक्तिसम्पदः नश्यन्ति -

**“बलवानपि कोपजन्मनस्तमसो नाभिभवं रुणद्धि यः |**
**क्षयपक्ष इवैन्दवीः कलाः सकला हन्ति स शक्तिसम्पदः ||” 2 ***

यः भूपालः धीरबुद्धिस्सन् मार्दवं तनोति सः सूर्य इव समस्तलोकम् अधिकुरुते इति शान्तमनस्कः धर्मराजः दृढचेतसा द्रौपदीभीमौ समादधाति |

**युधिष्ठिरे अर्थः -**

अर्थविषये युधिष्ठिरस्य समुचितचिन्तनमस्ति | शरदृतौ चपलमेधा इव सम्पदोऽपि चपलेन्द्रियैः पुरुषैः असुरक्षाः भवन्ति -

**"क्व चिराय परिग्रहः श्रियां क्व च दुष्टेन्द्रियवाजिवश्यता |**
**शरदभ्रचलाश्चलेन्द्रियैरसुरक्षा हि बहुच्छलाः श्रियः ||"** 3 *

राजनीतिशास्त्रेऽपि तस्य दार्ढ्यं प्रदर्शयन् राजनीत्यां वास्तविकीं स्थितिं न अवगम्य सद्यः निर्णयः न ग्राह्यः | तत्र सन्धिविग्रहादिविधेयेषु सरलतया सहसा स्वरूपं प्रत्याययितुं न कोऽपि समर्थः भवतीति भीममुद्दिश्य धर्मराजः भणति -

**"अवितृप्ततया तथापि मे हृदयं निर्णयमेव धावति |**
**अवसाययितुं क्षमाः सुखं न विधेयेषु विशेषसम्पदः ||"** 4 *

राजनीत्यां सफलतां प्राप्तुं सहिष्णुतैव उत्तमसाधनम् इत्यस्याभिमतम् | शत्रूणां

1. (II-31) 3.(II-39)
2. (II-37) 4.(II-29)

* किरातार्जुनीयम् |

विनाशकारकं प्रभूतकर्मफलोत्पादकम्, अहानिकारि, क्षमातुल्यसाधनमन्यत् किमपि नास्ति -

**"उपकारकमायतेर्भृशं प्रसवः कर्मफलस्य भूरिणः |**
**अनपायि निबर्हणं द्विषां न तितिक्षासममस्ति साधनम् ||"** 1 *

**व्याससमर्थनम् -**

भीमम् अनुशासन्तं युधिष्ठिरं स्वयमभिवाञ्छितोऽर्थ इव वेदव्यासः सम्प्राप्य तमेव समर्थयन् उदारां गिरामभिदधे | बन्धुजनैः सह पक्षपातरहितव्यवहारेण वर्तितव्यम् | तत्रापि विशेषतया भवादृशानां तपोधनानाम् अयमुचितव्यवहारः | शत्रूणां सभायाः मार्गाद् भ्रष्टाः जाताश्चेदपि विपत्कालेऽपि धर्मभारं दधानेन सर्वगुणेषु उत्कृष्टं प्रेमाविष्कृतं प्रकटीचक्रुः | भवद्भिः पराक्रमेण पृथिवी प्राप्तव्या | विपक्षस्तु बलवान् अस्ति | अतः सहसा कश्चित् निर्णयः न स्वीकरणीयः | उत्कृष्टः एव विजयमाप्नोति | अत एव केनाप्युपायेन शक्तिः प्राप्तव्या इति व्यासः निर्दिदेश |

**XXXXXXXXXXXXXXXXXXXXXX**





# भारतीयसंस्कृतौ तपोवनस्वरूपम्

**सुदीपचक्रवर्ती**[40]

तपोवनं हि मुनीनां वासस्थानं, धर्मारण्यं, विद्या-चर्चा-केन्द्रञ्च। तत्र ये वसन्ति स्म – "ते सर्वगाम् सर्वतः प्राप्य धीराः"। रवीन्द्रनाथः तत्-कृत-ग्रन्थे (*A Poet's School* : page no. – 72-73) अकथयत् — "Those men of serene mind enter into the All, having realized and being everywhere in union with omnipresent spirit"

तपस्विनः ज्ञानचर्चां कुर्व्वन्ति। तत्र तपोवने ज्ञानचर्चायां धर्मस्य प्राधान्यम् अवश्यमेव वर्तते। तु भाषातत्तव-साहित्यालंकार-दर्शन-विज्ञानादीनां धर्मनिरपेक्ष-विद्यानां अभ्यासः अपि तत्र प्रवर्तते। बहूनि विषयाणि तत्कालीन-तपोवने आलोच्यन्ते स्म। तेषु उल्लेखनीयानि कतिपयानि यथा (क) आत्मविद्या, (ख) ज्योतिर्विद्या, (ग) कृषिविद्या, (घ) व्ववहारिकविद्या, (ङ) जीवनशैलीविद्या, (च) पशुपालनविद्या, (छ) संगीतविद्या, (ज) चित्राङ्कनविद्या इत्यादयः। उल्लिखिताः विद्याः न पृथक् पृथक् प्रदीयन्ते अपि तु सम्मिलितरूपेण आचार्यैः प्रदीयन्ते। रवीन्द्रनाथः तपोवनादर्शं अनुसृत्य शान्तिनिकेतनम् इति स्थाने एकं ब्राह्मविद्यालयं स्थापितवान्। तपोवनादर्शं हृदि निधाय तपोवनादर्शस्य वास्तविकं प्रयोगं कृत्वा तत्र स विद्यालयः अधुना विश्वविश्रुतविद्यापीठः "*विश्वभारती विश्वविद्यालयः* " इति ख्यातिं लभति। तपोवनाधिपतिषु साधुषु अनेके दश-सहस्राधिक-छात्राणां भरण-पोषणं कृत्वा "कुलपतिः" इति विशेषणं प्राप्नुवन्ति। किन्तु किं तपोवनं केवलं विद्या-चर्चा-केन्द्रम् ? तन्न।

कालिदासस्य रघुवंशकाव्ये यदा राजा दिलीपः पत्नीं सुदक्षिणां नीत्वा मुनेः वशिष्ठस्य आश्रमं प्रविशति स्म तदा सन्ध्याकालीनाश्रम-वर्णना-काले तपोवन-विषये वयं प्राप्नुमः।यत्र ऋषयः, मुनिवनिताः, मुनिकन्यकाः च सन्ति। प्रकृति-मानव-मनुष्येतर-प्राणिनां एकात्मता अत्र भवति प्रकाशिता। रघुवंशकाव्यात् एतत् अनुमीयते यत् – तपोवनं नाम एकं परिपूर्णं व्यवहारिकं जीवन-शैली-विकास-केन्द्रम्। तत्र जीवन-धारण-निमित्तं खाद्यसंग्रहस्य, कृषिकार्यस्य, पशुपालनस्य, उद्यान-परिचर्यायाः च शिक्षा प्रत्यक्षतया प्रदीयन्ते। औपनिषदिक-कालादेव तपोवने अधिविद्यायाः परिपूरकम् आसीत् ऐहिक-जीवनम्। तत्र तपोवनवासिभिः तपोवन-प्राणीनां प्रति तपोवन-वृक्ष-लतानां प्रति च सोदरस्नेहः प्रकाश्यते। तत्-कालीनः वृद्धि-वृत्ति-जीवी-मानवाः कुश-समिध-संग्रहादारभ्य गोधन-परिचर्या-पर्यन्तं सर्व-प्रकार-कार्यान् कुर्व्वन्ति स्म। अधुनातनकाले यत् पर्यावरणं नीत्वा समग्रपृथिवी आलोचनारता तत् पर्यावरणं कालिदासं निकषा मनुष्यजीवनेन सह अङ्गाङ्गिभावेन युक्तमासीत्। पर्यावरणं नीत्वा तदा कोऽपि न भिन्नरूपेण चिन्तयति। मानवाः तदा प्रकृतिमध्ये अवसन्। वृक्षादीन् विहाय प्राणीकुलं विहाय च स्वतन्त्रं जीवनं नासीत्। पुनश्च ब्रह्मचारिणः ये

[40] संस्कृताअध्यापकः, कोलकाता

खलु विद्यालाभार्थं आगतवन्तः, ते अपि आचार्यस्य गृहं गोधनमपि अरक्षन् – “ब्रह्मचारिणा आचार्यं गोपयन्ति। गृहान् पशुन्नेन्नुहरानिति।” (शतपथब्राह्मणस्य 3 - 6 - 2 - 15)।

पाश्चात्य-देशानां अधुनातन-कालीनेतिहासं वयं वर्तमानकालमिति स्वीकुर्म्मः, तु तन्न भारतबर्षस्य वर्तमानकालम्। पृथिव्याः सर्वाधिकाः आधुनिक-सभ्यतादयः नगरीमाश्रित्य विकशन्ति। तु भारतबर्षक्षेत्रे सभ्यतायाः मूलं हि वनम्। रवीन्द्रनाथः अवदत् – तत्र मनुष्यः आसीत् च मुक्तं स्थानम् आसीत् च जटिलता च नासीत्। तेन च भारतीयचित्तं न अभवत् जडम् अपि तु भारतीयचेतना प्रदीप्तप्रभां लब्धवती। एतादृशी घटना पृथिव्यां कुत्रापि ना परिदृश्यते। तया अरण्य-निःसृतया सभ्यताधारया समग्रभारतबर्षं हि भवति अभिषिक्तम्। तत्प्रवाहः अद्यतनकालपर्यन्तमपि चलति। अधुनातन-कालस्य नगरीमूला भारतीय-सभ्यतापि तपोवन-सभ्यतायाः वैशिष्ट्यं त्यक्तुं नार्हति। तपोवन-सभ्यतायाः आदर्शादयः अद्यापि भारतीय-जनचित्तं प्राणरसं यच्छन्ति।

ये खलु मानवाः तदा निवसन्ति, ते न आदिममानववत् आसन्। ते वनम् अध्युष्य अपि न जन्तुसदृशाः। तु का आसीत् तेषाम् अभीप्सा ? किं कर्तुम् वा ते इच्छितवन्तः ? तपोवनस्य मानवः खलु सत्यान्वेषी, शुद्धं सरलं अपापविद्धं जीवनस्य पिपासुः च। एतादृशी चेतना जगति कुत्रापि न प्राप्यते। वैदिकाः तपस्विनः पूर्णाङ्गं जीवनं यापयन्ति स्म। विश्वकविः रवीन्द्रनाथः तत्-कृत-ग्रन्थे (*A Poet’s School*) अकथयत् — “Those who are familiar with Sanskrit literature well know that this was not a colony of people with a primitive culture and mind. They were seekers of truth, for the sake of which they lived in an atmosphere of purity, but not of Puritanism; of simple life, but not the life of self-mortification. They did not advocate celibacy and they had constant inter-communication with the other people who had to live the life of worldly interest. Their aim and endeavour have briefly been suggested in the *Upanishad*…”

तर्हि तपोवन-समुद्भुता भारतीय-मनीषा गभीरेण अनुध्यानेन विश्व-ब्रह्माण्डस्य अतीव गहनं सृष्टि-स्थिति-लय-विषयादिकं दार्शनिकं त्त्वं अन्वेषणाय निविष्टा अभवत्। तेन च सा भारतीय-वुद्धिः निखिलेन सह आत्मनः योगं स्थापयितुं चेष्टते स्म। यदि गभीरम् अनुध्यानं दीयते, तदा एषा जिज्ञासा मनसि आयाति यत् – वर्तमानसमये आधुनिक-पदार्थविद्या किं न विश्व-ब्रह्माण्डस्य सृष्टि-स्थिति-लय-विषयादिकं त्त्वं प्रति धावति ? अत्र का तावत् आसीत् अरण्य-वर्धितायाः भारतीयसंस्कृतेः भूमिका ? प्रथमतः वहिःसंघातेन एषा प्रेरणा नागता। द्वितीयतः विविधाप्रयोजननिमित्तात् प्रतियोगितायाः न उद्भुता अपि। भारतीयसंस्कृतेः शुद्धजिज्ञासाशक्तिः (“परिप्रश्नेन सेवया”) हि महत्त्नपूर्णां भूमिकां नयति। तद्वलादेव भारतीयसंस्कृतिः ऐश्वर्योपकरणं न प्रश्रयं ददाति। ज्ञाता स्व-व्यक्ति-सत्त्वां स्व-सुखादिविषयं च अप्रधानीभूतं कृत्वा अगणयित्वा वा





ज्ञेयं विषयं हि मुख्यतया प्रधानीभूतं कृतवान्। पाश्चात्यः वैज्ञानिकः आलवर्ट आइनस्टाइन् अपि प्राचीन-भारतीय-तपोवन-सभ्यतायाः मुनिवत् स्व-सुखादिविषयं अगणयित्वा सत्यं विज्ञानं सेवते स्म। तर्हि प्राचीन-भारतीय-तपोवन-सभ्यता सत्य-ज्ञानान्वेषणाय संकीर्णं स्वार्थम् अत्यजत्।

अत्र पुनः रवीन्द्रनाथस्य मतम् स्मर्य्यते (in his *A Poet’s School*) – “Even when I was fairly precocious young man the nothingness of the hopes and strivings which chases most men restlessly through life came to my consciousness with considerable vitality … By the mere existence of his stomach everyone was condemned to participate in that chase … As the first way out there was religion …, which, however, found an abrupt ending at the age of 12 … It is quite clear to me that the religious paradise of youth, which was thus lost, was a first attempt to free myself from the chains of the “merely personal,” from an existence which is dominated by wishes, hopes and primitive feelings. Out yonder there was this huge world, which exists independently of us human beings and which stands before us like a great, eternal, riddle, at last partially accessible to our inspection and thinking. The contemplation of this world beckoned like a liberation …”

तत्र सहभावेन जीवनयापनाय प्रदत्ता शिक्षा समाजस्य मङ्गलं कृतवान्। अतः प्राचीनकालस्य भारतीय-तपोवनानि आसन् कमिउनवत् (समाजतान्त्रिकम् कमिउनम्)। यत्र ज्ञानस्य धर्मस्य च चर्चा हि प्रधानं विषयद्वयम्। समाजतान्त्रिक-धारणा तत्र मौलीभूता असीत्। पर्यावरणेन सह अवयावयवीसम्वन्धयुक्तं तपोवनं सदा मातरं, मृत्तिकां, मानवं च हृदि निधाय वहुजनहिताय कार्यं कुरुते स्म। पार्श्वस्थैः ग्रामवासिभिः च सह संयोगं रक्षति स्म तपोवनसभ्यता।

तपोवनस्य आदर्शं न भवति अतीतम्। अतीततपोवनादर्शं यत् खलु प्रच्छन्नं, प्रवलं, न मृतं च, तत् भारतीय-सभ्यतायाः प्रकृतिगतं विषयम्। तत् भारतीय-सभ्यतामध्ये फल्गुधारावत् चिरं प्रवहति। कः खलु भारतीय-सभ्यतायाः प्राणरसं तपोवनादर्शं विस्मर्तुं शक्नोति ? तपोवन-साधुजनः राजानं करं न ददाति। तु तत्कृतैः यज्ञादिपुण्यैः राज्यस्य उन्नतिः अभवत्। पुनश्च राजापि क्षेत्रविशेषे राज्यपरिचालनार्थं तपोवन-मुनिजन-सकाशात् उपदेशं गृह्णाति। अनेन च तपोवनस्य समाजमङ्गलकरी भूमिका पुनः प्रतिभासते।

तर्हि तपोवनं नाम प्राथमिकतया विविध-विद्या-चर्चा-केन्द्रम् अधिकतया तु समाजस्य महत्त्वपूर्णम् एककम्, यत्र सामाजिकी-करणस्य प्रक्रिया अपि सम्पूर्णा जाता। मानवसमाजं सफलं

शान्तिमयं च कर्त्तुं, तं समाजं क्रमोन्नतिं दातुं च यानि विषयानि आवश्यिकानि – तानि अपि संसारजीवनं प्रवेशात् प्राक् एव विद्यार्थिनः तपोवनात् ज्ञातुं शक्नुवन्ति।

यदा पुनः कः अपि मानवः का अपि मानवी वा अपराधं पापं वा अकरोत्, तदा पापस्खालनाय, चित्तशुद्धि-करणाय, स्वात्मोन्नति-विधानाय, कर्तव्याकर्तव्य-ज्ञान-लाभाय, विवेचना-शक्ति-वृद्धये, स्वाभाविक-समाज-जीवने पुनः प्रवेश-प्रस्तुति-निमित्तं च तं मानवं तां मानवीं वा तपोवने कियत्कोलं प्रेरयति स्म सामाजिकानुशासन-व्यवस्था। तदा तपोवने वासकाले प्रवासी-जनस्य न्यायपरायणता, चारित्रिकोन्नतिः, मानसिकशक्तिः, पर्यावरण-प्रेमः, मानव-स्नेहः पर्यावरण-स्थिति-शीलता-रक्षा-निमित्तं ज्ञानं च वर्धितवन्तः। अतः तपोवनस्य समाज-संस्कारक-भूमिका समाज-कल्याणकरी-भूमिका वा स्वीकरणीया। अतः तत्र प्राचीने भारतीये तपोवने विद्याचर्चया सह अपराणि बहूनि विषयानि प्रचलितानि आसन्।

*सहायक-ग्रन्थ-तालिका*


1. Einstein, Albert. *Philosopher Scientist'*. New York: Harper and Brothers, 1959.
2. Koshambi, D. D. *The Culture and Civilization of Ancient India in Historical Outline*. Vikas, 1981.
3. Tagore, Rabindranath. *A Poet's School*. Shantiniketan: Visva-Bharati, 1984.
4. Vidyābhūṣaṇa, Rājendranātha. *Kālidāsa Granthāvalī*. Kolkata: Basumati, (7th Edition).


XXXXXXXXXXXX

# वास्तुपुरुषविचारः

**डॉ. प्रदीपकुमारझा**[41]

सुविदिमेव विदुषां यत् वेदाऽस्माकं सर्वस्वभूता वेदानां परिशीलनेन अस्मान् उपकुर्वन्ति। शब्दमर्यादायां वेदे आधिभौतिकाधिदैविकाध्यात्मिकानां पदार्थानां प्रतिपादकाः शब्दा उपलभ्यन्ते। तान् शब्दान् सङ्गृह्य विद्वांसः स्वाभिमतं विभिन्नविषये प्रकट्यन्ति।

[41] शिक्षाशास्त्रिछात्रः, रा.सं.संस्थानम्, लखनऊ





जगति सर्वेऽपि जनाः सुखशान्तिमयजीवनं वाञ्छन्ति। सर्वेऽपि मानवा अभ्युदयाय यतन्ते परं स्वकर्मविपाकैरसदाचरणैश्च संसारे सर्वेऽपि मनुष्याः त्रिविधदुःखेभ्य अशान्ताः दुःखिनश्च सन्ति। त्रितापेषु आधिदैविकदुःखं महत् कष्टप्रदं वर्तते। दैवनैमित्तिका विपत्तय आधिदैविकविपत्तय उच्यन्ते। भारतीयचिन्तनपरम्परायां वेदा एव सर्वेषां शास्त्राणां आदिस्रोतांसि सर्वविदिताः चत्वारः वेदाः सन्ति। वेदानां भाषाज्ञानदृष्ट्या दुरुहत्वात् दुर्बोधकत्वाच्च ज्ञानराशिवेदार्थानामवबोधाय वेदाङ्गानि प्रवृत्तानि, तानि चैतानि शिक्षा–कल्प–व्याकरण–निरूक्त–छन्दो–ज्योतिषमिति षट्संख्याकानि। चतुर्णां वेदानामपि चत्वार उपवेदास्सन्ति। यथा– ऋग्वेदस्य आयुर्वेदः, यजुर्वेदस्य धनुर्वेदः, सामवेदस्य गान्धर्ववेदः अर्थववेदस्य स्थापत्यवेदश्च उपवेदाः। स्थापत्यवेदस्य अभिप्रायोऽपि निवासयोग्या भूमिः स्थापना एवस्ति। अस्मिन् उपवेदे वास्तुशास्त्रविषयकं ज्ञानं प्राप्यते।

वास्तुशास्त्रस्य सम्बन्धो भवननिर्माणकलया सह वर्तते। वास्तुशब्दस्य अभिप्रायो निवासाय उपयुक्तं स्थानं भवति, वास योग्या भूमिः। **अयं शब्दः**[42] **''वस्'' निवासे धातुना सह ''तुण्'' प्रत्ययेन निष्पन्नो भूत्वा वास्तुरिति भवति**, अर्थात् यत्र निवासो भवति स एव वास्तुः। अस्यानेके भेदप्रभेदाः भवन्ति। गृहवास्तुः, मन्दिरवास्तुः, ग्रामवास्तुः, पुरादयः।

व्यापकारुपेण चिन्त्यते तदा निर्माणविषयिणी या क्रिया क्रियते सा वास्तुशास्त्रान्तर्गतं परिगण्यते। आदौ भवननिर्माणकलया सह अस्या विद्यायाः सम्बन्धः कथितः। प्रागैतिहासिकयुगादेव मानवानां रक्षणार्थं कस्यापि आश्रयस्य आवश्यकता सञ्जाता। प्रारम्भेतु मानुष इतस्ततो भ्रमन्त एव जीवनं यापितवन्तः, परन्तु कालान्तरे मानवसभ्यताया विकासोऽप्यभवत्, तथैव जीवनेऽपि वैलक्षण्यमागतम्। एतैनैव वास्तुविद्यायाः प्रादुर्भावो सञ्जातः। आदौ गृहनिर्माणे मेव अस्य शास्त्रस्य उपयोगिता आसीत्। कालान्तरे अनया विद्यया चरमोत्कृष्टा स्थितिर्लब्धा।

गृहेण विना किमपि फलं न प्राप्यते, तदर्थं गृहनिर्माणं शास्त्रोक्तरीत्या अवश्यमेव सर्वप्रथमं करणीयम्।

[42] वास्तुः– वसेस्तुन्नगारे णिच्च (उ० १/७५) इति तुन् प्रत्ययेन निर्मितो भवति।

**गृहस्य प्रयोजनम्**

यथोक्तम्

**गृहस्थस्य क्रियाः सर्वा न सिद्यन्ति गृहं विना**
**यतस्तस्माद् गृहारम्भप्रवेशसमयौ ब्रुवे।**
**परगेहकृताः सर्वाः श्रौतस्मार्तक्रियाः शुभाः**
**निष्फला स्युर्यतस्तासां भूमीशः फलमश्नुते।।** (भविष्यपुराणे)

अस्मिन् लोके पुरुषार्थ चतुष्ट्यसम्पादनाय गृहनिर्माणमाधारत्वेन स्वीक्रियते यथोक्तम्–

**स्त्रीपुत्रादि भोगसौख्यजननं धर्माथकामप्रदं**
**जन्तूनामयनं सुखास्पदमिदं शीताम्बुघर्मापहम्।**
**वापीदेवगृहादिपुण्यमखिलं गेहात्समुत्पद्यते**
**गेहं पूर्वमुशन्ति तेन विबुधाः श्रीविश्वकर्मादयः।।** (गृहवास्तुप्रदीपः)

वास्तुविषयके कर्मसमये वास्तुपुरुषस्य पूजा आवश्यकी। हिन्दूसंस्कृतौ देवपूजाया विधानं सर्वेषां कार्याणां प्रारम्भकालेऽस्माभिः क्रियते। हिन्दूसंस्कृतौ चिन्तनपरम्परायाम् एका उदात्त भावना अस्ति यद् अत्र प्रतिवस्तु पिण्डे वा देवत्वस्य परिकल्पना क्रियते।

वास्तुकर्मसु पञ्चसु स्थानेषु वास्तुपूजनं कर्तव्यम्।

यथोक्तम् वास्तुराजवल्लभे–

**भवनपुरसुराणां सूत्रणे पूर्वमुक्तः**
**कथित इह पृथिव्याः शोधने च द्वितीयाः।**
**तदनुमुखनिवेशे स्तम्भसंरोपणे स्याद्**
**भवनवसनकाले पञ्चधावास्तुयज्ञः।।** (वास्तुराजवल्लभः – १/२७)

शास्त्रीयसिद्धान्तानां मते वास्तुपुरुष एक आधाररुप उपदेवोऽस्ति, यस्योपरि एव ब्रह्मा–इन्द्रादयः लोकपालसहिताः पञ्चचत्वारिंशद्देवाः प्रतिष्ठितास्सन्ति। ते देवाः वास्तोः परितः कल्याणं कुर्वन्ति। अस्मिन् वास्तुपुरुषोपरि देवाः विराजन्ते। शास्त्रेषु वास्तुपुरुषस्य भिन्ना भिन्ना कथा उपलभ्यते।

**वास्तुपुरुषस्य उत्पत्तिः–**





अन्धकासुरस्य वधस्य समये भगवतः शङ्करस्य तृतीयनेत्रात् भूमौ एकः स्वेदबिन्दुरपतत्, तस्मात् बिन्दोरेको विशालाकृतिमान् पुरुषः प्रकटितोऽभवत्। तेन अन्धकासुरस्य रक्तपानं कृतं, परन्तु सः तृप्तः ना भवत्, बुभुक्षया व्याकुलो भूत्वा ब्रह्मण्डनायकं भक्षणार्थं सः उद्यतोऽभवत्, तदा सर्वे देवाः तं गृहीत्वा अधोमुखं भुवि विन्यस्य वास्तुपुरुषस्य रुपे तस्य भूमौ प्रतिष्ठा कृता यथोक्तं वास्तुरत्नावल्याम्– **''सङ्ग्रामेऽन्धकरुद्रयोश्च पतितः स्वेदो महेशात् क्षितौ''** इत्यादि।

प्रसङ्गेऽस्मिन् वास्तुविद्यायामपि–

**आसीत् पुरा सकललोक भयङ्करश्च**
**क्रूराऽसुरो भुजबलादतिगर्वितश्च।**
**क्षोणीतले विनिहितो विजितः प्रशान्तो**
**देवैः स वास्तुपुरुषश्चतुरश्रसंस्थः।।** (वास्तुविद्या– ४/४७)

अपि च

**किमपि किल भूतमभवद् रुन्धानं रोदसी शरीरेण।**
**तदमरगणेन सहसा विनिगृह्याधोमुखं न्यस्तम्।।**
**यत्र च येन गृहीतं विबुधेनाधितिष्ठतः स तत्रैव।**
**तदमरमयं विधाता वास्तुनरं कल्पयामास।।** (बृहत्संहिता ५२/२–३)

वास्तुशास्त्रे निर्माणविषयिकी वार्ता वास्तुपुरुषस्य परिकल्पनां विना नैव भवति। विषयोऽयं वास्तुशास्त्रे सर्वत्र विचारणीयो भवति। ग्रन्थान्तरे वास्तुपुरुषस्य प्रादुर्भावे या चर्चा विद्यते सा भिन्ना–भिन्ना प्रतीयते, किन्तु भूमौ अस्य पुरुषस्य निवासविषये सर्वत्र एकीकृतमतस्य प्रतिपादनम् अनुभूयते।

ईशानगुरुपद्धतौ एतादृशी चर्चा विद्यते–

यथोक्तम्–

**वृतोऽहं यत् ततो नाम्ना वास्तुकोऽसि तथास्तु ते।**
**वसन्तु च त्वयि प्रीताः शतानन्दादिदेवताः।।**
**अद्यप्रभृति भूलोके दैवं वान्यच्च मानुषम्।**
**कुर्वते वास्तु वासार्थं प्रथमं त्वां यजन्तु ते।।**
**पुष्पैश्च धूमदीपैश्च बलिभिश्च विलक्षणैः।**

**त्वं च त्वद्देहसंस्थाश्च पूज्याः स्युर्देवताः क्रमात्।।**
**एवं मयैव विहितं कुर्वतां वास्तुपूजनम्।**
**तदायतनवेश्मादौ वसतां सन्तु सम्पदः।।**
**अकृत्वा वास्तुयजनं प्रासादभवनादिकम्।**
**कृतं तदासुरं सर्वं भूयात् तत्र च यत् कृतम्।।**

— (ईशानशिवगुरुदेवपद्धति क्रियापाद, उत्तरार्ध २६/११७—१२३)




**वास्तुपुरुषस्य संस्थितिः—**

वस्तुपदविन्यास एव वास्तुशास्त्रे वास्तुपुरुषमण्डल भवति। वास्तो निर्माणात् पूर्वं या प्राक्कल्पना भवति सा एव वास्तुयोजना, प्राचीनभारतीयपरम्परायां वास्तुपुरुषस्य आधारपरिकल्पना वैदिकी दार्शनिकी चासीत्। सामान्यतया वास्तुपदविन्यासस्य प्रक्रियायां भवननिर्माणात् पूर्वं निर्धारितभूमौ वास्तुपुरुषस्य यथाभीष्टं स्थापना कृत्वा एव निर्माणकार्यम् अनुष्ठीयते। मुख्यरुपेण चतुषष्टिः, एकाशीतिः, शतपदादिमण्डलानां वास्तुपदरूपे विन्यास एव वास्तुपदविन्यासोऽस्ति। ईशानकोणे वास्तुपुरुषस्य शीर्ष भागो भवति एवमेव नैऋत्यकोणे पादौ भवतः। पदविन्यासोऽपि वर्गाकार—आयताकारादिक्षेत्रेषु अधोमुखं मानवाकृते रचना भवति। वास्तुपुरुषमण्डले सर्वेषु पदेषु पञ्चचत्वारिंशत् देवाः विराजन्ते, एतेषां देवानां विन्यासो मण्डलेऽस्मिन् भवति।





यथोक्तम् वास्तुविद्यायाम्

**ईशे तस्य शिरस्तदा विनिहितं पादौ निर्ऋत्यां स्थितौ**
**वायव्ये च हुताशने च भुजयोः संस्थापितौ कूर्परौ।**
**क्षिप्तं वक्षसि हस्तयोस्तलमः प्रोत्तानतां प्रापित—**
**स्तस्याङ्गेषु च देवता विनिहिता यद्वत् प्रवक्ष्ये तथा।।** (वास्तुविद्या ४/४८)

अपि च

**एकाशीतिपदस्येशदिग्विभागाश्रितं शिरः।**
**माहेन्द्रीसंश्रितं विद्याच्चतुष्षष्टिपदस्य तु।।** (समराङ्गणसूत्रधारः १४/११)

भवननिर्माणकाले वास्तुपुरुषस्य मर्मादि अङ्गेषु वेधो न कर्तव्यः। वेधदोषेण गृहवासीनां कष्टकारकं फलं भवति। सामान्यतः वास्तुपदविन्यास प्रक्रियायां भवनादि निर्माणात् प्राग् निर्धारित क्षेत्रे वास्तुपुरुषस्य स्थापना क्रियते निर्धारित भूमेः दिशानिर्धारणात्पूर्वमेव वास्तुपुरुषस्य विधानं क्रियते। अनेन साकं सम्पूर्णनिर्धारित भूक्षेत्रे वर्गेषु विभज्यते प्रत्येकवर्गः 'वस्तुपदं' इति नाम्ना व्यवह्रीयते। यत् प्रत्येक वर्गस्य पृथक् अधिकारेण रुपेण देवता निश्चियते। सर्वेषां वर्गाणामधिकारिणः देवा सम्भूय वास्तुदेवाः स्थाप्यन्ते। यथा मानवशरीरस्य विभिन्नावयवेषु मूर्धा—मुख—हृदय—जानु—पादाश्च भवन्ति तथैव वास्तुपुरुषस्य स्थापनेऽवयवाः भवन्ति। मर्मादिषु स्थानेषु कोऽपि निवेशः न कर्तव्यः।

यथोक्तम्—

**शिरा मर्माणि वंशाश्च नालमध्यं च सर्वशः।**
**विहाय वास्तुमध्यं च द्वाराणि विनिवेशयेत्।।** (वास्तुप्रवोधः श्लोकः —११५)

अपि च—

**सम्पाता वंशानां मध्यानि समाति—यानि च पदानाम्।**
**मर्माणितानि विन्द्यान्नतानि परिपीऽयेत्प्राज्ञः।।**
**रोगाद्वायुं नयेत्सूत्रं पितृतोऽथ हुताशनम्—**
**एतत्सूत्रद्वयं प्रोक्तं मुनिभिर्वंश संज्ञितम्**
**वितथाच्छोषकं चान्यद् भृशं मुख्यात्तथा भवेत्।**
**जयन्ताद् भृंगराजाख्यं सुग्रीवमदितेस्तथा—**

**एतच्चतुष्टयं प्रोक्तं रज्जुसंज्ञं मनीषीभिः।।** (वास्तुप्रबोधः श्लोकः–१३७)

### वास्तुपदविन्यासः




अनने प्रकारेण शास्त्रोक्तरीत्या गृहनिर्माणावसरे, वास्तुपुरुषस्य विचारः कर्तव्यः यस्मात् प्रभावात् गृहे सुख–शान्ति–धनादिश्च निवसन्ति। अद्य जनसंख्या तीव्रगत्या वर्द्धते तदर्थं सुनियोजितप्रकारेण गृहस्यनिर्माणं सर्वेषां कृतेऽति आवश्यकम् वर्तते।

XXXXXXXXXXXXXXXXX

# भारतीयज्योतिषशास्त्रदृष्ट्या वर्ष–अयन–ऋतु विचारः

**डॉ भूपेन्द्र नारायण झा**[43]

यद्यपि ऋग्यजुः संहितयोः ऐतरेय–तैत्तिरीय–ताण्डय–गोपथब्राह्मणेषु च भांश परिमित दिन संख्यककालवाचके षड्नभांशपरिमित दिन संख्यककालवाचके वा वर्षशब्दस्य प्रयोगो नावलोक्यते। शतपथ ब्राह्मणेतु तदवलोक्यते।[1] 'ऋग्वेदे शरदः शत' मित्यादिना शरदादिऋतु वाचकशब्दो वर्षार्थे प्रयुक्तो दृश्यते। कुत्रचित् संवत्सर–परिवत्सरादिशब्दस्तदर्थे प्रयुक्त आसीदिति। गोपथब्राह्मणे वर्षार्थेहायनशब्दः[2],

[43] सहायक प्रोफेसर, ज्योतिष, विभागाध्यक्ष, राज कुमारी गणेश शर्मा संस्कृत विद्यापीठ कोलहन्टा, पटोरी, दरभंगा –846003

Note- Printout of this paper can be accepted along with CERTIFICATE OF APPRECIATION only for official use.



वाजसनेयिसंहितायां तदर्थे समाशब्दश्चावलोक्यते।[3] ऋग्संहितायां 'समानां मास आकृतिः, इत्यनेन संवत्सरार्थे 'समा' इति प्रयुक्तः।[4]'

संहितास ब्राह्मणेषु च सामान्य प्रमाणाधारेण संवत्सरस्यावधिर्द्वादशमासेषु[5] भांशपरिमितदिवसेषु च विभक्ता आसन्। तद्यथा :–

''द्वादशप्रधयश्चक्रमेकं त्रीणि नाम्यानि क उ तच्चिकेत।
तस्मिन्त्साकं त्रिंशता न शंकवोऽर्पिताः षष्टिर्नचलाचलासः।।''

स्थूलरूपेण वर्षमानं चान्द्रमासीत् यत्सूक्ष्ममानात् षड्नदिवस परिमितिरस्थूलमासीत्। सौरवर्षरूपेण सामवेदस्य निदान–सूत्रे तन्मानं समागच्छति।[6] यत्रोक्तं सूर्यः सप्तविंशतिनक्षत्रे एकस्मिन्नक्षत्रे 131½ दिनानि यावत्तिष्ठति। चान्द्रसौरवर्षयोरन्तरस्य स्फुटीकरणाय तत्रत्य प्रयासादेव तत्कालेऽधिमासक्षयमासयोर्व्यवस्था जाता। परं सा व्यवस्था तदानीं किदृशीति विनिश्चयितुं महत्त्कठिनं निर्णायकप्रमाणाभावात्। यथा –

ऋतुभिर्हि संवतसरः शक्नोति स्थातुम् (श०ब्रा० 6.7.1.18)

त्सिमरमतेन तदर्थमावश्यकप्रमाणानि वर्षतालिकायां समुपलब्धानि येषांसंख्या पञ्चप्रमिता विद्यते अधोलिखितचक्रात्तत्स्फुटं भविष्यतिः –

| वा० सं० | तै० सं० | तै० ब्रा० | का० सं० | ज्यो० |
|---|---|---|---|---|
| संवत्सरः | संवत्सरः | संवत्सरः | संवत्सरः | संवत्सरः |
| परिवत्सरः | परिवत्सरः | इदावत्सरः | परिवत्सरः | परिवत्सरः |
| इदावत्सरः | इदावत्सरः | इदुवत्सरः | इदावत्सरः | इदावत्सरः |
| इद्वत्सरः | इदुवत्सरः | इद्वत्सरः | अनुवत्सरः | अनुवत्सरः |
| वत्सरः | वत्सरः | वत्सरः | उद्वत्सरः | उद्वत्सरः |

उपर्युक्तचक्रात् केवलं नामसु एवान्तरं नावलोक्यते अपितु कुत्रचित् त्रयाणां, कुत्रचित् द्वयोः, कुत्रचित् षण्णां च समुल्लेखा विद्यते। एषु गणनासु संवत्सरादिमानेऽधिमाससम्बद्धार्थे न कोऽपि सन्दर्भो दृश्यते। वैदिकसाहित्येवर्षे

Note- Printout of this paper can be accepted along with CERTIFICATE OF APPRECIATION only for official use.

भांशपरिमितदिवसानां मलमासस्य चावलोकनात्तयोः संगतिकरणाच्च ज्ञायते तदा वर्षः सौरः, मासश्चान्द्रश्चासीत्।[7]

**अयन–विचार :–**

''मैत्रायणि उपनिषदषु उदग्–अयनउत्तरायणइत्यादयः शब्दः विभिन्नस्थानेषु प्राप्नुवन्ति। उदक्अयनस्य पर्यायवाचीशब्दः देवयानः देवलोकः दक्षिणायणश्च पर्यायवाची पितृयानः पितृलोकश्च समुपलभ्येते।''[8]

जैनादिग्रन्थेषु विस्तृतरूपेण उत्तरायण–दक्षिणायणश्च व्यवस्था दिग्दर्शनरूपेण उल्लिखिताः सन्ति। किन्तु जम्बूद्वीपेषु मध्ये सुमेरूपर्वतमस्ति, तत्र सूर्यचन्द्र मासादि समस्त ज्योतिर्मण्डल पर्वतसु परिक्रमां कुर्वन्ति। सूर्यस्य प्रदक्षिणागतिः उत्तरायणस्य दक्षिणायस्य च विभक्तः भागद्वयेन। अपरञ्च अस्य विशिष्टोमार्गः गमनमार्गः त्रिअसिएकसत्तोतर (183) अस्ति। यो सुमेरूपर्वतस्य प्रदक्षिणारूपेण वर्तुलाकारः अस्ति। किन्तु बाह्यकोणः परितः अस्त्येव।[9]

''अयं संवत्सरो द्विधा विभक्त आसीत्। तत्र प्रथमं उत्तरायणम् द्वितीयं दक्षिणायनम्।[10]'' तद्यथाः – ''तस्मादित्यः षण्मासो दक्षिणेनैति षड्त्तरेण''[11] मकर कर्कट योर्याम्यसौम्यायनं निरूक्त मितिवचनेन याम्यायनसौम्यायनयोः प्रारम्भकालो ज्ञायते। ज्योतिषगणितोक्तायनस्य व्यवहारेऽपि सर्व मान्यत्वं विद्यते। शतपथब्राह्मणे अयनसंबंध–विवेचनम् अस्ति। यथा :–

''वसन्तो ग्रीष्मो वर्षाः। ते देवा ऋतवः शरद्धेमन्तः शिशिरस्ते पितरो..... स (सूर्यः) यत्रोदगावर्तते। देवेषु तर्हि भवति यत्र दक्षिणा वर्तते पितृषु तर्हि भवति।। '' (श0ब्रा0 2.1. 3)

यद्यपि एषु वाक्येषु उदगयनदक्षिणायन शब्दौ कुत्रापि न कथितौ तथापि यतः सूर्यः सौम्यदिशि आवर्तितो याति ततः षड्मासान् देवेषु (देवलोकेषु) निवासं करोति, तेषां वसन्तग्रीष्मवर्षर्त्तवो जायन्ते। अतो जायते यदा सूर्यो विषुवतः सौम्यदिशितदोत्तारायणं, यदा याम्यदिशि तदा याम्यायनम्''। तद्यथा :–

''य...उदगयने प्रमीयते देवानामेव महिमानं गत्वादित्यस्य सायुज्यं गच्छत्यथ यो दक्षिणे प्रमीयते पितृणामेव महिमानं गत्वा चन्द्रमसः सायुज्यं– सलोकतामाप्नोति।





(नारा0 उ0 अनु060) अथास्य वैदिकसाहित्येन पोषणं न जायते। वैदिक ज्यौतिषसिद्धान्तेनापि तत्पोषणं पूर्णतया न जायते तत्र तन्महत्वस्याऽभावात।[12] अतस्तन्मतं मन्दं प्रतिभाति। ऋग्वेदे संक्रान्तीनां सन्दर्भः सन्दिग्धत्वेन जायते।

''सूर्यः यदा जम्बूद्वीपस्यान्तिम आभ्यान्तर मार्गात् वहिः निकषति तदा लवणसमुद्रस्य दिशां गच्छति। तदा वाह्य लवण समुद्रस्यान्तिम मार्गस्योपरि गमन पर्यन्तं यद् कालं तद् दक्षिणायणस्य च यदा सूर्यलवणसमुद्रस्यान्तिम मार्गे भ्रमणं करोति तदा आभ्यन्तर जम्बूद्वीपस्य दिशां अनुसरति, तदा उत्तरायणसूर्यः उच्यते।

अतएव स्पष्टो भवति उदयकालस्यान्तिम शताब्द्यां उत्तरायणस्य दक्षिणायणस्य च ज्योतिषशास्त्र दृष्ट्या महानसुक्ष्मविचारः तद् कालात् एव आगतः आसीत्। भारतीयाचार्याः अस्मिन् शोध विषये महानविचारः उपस्थापितः पुष्पितः पल्लवितः मन्ये वर्द्धितश्च।''[13]

कस्यचित् मतेन अयनस्यलक्षणम् :–

**आश्लेषार्द्धाद्दक्षिणमुत्तरमयनं रवेर्धनिष्ठाद्यम्।**

**न्यूनं कदाचिदासीद्येनोक्तं पूर्वशास्त्रेषु।।**[14]

**वराहमिहिरस्य स्वमतेनः–**

**साम्प्रतमयनं सवितुः कर्कटकाद्यं मृगादितश्चान्यत्।**

**उक्ताभावो विकृतिः प्रत्यक्षपरीक्षणै र्व्यक्तिः।।**[15] **इति।।**

**मानसागर्य्याम् :–**

मकरादिगते षट्के सूर्यस्यैवोत्तरायणम्।

कर्कादिषट्कगे सूर्ये दक्षिणायन मुच्यते।। (मा0सा0पृ0 26, श्लोक–1, संस्करण 2000)

मकरादिगत् षट्सु राशिषु यदा भाष्करः अवस्थितो भवति, तदा उत्तरायण कर्कस्य च, तथा धनुपर्यन्तं षट्सुराशिषु सूर्यः तिष्ठति, तदा दाक्षिणायनोभवति। एवञ्च शिशिर–वसन्त–ग्रीष्म एभिः ऋतुभिः उत्तरायणमुच्यते। एवञ्च तदेव देवानांदिनं भवति। अवशिष्टऋतवः वर्षा–शरद–हेमन्तश्च एभिः ऋतुभिः दक्षिणायनं कथ्यते तदेव देवानां रात्रिर्भवति।

## ऋतुविचारः

ऋग्वेदे तदनन्तरे च ऋतुशब्दस्य प्रयोगो वहुत्र जातः। बहुधा वर्षमध्ये ऋतुत्रयाणां परिकल्पना दृश्यते।[16] ''परंतन्नाम नैवदृश्यते। ऋग्वेदे एकत्र वसन्तग्रीष्मशरदतूनामुल्लेखो दृश्यते। अथर्ववेदे ऋग्वेदे च वर्षाशीतऋत्वोरपि ज्ञानमासीत्। तैत्तिरीयब्राह्मणे ऋतुनां संख्याः पंचप्रमिताः स्वीकृताः। तद्यथाः पञ्च शारदीयेन यजेत्। पञ्च वा ऋतवः संवत्सरः'' अथ यदा पंचर्त्तवः स्वीक्रियन्ते तदा हेमन्तशिशिरयोः सम्वेतादेकैव ऋतुरासादिति ज्ञायते। ''पूराकालेएव उदयकालऋतुविचारः क्रियते स्मः। ई0 पू0 8000 इस्वीतमे वसन्तऋतुरेव आदिऋतुरूपेण आचार्यैः गणना कृतमासीत्। किन्तु ई0 पूर्व 500 इस्वीतमे प्रारंभिक ऋतु वर्षाऋतुरूपेण स्वीकृतमासीत्। इदम् सर्वं तैत्तरीय संहितायां लिखितम् वर्त्तते।'' (भा0 ज्यो0 पृ0 50)

''मधुश्च माधवश्च वासन्तिकावृतू शुक्रश्च शुचिश्च ग्रैष्मावृतू नभश्च वार्षिकावृतू इषश्चोर्जश्च शारदावृतू सहश्च सहस्यश्च हैमन्तिकावृतू तपश्च तपस्यश्च शैशिरावृतू।''

(तै0सं0 4.4.11)।

''द्वादशमासाः पञ्चर्तवो हेमन्त शिशिरयोः समासेन।'' (ऐ0ब्रा0 1.1 )

''तस्य ते वसन्तः शिरः। ग्रीष्मो दक्षिणः पक्षः। वर्षः पुच्छम्। शरदुत्तरः पक्षः। हेमन्तो मध्यम्।'' (तै0 ब्रा0 3, 10, 4, 1)

''ऐषु ऋतुषु क आदिरिति जिज्ञासायां तैत्तिरीयसंहितायां कथितो यदृतूनां प्रारंभः कुतो भवतीतिस्फुटतया न ज्ञायते। यथाः–

''उभयतो मुखमृतुपात्रं भवति को हि तद्वेदः यदृतूनां मुखम्।'' (तै0 सं0 – 6,5,3)

प्रजापतेर्ह वै प्रजाः ससृजनास्य पर्वाणि विसस्त्रग्वं सुः स वै संवत्सर एव प्रजापतिस्तस्यैतानि पर्वाण्यहोरात्रयोः सन्धीपौर्णमासीचामावास्या चतुर्मुखानि।। स विस्त्रस्तैः पर्वभिः न शशाक सग्वं हातुं तेमेतैर्हविर्यज्ञैर्देवा अभिषज्यन्नग्निहोत्रेणै वाहोरात्रयो : सन्धी तत्पर्वाभिषज्यंस्तत्समदधुः पौर्णमासेन चैवामावास्येन च पौर्णमासींचामावास्यां च तत्पर्वाभषज्यंस्तत्समदधुश्चातुर्मास्यैरेवतुर्मुखानि तत्पर्वाभिषज्यंस्तत्समदधुः।। (शतपथ ब्राह्मण 1,6,3)

Note- Printout of this paper can be accepted along with CERTIFICATE OF APPRECIATION only for official use.



ऋतूनां क आदिः कश्चमध्यइति विषयेऽपि तैत्तिरीयब्राह्मणे प्रभूतविचारो जातः। वस्तुतः ऋतवः सूर्यस्थितौ अवलम्बिताः सन्ति। सौरस्य तिथयः सदैवानिश्चिताः सन्ति। कल्पतेकदाचित् सौरचान्द्रमासयोः प्रारम्भ एकदैव जातस्तदाऽग्रिमवर्षे शुक्लद्वादश्यां ततोऽग्रिमवर्षे कृष्णाष्टम्यां सौरमासारंभो जायते। अतएव ऋत्वारम्भिकतिथेरनिश्चितत्वं ज्ञायते तज्ज्ञानं महत्कठिनमिति। ऋतुवशेन सूर्यवर्ण फलम् :–

ताम्रः कपिलो वार्कः शिशिरे हरिकुंकुमच्छविश्च मघौ।

आपाण्डुकनवर्णो ग्रीष्मे वर्षासु शुक्लश्च।।

शरदि कमलोदराभो हेमन्ते रूधिरसंनिभः शस्तः।

**प्रावृट्काले स्निग्धः सर्वर्तुनियोऽपि शुभदायी।।**[17]

**ऋतुषु रवेः अशुभवर्णाः–**

**ग्रीष्मे रक्तो भयकृद्वर्षा स्वसितः करोत्यनावृष्टिम्।**

**हेमन्ते पीतोऽर्कः करोति न चिरेण रोगभयम्।।**

**सुरचापपाटित तनुर्नृपति विरोधप्रदः सहस्त्रांशु।**

**प्रावृट्काले सद्यः करोति विमलद्युतिर्वृष्टिम्।।**

**वर्षाकाले वृष्टिं करोति सद्यः शिरीषपुष्पाभः।**

**शिखिपत्रनिभः सलिलं न करोति द्वादशाब्दानि।।**

वृ0 सं0 आचाराध्याय श्लोक – 26, 27, 28

मृगादिराशिद्वय भानुभोगात् षट्कं ऋतुनां शिशिरो वसन्तः।

ग्रीष्मश्च वर्षा शरदश्च तद्वद्धेमन्तनामा कथितोऽत्र षष्ठः।।[18] मा0सा0पृ0–27, श्लोक–1

मकरादिद्वयराशयोः सूर्यस्य अवस्थिते शिशिरो – वसन्तः ग्रीष्मश्च इत्यादि षट्ऋतवाः भवन्ति।

**संदर्भ**


1. श0 ब्रा0 2/2/3
2. गो0 ब्रा0 6/17
3. वा0 सं0 19/46
4. ऋ0 सं0 10/85/05


Note- Printout of this paper can be accepted along with CERTIFICATE OF APPRECIATION only for official use.

5. तै0 सं0 7/5/1
6. नि0 सू0 5/12, 2/5
7. भा0ज्यो0 दी0 43–44 पृ0
8. भारतीय ज्योतिष टीका – 51, 52 पृ0 ले0 नेमिचद शास्त्रीकृत, संस्करण 1998
9. भारतीय ज्योतिष टीका – 51, 52 पृ0 ले0 नेमिचद शास्त्रीकृत, संस्करण 1998
10. ग्रहस्पष्टीकरणम्, लेखक–डॉ0 चंद्र किशोर झा, प्रकाशन वर्ष'1995
11. तै0 सं0 6/5/3
12. थिवोः इन्डियन एन्टीक्लेरी 24/96
13. भा0 ज्यो0 टीका पृ0 52, ले0 नेमिचंद्र शास्त्री, सं0 1998
14. वृहत्संहिता आदित्यचाराध्यायः श्लोकः –1,2
15. तत्रैव
16. ऋ0 सं0 – 1/164/2
17. वृ0 सं0 आदित्यचाराध्यायः श्लोकः – 23, 24
18. मानसागरी

XXXXXXXXXXXXXXXXXXXXXX

# अर्थवैचित्रे श्रीहर्षप्रयुक्ताः शब्दाः

**साधनकुमारपात्रः**[44]

शब्दाः वहमानाः । अस्मादेव कारणात् काले काले शब्दस्य अर्थवैचित्रं परिलक्ष्यते । अपि च कवेः अभिप्रेतार्थप्रकाशार्थं शब्दस्य एका गुरुत्वपूर्णा भूमिका अस्ति । नैषधचरिते महाकविना श्रीहर्षेण बहवः शब्दाः प्रयुक्ताः ये चतुर्षु

[44] संस्कृताध्यापकः, प.बङ्गाल





महाकाव्येष्वपि ( किरातार्जुनीये, रघुवंशे, कुमारसम्भवे, शिशुपालबधे च ) दृश्यन्ते । किन्तु तत्र शब्दाः यस्मिन्नर्थे प्रयुक्ताः नैषधचरिते कविना ते शब्दाः भिन्नार्थे व्यवहृताः । मम समीक्षायामत्र श्रीहर्षस्य शब्दाः कालिदास-भारवि-माघकविभिः प्रयुक्तैः शब्दैः अमरकोषेन च सह पर्यालोच्यन्ते । शब्दानामर्थाश्चात्र जयन्ती-प्रकाशटीकाद्वयमनुसृत्य प्रदर्श्यन्ते । निम्नलिखितेन प्रकारेण श्रीहर्षप्रयुक्ताः शब्दाः पर्यालोच्यन्ते । यथा --

१. मूलशव्दः तस्यार्थश्च ।
२.शव्दानां अर्थप्रदर्शनकाले नैषधचरितं शिशुपालवधं किरातार्जुनीयं कुमारसम्भवं रघुवंशञ्च एतेषां ग्रन्थानां यथाक्रमं उल्लेखो भविष्यति । किन्तु यस्मिन् महाकाव्ये शव्दस्य उल्लेखः नास्ति तत्र( -- ) इति चिह्नं उल्लिखितव्यम् ।
३. भिन्नार्थां शव्दानां अर्थवैविध्यमपि उल्लिखिष्यते ।
तथाहि केचित् शव्दाः निम्ने उल्लिख्यन्ते --

१. अङ्ग (क्लीव) : छदिःस्तम्भवस्त्रादि ।
२. नैषध.(१२/७१) -- -- -- -- -- ।
३. : गात्रम् ।
४. नैषध.(१२/७१) शिशुपाल.(३/९) किरात.(७/१६, ११/५) कुमार.(३/२२) रघु.(३/६८) अमर.(१९०/२१५) ।
५. : मन्त्रकौशलादि ।
६. नैषध. (१४/८०) -- -- -- -- -- ।
मन्तव्यम् : शब्दोऽयं महाकविना माघेन भारविना कालिदासेन च एकार्थे प्रयुक्तः श्रीहर्षेण तु त्रिविधार्थे व्यवहृतः ।
१. अजर्य (क्लीव) : अविनश्वर (विण) ।
२. नैषध.(९/६८) -- -- -- -- -- ।
३. : मैत्रम् ।
४. नैषध.(९/६८) -- -- -- -- रघु.(१८/७) -- ।
मन्तव्यम् : शब्दोऽयं महाकविना श्रीहर्षेण द्विविधार्थे, कालिदासेन च एकार्थे

प्रयुक्तः ।

१. अतनु (पुं) : अनङ्गः ।
२. नैषध. (३/१०२) -- -- -- -- -- ।
३. : महान् ।
४. -- शिशुपाल.(७/६६) किरात.(४/३८, १०/१३) -- -- -- ।
मन्तव्यम् : शब्दोऽयं महाकविना माघेन भारविना च एकार्थे प्रयुक्तः श्रीहर्षेण तु भिन्नार्थे व्यवहृतः ।

१. अरित्र (क्लीव) : वर्म्म ।
२. नैषध. (१२/७१) -- -- -- -- -- ।
३. : केनिपातकदण्डः ।
४. -- शिशुपाल. (१२/७१) -- -- -- अमर.(९२/६४) ।
मन्तव्यम् : शब्दोऽयं महाकविना श्रीहर्षेण एकार्थे प्रयुक्तः माघेन तु भिन्नार्थे व्यवहृतः ।

१. आञ्चित (क्लीव) : आकृष्टम् ।
२. नैषध. (११/९६) -- -- -- -- -- ।
३ : कम्पितम् ।
४. -- शिशुपाल. (१३/४) -- -- -- -- ।
मन्तव्यम् : शब्दोऽयं महाकविना श्रीहर्षेण माघेन च भिन्नार्थे प्रयुक्तः ।

१. आनद्ध (क्लीव) : मुरजादिवाद्यम् ।
२. नैषध. (१५/१६) -- -- -- -- अमर. (७२/३६६) ।
३. : व्याप्त (विण) ।
४. -- -- किरात. (१६/२५) -- -- -- ।
मन्तव्यम् : शब्दोऽयं महाकविना श्रीहर्षेण भारविना च भिन्नार्थे प्रयुक्तः ।





१. आलिङ्ग्य (पुं) : गोपुच्छसमानक्रमिककृशवाद्ययन्त्रविशेषः ।
२. नैषध. (७/६६) -- -- -- -- -- ।
३. : आलिङ्गनयोग्यम् ।
४. नैषध. (७/६६) शिशुपाल. (११/३८) -- -- -- अमर.(७२/३७१) ।
मन्तव्यम् : शब्दोऽयं महाकविना माघेन च एकार्थे प्रयुक्तः श्रीहर्षेण तु द्विविधार्थे व्यवहृतः।
१. उपान्त (पुं) : सम्मुखपूर्वभागः ।
२. नैषध. (१२/८७) -- -- -- -- -- ।
३. : प्रान्तम् ।
४. नैषध. (१२/१०१) -- किरात. (५/३५, ८/३८) कुमार. (३/६९,७/३२) रघु. (७/२४,५०) -- ।
मन्तव्यम् : शब्दोऽयं महाकविना भारविना कालिदासेन च एकार्थे प्रयुक्तः श्रीहर्षेण तु द्विविधार्थे व्यवहृतः ।
१. ऐन्दव (पुं) : चन्द्रोपासक (विण) ।
२. नैषध. (११/७६) -- -- -- -- -- ।
३. : चान्द्रम् ।
४. -- -- -- कुमार. (८/७०) -- -- ।
मन्तव्यम् : शब्दोऽयं महाकविना श्रीहर्षेण कालिदासेन च भिन्नार्थे प्रयुक्तः ।
१. कठिनी (स्त्री) : खटिका ।
२. नैषध. (१०/८७) -- -- -- -- -- ।
३. : कठिन (विण) ।
४. -- -- किरात. (१/३६) -- -- -- ।
मन्तव्यम् : शब्दोऽयं महाकविना श्रीहर्षेण भारविना च भिन्नार्थे प्रयुक्तः ।
१. कलित (विण) : गृहीतः ।
२. नैषध. (१०/३९) -- -- -- -- -- ।
३. : विचारितः ।
४. -- शिशुपाल. (७/४६) -- -- -- -- ।
५. : योजितम् ।

६. -- -- किरात. (१०/४८) -- -- -- ।

मन्तव्यम् : शब्दोऽयं महाकविना श्रीहर्षेण माघेन भारविना च भिन्नार्थे प्रयुक्तः।

## सहायकग्रन्था:


१. आचार्यः, नारायणः सम्पादितं, नैषधचरितम्, बोम्बाइ : निर्णयसागर प्रेस, १९५२ ।
२. दास, करुणासिन्धु अनुवादित, संस्कृत साहित्य सम्भार ( चतुर्दश खण्ड), कलिकाता : नबपत्र प्रकाशन, १९८२।
३. भट्टाचार्य, गुरुनाथ विद्यानिधि सम्पादित, अमरकोष, कलिकाताः संस्कृत पुस्तक भाण्डार, बङ्गाब्द - १४१७ ।
४. शर्मा, शिवदत्तः सम्पादितं , नैषधचरितम् , बोम्बाइ , १९१२ ।
५. सिद्धान्तवागीशः, हरिदासः सम्पादितं, नैषधचरितम् (१-११), नकिपुर, १८४९ ।
६. सिद्धान्तवागीशः, हरिदासः सम्पादितं, नैषधचरितम् (१२-२२), कलिकाता, १८७१ ।
७. सिद्धान्तवागीशः, हरिदासः सम्पादितं, शिशुपालबधम्, कलिकाता : सिद्धान्त बिद्यालय, शकाब्द- १८८२।
८. झा, रामचन्द्रः सम्पादितं, रघुवंशमहाकाव्यम्, वाराणसी : चौखम्बा कृष्णदास अकादमी, २००७ ।
९. मालवीयः, सुधाकरः सम्पादितं, कुमारसम्भवम्, वाराणसी : चौखम्बा कृष्णदास अकादमी, २००९ ।
१०. मिश्रः, बदरीनारायणः सम्पादितं, किरातार्जुनीयम्, वाराणसी : चौखम्बा सुरभारती प्रकाशन, २००८ ।


XXXXXXXXXXXXX

# बुद्धिस्वरूपम्

श्यामबिहारीचौधरी[45]

इह संसारे यानि गुरुकार्याणि तानि बुद्धिमद्भिरेव कृतानि न कदापि जडमतिभिः। पुरा आधुनिके वा युगे यानि सारभूतानि वैज्ञानिकानि वा कार्याणि दृश्यन्ते तानि सर्वाण्यपि बुद्धिमद्भिः विज्ञानवेतृभिरेव सम्पादितानि। कस्यचिदपि कार्यस्य सम्पादने बुद्धिरेव प्रधानभूतं साधनं विद्यते मानवानाम्। गीतायामपि भगवता श्रीकृष्णेन बुद्धेर्महत्त्वं प्रतिपादितम्।

**तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्।**
**ददामि बुद्धियोगं तं येन मामुपयान्ति ते।।**[46]

[45] शोधच्छात्रः, ला.ब.शा.सं.विद्यापीठम्, नवदेहली
[46] गीता 10/10

Note- Printout of this paper can be accepted along with CERTIFICATE OF APPRECIATION only for official use.



अथ का नाम बुद्धिः? तत्रोच्यते। 'बुद्धिर्बोधनात्' यया बलाद् विषया समवबोध्यन्ते ज्ञायन्ते सा बुद्धिः। अथवा बुध्यते अनेनेति व्युत्पत्तेः। बुद्धिर्हि ज्ञानात्मिका शक्तिविशेषा। बुद्धिमान् हि मानवो यस्मिन् कस्मिन् वापि विषये पदमाधत्ते तस्मिन्नेव विषये स्वबुद्धिचमत्कारं प्रदर्शयति। सत्यमेतत् किन्तु नायं सार्वत्रिको नियमः। कस्मिंश्चिद् विषये निपुणतरोऽपि कश्चित् विषयान्तरे जाड्यं प्रदर्शयति। अतः व्यक्तिभेदात् बुद्धिभेदा अपि जायन्ते। स च बुद्धिभेदः कमार्नुबन्धी भवति। बुद्ध्यस्तावत् त्रिविधा दृश्यन्ते–बोधात्मिका, प्रेरणात्मिका, उभयात्मिका च। तासु बोधात्मिका सामान्या, प्रेरणात्मिका च विशिष्टा, उभयात्मिका पुनः सविशेषा भवति। सविशेष बुद्धिमन्तो हि मानवाः विशिष्टा महान्तश्च जायन्ते। त एव मेधाविन इति पदेन व्यपदिश्यन्ते। तथा च श्रुतिः –

**यां मेधां देवगणाः पितरश्चोपासते**
**तया मामद्य मेधया मेधाविनं कुरु**[47]

प्रेरणात्मिका हि बुद्धिः सदा फलवती भवति। बुद्धिर्हि ज्ञापयति खलु यथार्थ तत्वम्। प्रेरणा च पुनः मानवं बुद्धिसंगतं तत्त्वं क्रियान्वयी कर्तुं प्रचोदयति तदेतद्बुद्धिप्रेरणयोः ज्ञानकर्मणो वा फलं कठिनतरेषु असम्भवप्रायेषु कार्येष्वपि सर्वागीणा सिद्धिरिति। अतएव अयमेव महतामुपदेशो यत् बुद्धितत्त्वं सर्वात्मना पालनीयम्। सा च बुद्धिः पुनः द्वेधा प्रदिष्टा मनोविज्ञानपण्डितैः व्यवसायात्मिका, संशयात्मिका च। व्यवसायात्मिका बुद्धिद्वारा कृतसंकल्पतया समारब्धा उद्योगा विघ्नैः पुनः पुनरपि प्रतिहन्यमाना आसिद्धयवधि प्रचलन्त्येव न कथंचिदपि विरता भवति।[48]

व्यवसायात्मिकाबुद्धिविषये श्रीमद्भगवद्गीतायां भगवता श्रीकृष्णेनापि प्रतिपादितम्। यथा –

**व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन।**
**बहुशाखाह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम्।।**[49]

अपि च – **बुद्धि निश्चय रूपैवं जडा सतैव निश्चयः।**
**खातेनेव सरिन्नूनं साहंकारेण वाहते।।**[50]

बुद्धिर्हि तावत् ज्ञानस्य साधनं, ज्ञानस्योपकरणम्। सा पुनश्चेतना। परं चितिशक्तेः सान्निध्यतात् अयस्कान्त मणिकल्पा सा चितिशक्तेः प्रतिबिम्बोद्ग्राहितया चैतन्यरूपतां विभ्राणार्थाकारपरिणतार्थमवबोधयति तेन योऽसौ तत्तदार्थाकार– परिणतार्थमवबोधयति तेन योऽसौ तत्तदार्थाकारपरिणामो बुद्धेः सा ज्ञानलक्षणावृत्तिरिति पदेन व्यवह्रियते।

आधुनिके युगे यानि नूतनानि आविष्काराणि टेलीग्राफ–टेलीफोन–रेडियो–एक्सरे–टेलीविजन–वायरलेस–एरोप्लेन–रेलवे–टैंक–टारापीडो–राकेटादीनि सन्ति तानि सर्वाणि मनुष्यबुद्ध्यैव निष्पादितानि सन्ति। अद्य मानवः स्वबुद्धिबलेनैव चन्द्रलोकं जिगमिषति।

[47] यजु. 32/14
[48] प्रारभ्यते न खलु विघ्नभयेननीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारभ्यमुत्तमजनाः न परित्यजन्ति।। सुभाषितानि
[49] गीता 2/41
[50] योगवासिष्ठ 109

Note- Printout of this paper can be accepted along with CERTIFICATE OF APPRECIATION only for official use.

मानवाः बुद्धिशक्त्यैव मृगेभ्यः उत्कृष्टाः भवन्ति। 'यस्य बुद्धिः बलं तस्य निर्बुद्धेस्तु कुतो बलम्'[51] इति विष्णुशर्मा कथयति। पूर्वकाले बहुविषयकज्ञान(Knowledge)संपादनमेव शिक्षणस्य परमोद्देश्यमासीत्। शास्त्रेषु प्रतिपादितानां सर्वेषां विषयाणां बुद्धौ आरोपणमेव शिक्षणमिति प्रत्ययः पूर्वकाले। एवं ज्ञानवन्तोऽपि बहवः प्रज्ञानवन्तः (Wise) नासन्। लब्धस्य ज्ञानस्योपयोगे यत् कौशलं वर्तते तस्य प्रज्ञानमिति नाम। अधीतशास्त्रा अपि केचित् अक्रियाशीलाः अलोकज्ञाश्चावर्तन्त।[52] 'वनौकसोऽपि सन्तो लोकज्ञा वय'मिति[53] सश्लाघमात्मानं वर्णयति महर्षिः कण्वः। ज्ञानं ज्ञानार्थमिति अयं सिद्धान्तः नांगीक्रियतेऽधुना। लौकिकज्ञानस्य स्वयं पुरुषार्थत्वं न भवति।

**बुद्धेः विषये** मनोवैज्ञानिकेषु प्रायः मतभेदो एव दरीदृश्यते। वस्तुतः मनोवैज्ञानिकैः बुद्धेः स्वरूपस्य सम्बन्धे विभिन्नाः धारणाः प्रस्तुताः।

**वुडवर्थः** – बुद्धिः कार्यं सम्पादनाय एका विधिः वर्त्तते।

**वुडरो** – बुद्धिः ज्ञानार्जनस्य क्षमता।

**बिने** – बुद्धिः चतुर्षु शब्देषु सन्निहिता ज्ञानं, आविष्कारं, निर्देशं, आलोचना च।

**स्टर्च** – बुद्धिः व्यक्तेः सा क्षमता यया सः चेतनत्वं संप्राप्य नूतनावश्यकतानुसारं चिन्तयति। एषा जीवनस्य नूतनसमस्यानां स्थितीनां चानुसारम् आत्मानं तदनुरूपं निर्माणाय एका सामान्या मानसिकी योग्यता वर्तते।

**डेबिड वैश्चलरः** – बुद्धिः व्यक्तेः सा संयुक्ता क्षमता वर्तते यया सह उद्देश्यपूर्णं कार्यं विदधाति, विवेकपूर्णं चिन्तयति, स्ववातावरणं च प्रभावोत्पादकरूपेण जीवति।

बुद्धेः सम्बद्धानां विभिन्नपरिभाषाणामनुसारं बुद्धिः निम्नांकितयोग्यता वर्तते।

1. अधिगमयोग्यता।
2. अमूर्तचिन्तनस्य योग्यता।
3. समस्यायाः समाधानस्य योग्यता।
4. अनुभवस्य लाभयुक्ता योग्यता।
5. स्ववातावरणेन सह सामंजस्यं स्थापनयोग्यता।

**बुद्धिपरीक्षणेन ज्ञाताः केचन अंशाः** – बुद्धिमापनप्रक्रियामुपयुज्य बहवो विज्ञानिनः तत्र तत्र बहूनां बालानां बुद्धिं परीक्ष्य कानिचन तत्वानि सर्वजनसाधारणानि दृष्टवन्तः।

(अ) बुद्धिः जनतामध्ये कियत्या मात्रया प्रसृता वर्तते इति इदानीं ज्ञायते। अस्य बुद्धिप्रसरः इति नाम। अत्र बुद्धिसंख्यानुगुणं जनाः विभक्ता वर्तन्ते। अनन्तरं जनानां संख्याः प्रतिशतरूपेण निर्दिश्यन्ते।

i. बुद्धिसंख्या – 140 ततः उपरि वा यस्य सः प्रतिभावान् उच्यते।

[51] पंचतन्त्र (विष्णुषर्मा)
[52] षास्त्राण्यधीत्यापि भवन्ति मुर्खाः, यस्तु क्रियावान् पुरुषः स विद्वान्।
सुचिन्तितं चौषधमातुरानां न नामामात्रेण करोत्यवद्यम्।।
[53] अभिज्ञानषाकुन्तले





| | | |
|---|---|---|
| ii. | बुद्धिसंख्या – 120 – 140 यस्य सः | अत्युत्कृष्टबुद्धिः उच्यते। |
| iii. | बुद्धिसंख्या – 110 – 120 यस्य सः | उत्कृष्टबुद्धिः उच्यते। |
| iv. | बुद्धिसंख्या – 90 – 110 यस्य सः | सामान्यबुद्धिः उच्यते। |
| v. | बुद्धिसंख्या – 80 – 90 यस्य सः | मन्दबुद्धिः उच्यते। |
| vi. | बुद्धिसंख्या – 70 – 80 यस्य सः | दुर्बलबुद्धिः उच्यते। |
| vii. | बुद्धिसंख्या – 50 – 70 यस्य सः | क्षीणबुद्धिः उच्यते। |
| viii. | बुद्धिसंख्या – 25 – 50 यस्य सः | मूढः उच्यते। |
| ix. | बुद्धिसंख्या – 0 – 25 यस्य सः | जडः उच्यते। |

जनसमाजे प्रतिशतांशरूपेण बुद्धिमतामबुद्धिमतां च जनानां संख्या कथं वर्तत इत्युच्यते।

| | |
|---|---|
| प्रतिभावन्तः | 1% |
| अत्युत्कृष्टबुद्धयः | 6% |
| उत्कृष्टबुद्धयः | 13% |
| सामान्यबुद्धयः | 60% |
| मन्दबुद्धयः | 13% |
| दुर्बलबुद्धयः | 6% |
| क्षीणबुद्धिप्रभृतयः | 1% |

लोके प्रायशः सामान्यबुद्धयोऽधिका वर्तन्ते। प्रतिभावतां संख्या यावती तावत्येव क्षीणबुद्धयादीनां संख्या वर्तते। एवं अत्युत्कृष्ट–उत्कृष्टबुद्धीनां दुर्बलमन्दबुद्धीनां च संख्यापि समैव।

पूर्वकाले स्थितानां अतिबुद्धिमत्वेन प्रथितानामपि केषांचित् बुद्धिसंख्या तेषां ग्रन्थादीनां परीक्षणेन कृता वर्तते।

| | |
|---|---|
| गाल्टन (Galton) | 200 |
| पोप् (Pope) | 160 |
| टेनिसन् (Tennyson) | 155 |
| मिल्टन् (Milton) | 145 |

टेरमन् (Terman) महोदयः तत्तद्वृत्तिषु ये उत्कर्षं प्राप्तवन्तः तेषां बुद्धिसंख्या कियती वर्तते स्म इत्यपि दृष्टवान्। तन्मतानुसारेण बुद्धिसंख्या दीयते।

| | | |
|---|---|---|
| 1. | तत्त्वदर्शिनः | 170 |
| 2. | कवयः, कलाभिज्ञाः, नीतिनिपुणाश्च | 160 |

3. विज्ञानिनः 155
4. संगीतविद्वांसः 145

**निष्कर्षः –** वैयक्तिकभेदे प्रधानं कारणं वंशपरम्पराधर्मः। बालः न केवलं स्वमातापितृभ्यां किन्तु ततः पूर्वतनेभ्योऽपि स्वमूलपुरुषेभ्यः गुणान् प्राप्नोतीति पूर्वमेवोक्तम्। एवं वातावरणमपि तदीयबुद्धिविकासे शरीराभिवृत्तौ च कारणं भवति। यमजौ समे वातावरणे वर्धितौ समौ स्याताम्। विभिन्ने वातावरणे संवर्धितयोरनयोः भेदो विलोक्येत। आकृतिः बुद्धिश्च वंशधर्मेण प्राप्ते भवतः। रुचि–चारित्र–अभिवृत्ति–प्रभृतयः वातावरणेन जायन्ते। जायमानदशायां स्थिताः गुणा एव पश्चात् वयसः परिपाकानुगुणं विकासं प्राप्य परस्परभेदातिशयं जनयन्ति। बाल्ये अप्रतीयमानो भेदः अस्यां दशायां स्पष्टं प्रतीयेत। जात्या देशेन च भेदो जायते किमित्यत्रा अभिज्ञाः निश्चितं उत्तरं दातुं असमर्था वर्तन्ते। विभिन्नजातीयेषु (नीग्रोप्रभृतिषु) यो भेदः गुणकृतो वर्तते स एव भेदः एकजातीयेष्वपि वर्तते इति इदमेवात्र निदानमनिश्चये। संस्कृतिकृतो भेदः दृश्येत। एवं लिंगकृतोऽपि भेदो वर्तते। स्त्रियः शारीरधर्मे क्लेशासहिष्णवः, पेशलाश्च। परं विद्याविषये तासां यूनां च नास्ति भेदः।

परं एतानि वास्तविकीं स्थितं तिरोधातुम् अथवा असतीं कर्तु न प्रभवेयुः। कक्ष्यासु वर्तन्त एव विभिन्नशक्तयो बालाः। ततश्च त्रिविधेष्वपि विद्यार्थिषु पृथक् अवधानं देयमेव। व्यक्तिगतं भेदं विचिन्त्यैवाधुना, मार्गप्रदर्शनाय वृत्तिग्रहणोपदेशाय च पृथगुपायः स्वीकृतो वर्तते। छात्राणां मानसशक्तिं विज्ञाय कीदृश्यां विद्यायां अयं श्रेयः प्राप्नुयादिति निश्चित्य तादृशविद्याग्रहणायोपदेशकरणमेव मार्गप्रदर्शनमित्युच्यते। एवमेव बालस्याभिवृत्तिं, शक्तिं, औद्योगिकसन्दर्भं च पर्यालोच्य कां वृत्तिं ग्रहीतुमयं योग्यः स्यादिति अवगत्य तादृशवृत्तिग्रहणाय प्रशिक्षणं प्राप्तुं यः उपदेशः क्रियते तस्य 'वृत्तिग्रहणोपदेश' इति नाम। स्वाभिरुच्यनुगुणवृत्तिग्रहणे जीवनं भव्यं भवति। मनश्च तुष्टिं प्राप्नोति।

**सन्दर्भग्रन्थाः**


1. श्रीमद्भगवद्गीता, गीताप्रेस, गोरखपुर
2. वे. श्री. वेंकटराघवाचार्य, शिक्षामनोविज्ञानम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, पुनर्मुद्रणम्, 1982
3. पाण्डेय, रामशकल, शिक्षामनोविज्ञान, विनय रखेजा आर. लाल बुक डिपो, मेरठ, 2008
4. सिंह, प्रो. अरुण कुमार, शिक्षामनोविज्ञान, भारती भवन, पटना, पुनर्मुद्रण 2009
5. अस्थाना, डा. विपिन, श्वेता, मनोविज्ञान और शिक्षा में मापन एवं मूल्यांकन
6. मंगल, डा. एस. के., शिक्षामनोविज्ञान, पी. एच. आई. लर्निंग, नई दिल्ली, 2009
7. पाण्डेय, प्रो. के. पी., आधुनिक मनोविज्ञान, विश्वविद्यालय प्रकाशन, वाराणसी
8. सिंह, प्रो. अरुण कुमार, मनोविज्ञान समाजशास्त्र तथा शिक्षा में शोध विधियाँ, मोतीलाल बनारसीदास वाराणसी


**\XXXXXXXXXXXXXXXXXXXXXX**





# सम्बद्धसाहित्याध्ययनस्य उपादेयता

डा. मदनकुमार झा[५४]

पुराकाले ज्ञानार्जनं नाम यथाशक्ति सर्वेषामपि विषयाणां बुद्धौ आरोपणं, चिन्तनं मननं, निदिध्यासनमित्यासीत् । अत एव तदानीं सर्वेऽपि अधीतिनः चलद्ग्रन्थालयरूपेण आसन्। यदि कश्चन विषयः कण्ठस्थः उपस्थितश्च न भवति तस्य मान्यता एव नासीत् । परन्तु विकासपथि परविर्तमानेषु समाजेषु संसारेऽस्मिन्नद्य सीमा अतिरिच्य सूचनाप्रविधेः ज्ञानविस्फोटनात् शास्त्राणां समृद्धिः ग्रन्थानां वृद्धिश्च सर्वं विषयं मनसि निधातुमस्मान् विवशं करोति। विवशायमाने सति सर्वविभागेषु किम्, एकस्मिन् क्षेत्रेऽपि सम्पूर्णज्ञानमाप्तुं न शक्यते । यतः महत् खलु विस्तृतम् अस्ति ज्ञानक्षेत्रं प्रवर्धमानं च । तथा च प्रतिवर्षं प्रतिमासं प्रतिदिनञ्च समालोचकैः गवेषकैश्च एकैकस्मिन्नपि शास्त्रेऽसङ्ख्याकानि पुस्तकानि रच्यन्ते चिन्तनानि च समानीयन्ते। तत्सर्वेषां पुस्तकानां नाम्नां ज्ञानमेव न भवितुमर्हति, किञ्च बहुना पुस्तकस्थविषयज्ञानेन।

तथापि अनुसन्धानकर्मणि प्रवृत्तः शोधकर्ता न्यूनातिन्यूनं स्वसमस्यया साकं सम्बद्धानि पुस्तकानि पुस्तकस्य विषयानपि अवश्यमेव ज्ञातुं प्रभवेत्। अनेन स्वीकृतसमस्यायाः समाधानान्वेषणं सरलं संजायते। पूर्वज्ञानाधारेण नूतनज्ञानार्जनं सुलभं सम्भवति। अनुसन्धाता जानीयात् यत् स्वसमस्याक्षेत्रे ज्ञानस्रोतांसि कानि कानि विद्यन्ते ? तेषामुपयोगः कथं विधीयते ? कुतः तानि स्रोतांसि सम्प्राप्यन्ते ?

एवं प्रकारेण अनुसन्धानकार्यं सम्यक् अग्रेसारयितुं यथोचितं निर्वर्तयितुं च सान्दर्भिकग्रन्थानामावश्यकता महती वर्तते। यतः सम्बद्धसाहित्यम् अनुसन्धातृगणाय वाञ्छितं मार्गं निर्दिशति। अत एव **Walter R.Brog-** महाशयः समुल्लिखति- "कस्यापि क्षेत्रस्य सम्बद्धसाहित्यं भाविकार्याय आधारभूमिं प्रकल्पयतीति"। **J.w. Best-** महोदयः अमुमेवाशयं प्रदर्शयति- "The research for related litereture is one of the first step in the research process.It is valuble guide to defing the problem." किञ्च J.w.Best महोदयः स्वकीये **शिक्षायाम् अनुसन्धानम्** इत्याख्ये ग्रन्थे "सम्बन्धसाहित्यस्य अध्ययनेन

[54] शिक्षाशास्त्रविभागाध्यापकः, रा.सं. संस्थानम्, पुरी

स्वीकृतायाः समस्यायाः क्षेत्रे इतः पूर्वं किं विचारितं किं कृतम् इत्यस्य ज्ञानं भवति। अपि च ग्रन्थालयस्य यथोचितम् उपयोगेन सम्बद्धसाहित्यस्य समुचितेन अध्ययनेन च अनुसन्धाता समस्यानां स्रोतांसि ज्ञातुं प्रभवति। तथा तद्विषयकज्ञानेन स्वीयस्य अध्ययनस्य सीमाङ्कनमपि कर्तुं शक्यते" इति सम्बद्धसाहित्यस्य स्वरूपम् उपयोगितां च सुस्पष्टं लिखितवान्।

**Albert sent** -- "Research is to see what everybody else has been and to think what no body else has thought"

इत्थं प्रदर्शितैः विवरणैः सम्बद्धसाहित्यस्य महत्वम्, उद्देश्यं, सम्प्रत्ययश्च सुस्पष्टं ज्ञायते। यद्यपि भारते शैक्षिकमनुसन्धानम् इदानीमपि मध्यमावस्थायामेव वर्तते तत्रापि विशिष्य संस्कृतशिक्षाक्षेत्रे शैक्षिकमनुसन्धानं प्रारम्भिकावस्थातः अपि पूर्वदशायामेव अस्ति। परन्तु शैक्षिकमनुसन्धानं विकासमार्गमवलम्बमानमपि अभीष्टानि

फलानि एतावता कालेनापि न प्राप्यन्ते। संस्कृतशिक्षाक्षेत्रे शैक्षिकमनुसन्धानं बाल्यावस्थायामेव विद्यमानं वाञ्छितं परिणामं न जनयति । तत्र कारणं संस्कृतज्ञानाम् आधुनिकविषयेषु परिचयाभावः आधुनिकानां च संस्कृते परिचयाभावः इत्येव। यदि सम्बद्धसाहित्यानां सारांशः संस्कृतभाषायां निबद्धः भवति तर्हि संस्कृतज्ञाः अपि शैक्षिकानुसन्धानेन अत्यन्तं लाभान्विताः भवेयुः। तस्मात् सम्बद्धसाहित्यं न केवलं शैक्षिकानुसन्धातारमेव उपकरोति अपि तु समेषां संस्कृतज्ञानामपि उपकाराय प्रकल्पयते। एतस्य सम्बद्धसाहित्यस्य अध्ययनं विविधरूपेण उपकारकमस्ति। एतस्य च प्रयोजनानि अधः निर्दिश्यन्ते -

१. समुचितायाः समस्यायाः चयनम् ।
२. समस्यानुकूलाः शोधविधयः ज्ञातुं शक्याः।
३. स्वीकृतसमस्यायाः समस्यान्तरेण तौलनिकमध्ययनम्।
४. समस्या व्यवस्थापनदृष्ट्या उपयुक्तविचारान्, सिद्धान्तान्, व्याख्याः उपकल्पनाश्चोपलभ्यन्ते।
५. अनुसन्धातुः सिद्धान्तविषयकं प्रयोगविषयकं च ज्ञानं वर्धयति।
६. स्वतन्त्र-परतन्त्र-मध्यवर्तिचराणां विषये उत्तमज्ञानं प्राप्यते।
७. अनुसन्धानयोग्यस्य विधेः चयनार्थमुपकरोति।
८. स्वतन्त्रचरे वाञ्छितं परिवर्तनमानेतुं मध्यवर्तिचराणां समुचितं नियन्त्रणं कर्तुं च शक्यते।
९. सङ्कलितसामग्रीणां विश्लेषणे व्याख्याने च अत्यन्तमुपपकरोति।





१०.समस्यासमाधानविषये समस्यायाः चयनविषये च अन्तर्दृष्टिं प्रबोधयति।
११.समस्यायाः स्वरूपं प्रकृतिं च आश्रित्य तदनुकूलानामुपकरणानां निर्धारणे उपकरोति।
१२.सम्बद्धसाहित्यस्य अध्ययनेन अनुसन्धातुः ज्ञानराशिः संवर्धते।
१३.सम्बद्धसाहित्यस्य अध्ययनेन प्रयोगकाले प्रबन्धलेखनकाले च दोषाः न्यूनीकृताः दूरिकृताः वा भवेयुः।
१४.सम्बद्धसाहित्यस्य अध्ययनेन अनुसन्धातुः समयस्य, शक्तेः अर्थस्य च समुचितः प्रयोगः भवति।

अनुसन्धानविषये पुस्तकालयस्य महद्योगदानमस्ति तल्लाभश्च प्रत्यक्षोऽ-प्रत्यक्षश्च। शिक्षाक्षेत्रे शैक्षिकसाहित्यस्य प्रत्यक्षस्रोतांसि अधोनिर्दिष्टानि वर्तन्ते। तद्यथा-

१. पत्रिकासूपलभ्यमानं सामयिकसाहित्यम्।
२. विभिन्नग्रन्थाः, समानविषये प्रकाशितानि निबन्धपुस्तकानि वार्षिकग्रन्थाश्च।
३. लघुशोधप्रबन्धः शोधप्रबन्धश्च ।
४. शिक्षासम्बन्धिप्रकाशनम्।

शैक्षिकसम्बद्धसाहित्यविषये सूचनायाः अप्रत्यक्षस्रोतोऽधोनिर्दिष्टरूपेण उपलभ्यते।

तद्यथा-

१. शिक्षासम्बन्धिविश्वज्ञानकोशः (Encyclopaedia of Education)
२. शैक्षिकसूचीपत्रम् (Educational Index)
३. शैक्षिकसारांश (Educational Abstracts)
४. सन्दर्भग्रन्थानां सूची निर्देशिका च (Bibliographics and Directories)
५. जीवनवृत्तसन्दर्भाः (Bibliographical References)
६. उद्धरणानि (Quotation Sources)

किञ्च सम्बद्धसाहित्याध्ययनरूपेण अनुभवयुक्तवरिष्ठाध्यापकानां शिक्षा-शास्त्रिणाञ्च सहयोगोऽपि प्राप्तुं शक्यते।

इत्थं सम्बद्धसाहित्यस्य बहुनि प्रयोजनानि वर्तन्ते । सारतः इदम् अनुसन्धातारं जागरूकं सावधानं च कारयति। अत एव **Van Dalen** महोदयः स्वस्मिन् Understanding Educational Research इति ग्रन्थे "They enable one to keep a fresh of the work being done in his own field and also in related field." इति युक्तमवादीत् ।

**XXXXXXXXXXXXXXXXXXXX**

## शास्त्रप्रवृत्तेः मूलाधारभूता उद्देश्य-लक्षण-परीक्षा

**दीपककुमारद्विवेदी**[55]

यत्किमपि विषयं पुरस्कृत्य व्यवस्थितं चिन्तनं तत्त्वनिर्णयार्थं विधीयते चेत् तत्र काचित् चिन्तनस्य विशिष्टा पद्धतिः अवश्यमेव स्वीकार्या भवति। एतत् चिन्तनं दार्शनिकं भवतु, साहित्यिकं भवतु, आधुनिकं भवतु, पाश्चात्यं वा। भारतीयचिन्तनस्य व्यवस्थिता आधारभूता या पद्धतिः प्रसिद्धा तत्र प्रायः सर्वत्र यस्य विषयस्य चिन्तनम् अभीष्टं भवति तस्य प्रथमम् उद्देशः क्रियते अनन्तरं लक्षणं प्रस्तूयते, तदनु लक्षितस्य तत्त्वस्य परीक्षणमपि युक्तियुक्तम् अनुष्ठीयते। प्रसिद्धः चिन्तकः मुनिः वात्स्यायनः वात्स्यायनभाष्ये गौतमसूत्रोपरि निबद्धे स्पष्टम् एवं निर्दिशति–'**त्रिधा चास्य शास्त्रस्य प्रवृत्तिः उद्देशो लक्षणं परीक्षा चेति**'।

वस्तुतः चिन्तनं कथं विधेयं, विषयाणां वैज्ञानिकं सुबोधं निरूपणं वा कथं कर्त्तव्यमिति विवेचनम् आन्वीक्षिकीविद्यारूपेण प्रसिद्धायां न्यायविद्यायां सांगोपांगं प्राप्यते। न्यायशास्त्रानुसारं उद्देशशब्दार्थः कस्यापि तत्त्वस्य विषयस्य वा नाममात्रेण कथनं भवति। नाममात्रेण वस्तुप्रतिपादनानन्तरं निरूपणीयस्य विषयस्य वास्तविकं ज्ञानमधिगन्तुं लक्षणविधानस्य विद्यते, आप्ता परम्परा कस्यापि विषयस्य लक्षणकथनं तावत् तस्य तत्त्वस्य विषयस्य वा अनितरसाधारणं धर्मवचनमेव प्रोच्यते, चिन्तनीयस्य विषयस्य लक्षणकथनानन्तरं तु कृतं लक्षणं समुचितं नवेति विविधाभिः युक्तिभिः परीक्ष्यते। इदं विविधं युक्तिसमन्वितं लक्षणौचित्यसमीक्षणमेव परीक्षणशब्दार्थत्वेन अनुमतम्।

उद्देशलक्षणपरीक्षामुखेन कथं किमपि चिन्तनं शास्त्रं वा प्रवर्तते इति उदाहरणमाध्यमेन आंजस्येन विज्ञातुं शक्यते अत्राहम् आन्वीक्षिकी इति नाम्ना प्रथितस्य न्यायशास्त्रस्य प्रवृत्तौ उद्देशलक्षणपरीक्षाणां यथा वैज्ञानिकः उपयोगः कृतो विद्यते तथा संक्षिप्तं दिदर्शयिषामि।

महर्षिणा गौतमेन न्यायसूत्राणां रचना कृतेति वयं सर्वे जानीमः न्यायदर्शने सर्वप्रथमं निरूप्यमाणानां तत्त्वानां षोडशधा विभक्तानां नाम्ना संकीर्त्तनरूपः उद्देश एव महर्षिणा गौतमेन–

'**प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः**'[56] इत्यस्मिन् सूत्रे कृतः। नाम्ना तत्त्वानां समुल्लेखानन्तरं प्रथमम् उदिष्टस्य

[55] शोधच्छात्रः, ला.ब.सं.विद्यापीठम्, नवदेहली

[56] न्यायसूत्र 1/1/1

Note- Printout of this paper can be accepted along with CERTIFICATE OF APPRECIATION only for official use.



प्रमाणतत्त्वस्य विभागं '**प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि**'[57] एतस्मिन् सूत्रे गौतमः विदधाति। कस्यापि तत्त्वस्य विभाजनमपि निरूपणकोटौ आगच्छति अथ च इदं विभाजनमपि एकविधं नाम्ना वस्तुसंकीर्तनमेवेति वक्तुं शक्यते अग्रे पुनः गौतमः प्रविभक्तानां प्रमाणानां यथाक्रमं लक्षणमधोलिखितसूत्रेषु प्रस्तौति–

1. इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारिव्यवसायात्मकं प्रत्यक्षम्।
2. अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत्सामान्यतोदृष्टं□च।
3. प्रसिद्धसाधर्म्यात् साध्यसाध्नमुपमानम्।
4. आप्तोपदेशः शब्दः।
5. स द्विविधो दृष्टादृष्टार्थत्वात्।[58]

अन्तिमे सूत्रे लक्षितस्य शब्दस्य द्विविधः विभागः कृतः। प्रमाणानाम् उद्देशं विधाय लक्षणं च कृत्वा महर्षिगौतमः प्रथमसूत्रे समुद्दिष्टस्य द्वितीयस्य प्रमेयनामकस्य तत्त्वस्य द्वादशधा विभाजनम् 'आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्' एतस्मिन् सूत्रे करोति।

एवं पंचाध्यायात्मके न्यायदर्शने प्रथमाध्याये गौतमः उद्दिष्टानां समेषां षोडशतत्त्वानां यथाक्रमं लक्षणं विभागं□च विधाय द्वितीयाध्यायात् एतेषां तत्त्वानां लक्षणस्य सविधि परीक्षणमपि विविधाभिः युक्तिभिः करोति एतावता स्थालीपुलाकन्यायेन कथं शास्त्राणां प्रवृत्तेः मूलाधाररूपेण उद्देशः लक्षणं परीक्षा च भवतीति समीहितं सिद्ध्यति।

गौतममुनिना प्रथमसूत्रो षोडशपदार्थाणां यः उद्देशः कृतः। अत्र तस्य लक्ष्यं केवलं उद्देशः एव नास्ति। किन्तु उद्देशेन सह अनुबन्धचतुष्टयस्य अपि कथनमस्ति। यदि तस्य लक्ष्यम् उद्देश एव अभवत् तर्हि निग्रहस्थानपदार्थे प्रथमसूत्रस्य समाप्तिः भवेत्। अत एव न्यायदर्शने '**तत्त्वज्ञानान्निःश्रेयसाधिगमः**' इति सूत्रस्य अन्तिमे भागे अनुबन्धचतुष्टयस्य स्पष्टरूपेण उल्लेखः। इतरशास्त्रेषु च अनुबन्धचतुष्टयेन सह उद्देशस्य प्रयोगो भवति।

**सिद्धार्थं ज्ञातसम्बन्धं श्रोतुं श्रोता प्रवर्तते।**
**शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः।।**[59]
**ज्ञातार्थं ज्ञातसम्बन्धं श्रोतुं श्रोता प्रवर्तते।**
**ग्रन्थादौ तेन वक्तव्यः सम्बन्धः स प्रयोजनम्।।**[60]

यावत् पाठकस्य इदं ज्ञानं न भवति अस्य शास्त्रस्य विषयः कः? पठनेन को लाभः? किं प्रयोजनम्? अस्य ज्ञानं कर्तुं शक्यते न वा? तावत् तस्य पठने प्रवृत्तिर्न भवति।

आचार्यकौटिल्येन अर्थशास्त्रस्य प्रथमप्रकरणस्य नाम एव विद्योद्देशप्रकरणं विहितम्। श्रीधराचार्येण स्वरचितायां न्यायकन्दलीव्याख्यायामुद्देशलक्षणे वर्णिते यतो हि सर्वेषु शास्त्रेषु उद्देशलक्षणमनिवार्यमस्ति, किन्तु श्रीधराचार्यदृष्ट्या परीक्षा न अनिवार्या अत एव नाभिहिता। अमरकोषकारामरसिंहेन[61] स्वग्रन्थे उद्देशं विधाय तदनु नामलिंगानुशासनस्य रचना कृता।

[57] न्यायसूत्र 1/1/2

[58] न्यायसूत्र 1/1/4,5,6,7

[59] मीमांसा, श्लो. वा. 1/17

[60] वाचस्पत्यम्

[61] समाहृत्यान्यतन्त्राणि संक्षिप्तैः प्रतिसंस्कृतैः।

Note- Printout of this paper can be accepted along with CERTIFICATE OF APPRECIATION only for official use.

## लक्षणम्

**'लक्षणं तु असाधारणधर्मवचनम्'** कस्यचन पदार्थस्य लक्षणं तस्य असाधारणो धर्मो भवति। कस्यापि पदार्थस्य लक्षणकरणप्रयोजनम् इतरपदार्थात् पृथकत्वसम्पादनं प्रोक्तं□च–**'समानाऽसमानजातीयव्यवच्छेदो हि लक्षणार्थः'**। यथा सास्नादिमत्वं गोर्लक्षणम्। अत्र सास्नादिमत्त्वं गोः असाधारणो धर्मोऽस्ति। इतरव्यावृत्तिः व्यवहारश्च द्वे प्रयोजने लक्षणस्य भवतः। असाधारणधर्मः अर्थात् विशेषधर्मः यः केवलं स्वलक्ष्ये वसति। यो धर्मः लक्ष्यातिरिक्ते अलक्ष्यभूते महिषादिपशुषु अपि मिलति सः लक्षणं न भवति। अत एव **'अलक्ष्यवृत्तित्वमतिव्याप्तिः'**[62] यथा 'शृंगित्वं' गोर्लक्षणमतिव्याप्तिदोषेण दूषितमस्ति। अर्थात् महिषादिपशुः शृंगयुक्तो भवति अत एव शृंगित्वं गोः लक्षणमिति न वक्तुं शक्यते।

यस्य लक्षणस्य अविष्कारं करिष्यामः तदस्माकं सम्पूर्णेऽपि लक्ष्ये पूर्णतया व्याप्तं भवेत् यथा–शाबलेयत्वं कृष्णवर्णत्वं, शुक्लवर्णत्वं वा गोः लक्षणानि अव्याप्तिदोषेण दूषितानि भवन्ति। **'लक्ष्यैकदेशाऽवृत्तित्वम्'**[63] अव्याप्तिदोषलक्षणमभ्युपगम्यते। लक्षणमसम्भवदोषशून्यमपि भवेत्। लक्ष्यमात्राऽवृत्तित्वम् असम्भवः, यथा एक शफवत्त्वं गोर्लक्षणम् अर्थात् एकशफेन युक्ता गौः। विना एक शफेन गौः अत्र संसारे भवतीति असम्भवदोषो लक्षणेऽस्मिन् भविष्यति। अत एव लक्षणमतिव्याप्ति–अव्याप्ति–असम्भव–दोषरहितमित्यावश्यकं तथ्यं निर्गलति। सास्नादिमत्त्वं निर्दुष्टलक्षणं गोः अस्ति इति ध्येयम्।




साम्प्रतमुपर्युक्तदोषाणां लक्षणमेव विज्ञेयं, लक्ष्यवृत्तित्वे सति अलक्ष्यवृत्तित्वमतिव्याप्तिः, लक्ष्यैकदेशाऽवृत्तित्वमव्याप्तिः, लक्ष्यमात्र्याऽवृत्तित्वम् असम्भवः इति। इमानि लक्षणानि प्रौढनैयायिकनये एवं परिष्कृतानि बोध्यानि–

1. लक्ष्यतावच्छेदकसमानाधिकरणत्वम् अतिव्याप्तिः।
2. लक्ष्यतावच्छेदकसमानाधिकरणाऽभावप्रतियोगित्वमव्याप्तिः।
3. लक्ष्यतावच्छेदकव्यापकीभूताभावप्रतियोगित्वमसम्भव इति।

अतिव्याप्तेः, अव्याप्तेः, असम्भवाच्च पृथक् केचन अन्येऽपि दोषाः उपस्थिता भवन्ति। यथा–

**1. आत्माश्रयः** – यस्य वस्तुनः लक्षणं क्रियते तस्य लक्षणस्य कृते तस्यैव ग्रहणं आवश्यकं चेत् तत्र आत्माश्रयो दोषो भवति। यथा गोः लक्षणं 'गवेतरावृत्तित्वे सति सकलगोवृत्तित्वम्' अत्र स्वज्ञानार्थम् अपेक्षितस्यास्य लक्षणज्ञानस्य विषयीभूता गौः अस्ति अतः पुनः एतल्लक्षणज्ञानार्थं गोः ज्ञानमावश्यकमिति लक्षणमिदमात्माश्रयदोषकवलितमिति ध्येयम्।

---

सम्पूर्णमुच्यते वर्गैर्नामलिंगानुशासनम्।।
प्रायशो रूपभेदेन साहचर्याच्च कुत्रचित्।
स्त्री–पुंनपुंसकं ज्ञेयं तद्विशेषविधेः क्वचित्।। अमरकोषः

[62] तर्कभाषा पृ. 8

[63] तौव पृ. 8





'स्वज्ञानसापेक्षज्ञानविषयत्वम्'[64]




ज्ञानस्यास्य विषयः गौः

कस्यापि वस्तुनः ज्ञानार्थं तस्य वस्तुनः लक्षणज्ञानम् अपेक्षितं भवति। यदि इदं लक्षणमपि तद्वस्तु घटितं भवति तर्हि लक्षणज्ञानार्थं तस्य वस्तुनः एव ज्ञानं पुनः अपेक्षितं भवति फलतः एवंविधं लक्षणं यद् लक्ष्यघटितं भवति तत् खलु आत्माश्रयदोषकवलितमिति। तार्किकैः प्रोच्यते।

**2. अन्योन्याश्रयः – 'स्वज्ञानसापेक्षज्ञानसापेक्षज्ञानविषयत्वम्'**[65] अन्योन्याश्रयः यदि गोः लक्षणं 'सास्नावत्त्वम्' इति कश्चन करोति तर्हि अत्र सास्ना ज्ञानाय पुनः सास्ना ज्ञानमावश्यकम्। सास्नाज्ञानस्य कृते 'गोः गले लम्बमानं चर्म' इति सास्नालक्षणमुखेन सास्नाज्ञानमनिवार्यम्। एतल्लक्षणज्ञानार्थं□च पुनः लक्षणघटकस्य गोः ज्ञानमपेक्षितमेवेति भवत्यत्रा अन्योश्रयः।

गोः ज्ञानार्थं – सास्नाज्ञानमपेक्षितम्

सास्नाज्ञानार्थं – गोः ज्ञानमपेक्षितम्




कस्यापि वस्तुनः ज्ञानाय अपेक्षीयं यद् ज्ञानं तत्र यदि तस्य वस्तुनः ज्ञानमेव अपेक्षितं तर्हि अन्योऽन्याश्रयदोषः भवति। यथा गोः लक्षणम्–'महिषभिन्नत्वं' महिषस्य च लक्षणं 'गोर्भि□त्वम्' अत्र गोः ज्ञानार्थम् अपेक्षितस्य गोलक्षणस्य ज्ञानार्थं पुनः गो एव ज्ञानम् अपेक्षितं भवति परिणामतः अन्योऽन्याश्रयदोषः प्रस्तुते लक्षणे स्फुटः।

---

[64] तर्कभाषा, पृ. 9

[65] तर्कभाषा, पृ. 9

चक्रकम् – **'स्वज्ञानसापेक्षज्ञानसापेक्षज्ञानसापेक्षज्ञानविषयत्वम्'**[66]




यदि गोः ज्ञानाय 'गोत्वम्' इति लक्षणं क्रियते तर्हि गोत्वज्ञानाय 'सास्नाभाववति अविद्यमानत्वे सति सास्नावति विद्यमानत्वम्' इत्येवं रूपस्य गोत्वलक्षणस्य ज्ञानमनिवार्यम्। पुनरस्य लक्षणस्य ज्ञानार्थं लक्षणघटितायाः सास्नायाः ज्ञानमावश्यकम्। एतदर्थं सास्नायाः लक्षणं 'गोः गले लम्बमानं चर्म' इति क्रियते। पुनरस्य 'गोः गले लम्बमानं चर्म' इति लक्षणस्य ज्ञानाय गोः ज्ञानमपेक्षितम्। अस्यां स्थितौ गोः ज्ञानार्थं चक्रमिव भ्रमणं विधाय ज्ञानस्य सापेक्षता भवति, फलतः अत्र चक्रकदोषः सिद्ध्यति।

**अप्रसिद्धिः** – लक्षणस्य प्रसिद्धिः अत्यावश्यकी यदि अप्रसिद्धियुक्तं लक्षणं करिष्यते तर्हि तत्रा अप्रसिद्धिदोषः स्फुरति। यथा गोः लक्षणं 'असरोमरसनत्वम्' अप्रसिद्धिग्रस्तं कस्यापि प्राणिनः जिह्वा रोमयुक्ता न भवति। एतावता 'असरोमरसनत्वम्' इति लक्षणं गोः खपुष्पवत् वन्ध्यापुत्रवद्वा अप्रसिद्धिदूषितमिति तथ्यं निर्गलति।

एभिः सर्वैः दोषैः रहितत्वं लक्षणस्यावश्यकम्। 'व्यावृत्तिर्व्यवहारो' वा लक्षणस्य प्रयोजनम् विद्वद्भिः प्रोच्यते। सजातीयविजातीयपदार्थाभ्यां भेद एव व्यावृत्तिः। यथा गवि सजातीयेभ्यः अश्वादिपशुभ्यः तथा विजातीयेभ्यः मानवादिभ्यो यो भेदो ज्ञातो भवति स भेद एव व्यावृत्तिः। द्वितीयं लक्षणस्य प्रयोजनं तु व्यवहारो भवति अस्यार्थः लक्ष्ये लक्ष्यबोधकपदविशेषस्य प्रवृत्तिः अर्थात् प्रयोगः।

**परीक्षा – 'परित ईक्षणं परीक्षा'**[67] कस्यापि विषयस्य सम्पूर्णप्रकारेण परीक्षणं, निरीक्षणं□च परीक्षा। परीक्षायाः विषये भाष्यकारः वात्स्यायनः न्यायभाष्ये लिखति **'लक्षितस्य यथा लक्षणमुपपद्यते न वेति प्रमाणैरवधारणं परीक्षा'**[68] यो पदार्थः लक्षितः तस्य यल्लक्षणं वर्णितं तल्लक्षणमनुगुणं न वा अस्य निर्णयार्थं प्रमाणैः यत् परीक्षणं सा एव परीक्षा।

उद्देशलक्षणपरीक्षा इमाः तिस्रः प्रवृत्तयः सन्ति तासां अनन्यथासिद्धोपयोगिता। यतो हि शास्त्रस्य रचना येन उद्देश्येन भवति तस्य शास्त्रस्य सिद्धिः उद्देशलक्षणपरीक्षां विना न कर्तुं शक्यते। उद्देशः सर्वप्रथममावश्यकं किन्तु पदार्थस्य उद्देशमात्रेण सम्यग् ज्ञानं न भवति यतो हि कस्यापि पदार्थस्य सम्यग्ज्ञानार्थम् अन्यपदार्थेभ्यः

---

66 तर्कभाषा, पृ. 10
67 तर्कभाषा, पृ. 12
68 न्यायभाष्यम्, पृ. 8





तस्य विलक्षणतायाः ज्ञानमावश्यकम्। यत् तावत् लक्षणेनैव साध्यम्। अत एव लक्षणेन विना पदार्थस्य सम्यग्ज्ञानं न भवति।

लक्षणस्याभिधानं शास्त्रेषु प्रकारद्वयेन भवति यथा न्यायदर्शनस्य वात्स्यायनभाष्ये वर्णितम्–**'तत्रोपदिष्टस्य प्रविभक्तस्य लक्षणमुच्यते, यथा प्रमाणस्य प्रमेयस्य च। उद्दिष्टस्य लक्षितस्य च विभागवचनं यथा छलस्य।'**[69]

न्यायदर्शने कस्योद्देशानन्तरं विभागः, लक्षणं□च भवति इति जिज्ञासायां प्रमाणपदार्थस्य प्रथमसूत्रे **प्रमाणप्रमेयसंशयः**[70] इति सूत्रे प्रथमं उद्देशः कृतः, तदनु तृतीयसूत्रे **'प्रत्यक्षानुमानोपमानशब्दा प्रमाणानि'**[71] इत्येवं विभागः दर्शितः तत्पश्चात् प्रत्येकप्रमाणस्य लक्षणं कृतम्।

द्वितीयक्रमः पदार्थनिरूपणप्रसंगे उद्देशं कृत्वा तदनन्तरं लक्षणं□च विधाय विभागस्य प्रसिद्धोऽस्ति। यथा–**वचनविधातोऽर्थविकल्पोपपत्या छलम्,**[72] तत्त्रिविधं **वाक्छलं सामान्यच्छलम्– उपचारच्छलं चेति**[73], **अविशेषाऽभिहितेऽर्थे वक्तुरभिप्रायादर्थान्तरकल्पना वाक्छलम्**[74]।

उद्दिष्टस्य छलस्य न्यायदर्शने सामान्ये परिचये प्राप्ते तस्य विशेषपरिचयार्थं विभागः क्रियते।

विभागविषयं स्वीकृत्य न्यायवार्तिककारः उद्योतकरः न्यायवार्तिकग्रन्थे तथा जयन्तभट्टः न्यायमंजरीग्रन्थे निर्दिशति यत् शास्त्रस्य चतुर्धा प्रवृत्तिः विभागानामविर्भावेन स्वीकार्या इति। एवं वात्स्यायनवर्णितां त्रिधा प्रवृत्तिं इमे समालोचयन्ति। अस्य प्रश्नस्य उत्तरमपि ददति –

'त्रिविधा चास्य शास्त्रस्य प्रवृत्तिरित्युक्तमुद्दिष्टविभागश्च न त्रिविधायां शास्त्रप्रवृत्तावन्तर्भवतीति, तस्मादुद्दिष्टविभागो युक्तः न, उद्दिष्टविभागस्योद्देश एवान्तर्भावात्, उद्दिष्टविभाग उद्देश एवान्तर्भवतीति कस्मात्? लक्षणसामान्यात् समानं लक्षणं नामधेयेन पदार्थाभिधानमुद्देश[75] इति।

'ननु विभागलक्षणा चतुर्थ्यपि प्रवृत्तिरस्त्येव, भेदवत्सु प्रमाणसिद्धान्तच्छलादिषु तथा व्यवहारात्, सत्यम् प्रथमसूत्रोद्दिष्टे भेदवति पदार्थे भवत्येव विभागः, उद्देशरूपानपायात्तु उद्देश एवासौ। सामान्यसंज्ञाया कीर्तनमुद्देशः प्रकारभेदसंज्ञया कीर्तनं विभाग इति। तथा चोद्देशतयैव तत्र तत्र भाष्यकारो व्यवहरति अयर्थार्थः प्रमाणोद्देश इत्याक्षेपे तस्माद् यथार्थ एव प्रमाणोद्देश इति च समाधानमभिदधानः तस्मात् त्रिविधैव प्रवृत्तिः।'[76]

एतावता शास्त्रप्रवृत्तिः भारतीयचिन्तनपरम्परायां त्रिविधैव उद्देशलक्षणपरीक्षामाध्यमेन स्वीकृतेति सूपपद्यते।

## सन्दर्भग्रन्थसूची


1. अमरकोशः : श्रीमन्नालालः, 'अभिमन्युः' चौखम्भा विद्याभवनम्, वाराणसी
2. कौटिलीयम् अर्थशास्त्रम् : पं. रघुनाथसिंहः, कृष्णदास अकादमी, वाराणसी, 1983
3. तर्कभाषा : श्रीबदरीनाथशुक्लः, मोतीलाल बनारसीदास, 2006


---

69 न्यायभाष्यम्, 1/1/2
70 न्यायदर्शनम् 1/1/1
71 न्यायदर्शनम् 1/1/3
72 न्यायदर्शनम् 1/2/10
73 न्यायदर्शनम् 1/2/11
74 न्यायदर्शनम् 1/2/12
75 न्यायवार्तिक 1/1/3
76 न्यायः म प्रमाणप्रकरणम्

4. तर्कामृतम् (चषकसहितम्) : प्रो. पीयूषकान्तदीक्षितः, नाग पब्लिकेशन, देहली

5. न्यायदर्शनम् : उदयवीरशास्त्री, विजयकुमारगोविन्दरामः हासानन्दः, देहली, 1999

6. न्यायभाष्यम् : द्वारिकादासशास्त्री, सुरभि प्रकाशनम्, वाराणसी, 1986

7. न्यायमंजरी : जयन्तभट्टः, सम्पा. ढुण्ढिराजशास्त्री, चौखम्भा संस्कृत संस्थानम्, वाराणसी, 1934

8. न्यायवार्तिकतात्पर्यटीका : राजेश्वरशास्त्री द्रविडः, चौखम्भा संस्कृत संस्थानम्, वाराणसी, 1989

9. मनुस्मृतिः : डा. राकेशशास्त्री, विद्यानिधिप्रकाशनम्, देहली, 2005

10. प्रशस्तपादभाष्यम् : श्रीदुर्गाधरझाशर्मा, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, 1997

11. याज्ञवल्क्यस्मृतिः : नारायणरामाचार्यः काव्यतीर्थः, नाग पब्लिशर्स जवाहरनगर, देहली

12. वाचस्पत्यम् : श्रीतारानाथतर्कवाचस्पतिः, चौखम्भा संस्कृत सीरीज आफिस, वाराणसी, 1982

13. श्रीमद्भागवतमहापुराणम् : चौखम्भा संस्कृत प्रतिष्ठानम्, वाराणसी


XXXXXXXXXXXXXXXXXXXXX

# वर्तमानयुग में तर्कबुद्धि एवं तर्कशास्त्र की उपादेयता

**विद्यावाचस्पति डा. सदानन्द झा**[77]

परब्रह्म की ईक्षणशक्ति से क्षुभित त्रिगुणात्मक प्रकृति के कार्यभूत अनन्त तथा दुरबगाह अगाध संसार सिन्धु के विविध भयानक दु:खरूपी आवर्तों में विवर्तमान प्राणिमात्र की लक्ष्य त्रिविध दु:खों की आत्यन्तिक निवृत्ति के साधनभूत आप्त निरीह तथा सबकी कल्याण कामनामें परायण महर्षियों के वचन शास्त्र कहे जाते हैं । ये मानवमात्र के श्रेय तथा प्रेय मार्ग के प्रदर्शक है । वे शास्त्र वेदान्त आदि प्रसिद्ध है । इन्हीं में एक शास्त्र तर्कशास्त्र है, जिसके नामान्तर न्याय, आन्वीक्षिकी आदि है । यद्यपि तर्क न्यायदर्शन का

[77] व्या.विभागाध्यक्षः, ज.ना.ब्र.आ.सं.म.वि. लगमा, दरभंगा, बिहारः





पदार्थ विशेष है तथापि न्यायको तर्कशास्त्र कहने में कोई विरोध नहीं है । न्याय का पदार्थविशेष तर्क कारण, और युक्तियों से अविज्ञात अर्थ के तत्व का ऊह अर्थात् अनुसंधान है ।[१] आत्मा आदि विशेष विवादग्रस्त विषयों में तत्वनिर्णय के लिए न्यायदर्शन ने विशेषरूप से युक्तियों और कारणों से ऊहापोह की है और यही उसका प्रधान विषय है । अत: न्यायशास्त्र को तर्कशास्त्र कहने में कोई आपत्ति नहीं हो सकती । न्याय प्रमाणों से ज्ञात अर्थ की परीक्षा है ।[२] न्याय का दूसरा नाम आन्वीक्षिकी भी है । प्रत्यक्ष और और आगम से ज्ञात अर्थ का पुनरीक्षण-बुद्धि से समालोचन अन्वीक्षा है और उससे प्रवृत्त शास्त्र आन्वीक्षिकी है ।[३] इस प्रकार तर्कशास्त्र, न्याशास्त्र तथा आन्वीक्षिकी एक ही शास्त्र के नामान्तर हैं क यह शास्त्र समस्त विद्यायों का प्रदीप, समस्त कर्मो का उपाय और सर्वधर्मो का आश्रय है ।[४]

इस शास्त्र की प्रवृत्ति जड़ मानव की मननशक्ति है । मानव मननशील प्राणी है । वह हमेशा मनन करके ही किसी कर्म में प्रवृत्त होता है ।[५] भारतीय तर्कशास्त्र के बीजवैदिक ऋषियों की उन आत्म-अनात्म विषयों में होनेवाली शास्त्रचर्चाओं में निहित थे जिनमें जय पराजय की प्रतिस्पर्धा नहीं होती थी । बाद में वह प्रतिस्पर्द्धा भी आने लगी और वादी को अनुत्तर करनेके लिए जल्प, वितण्डा तथा निग्रह स्थानों की भी चर्चा होने लगी । तत्त्वके निश्चय के लिए जल्प और वितण्डा दोनो निश्चय के लिए जल्प और वितण्ड दोनों शाखा के रक्षक कण्टकों के समान माने जाने लगे ।[६] न्यायशास्त्र के विकास में धार्मिक भावना का योग महत्त्वपूर्ण है । समाज में होनेवाली धार्मिक क्रान्तियों ने भी उस शास्त्र को प्रभावित किया । प्राचीनन्याय आत्मवादी, मध्यन्याय अनात्मवादी और नव्यन्याय आत्मवाद का संस्थापक है ।

उपनिषदों में आत्मनिग्रय के समय अनात्म विषयक भी चर्चाएँ हैं, परन्तु प्रधानता आत्मवाद का है । बौद्धन्याय अनात्मवादी है, और नव्यन्याय, जो कि बौद्धधर्मके पतन के अवशेष पर प्रादुर्भूत हो सका, आत्मवाद का प्रतिष्ठापक है । तर्कशास्त्र के आद्यप्रवर्तक अक्षपादगौतम है । इन्होंने सर्वप्रथम न्यायसूत्रकी रचना की ।[७] आचार्य वात्स्यायन ने न्यायसूत्र पर भाष्य लिखा । विषयकी दृष्टि से न्याय के दो युग होते हैं साध्यप्रधानयुग

और साधनप्रधानयुग । उनमें प्रथम वह वैदिक युग है जिसमें तत्त्वजिज्ञासु ऋषि एकत्र होकर तथा जिगीषासे रहित होकर आत्म-अनात्म का साध्यपक्ष प्रमेय विवेचन ही प्रधान था । बादमें साधनप्रमाणों का ही विवेचन प्रधान होगया और साध्य प्रमेय विवेक गौण । संस्कृत भाषा में तर्कशास्त्र का साहित्य अति विस्तृत है । इसे हम तीनभागों में विभक्त कर सकते हैं । प्राचीन साहित्य, मध्य साहित्य और नव्यन्याय साहित्य । इनमें प्राचीन तर्कशास्त्रकारों में आचार्य गौतम, वात्स्यायन, उद्धोतकार, वाचस्पति मिश्र, उदयनाचार्य, जयन्त भट्ट, वर्धमान, श्रीकण्ठ, वाचस्पति (द्वितीय), रामभद्र, जयराम, विश्वनाथ और गोविन्दखन्ना हैं । इन्हों ने क्रमशः न्यायसूत्र, न्यायभाष्य, न्यायवार्तिक, न्यायवार्तिक तात्पर्यटीका, न्यावार्तिक तात्पर्यटीका परिशुद्धि, न्यायमंजरी, न्यायनिबन्धप्रकाश, न्यायालङ्कार, न्यायसूत्रोद्धार, न्यायरहस्य, न्यायसिद्धान्तमाला, न्यायसूत्रवृत्ति और न्यायसंक्षेपकी रचना की । मध्य शास्त्रकारों में बौद्ध-जैन न्यायसाहित्य है । इसप्रकार के साहित्यलेखकों में दिङ्नाग, परमार्थ, शङ्करस्वामी, धर्मपाल, सिद्धसेन, दिवाकर, जिनभद्र गणि आदि हैं । बौद्धधर्म के पश्चात् होनेवाले नव्यन्याय साहित्यकारों में गंगेशोपाध्याय, वर्द्धमानोपाध्याय, पक्षधरमिश्र आदि हैं । इस प्रकार गौतम से अपनी यात्रा प्रारम्भ करने वाला तर्कशास्त्र उत्तरोतर जटिल एवं दुर्गममार्गों को पारकरता जटिलतर होता गया । नव्यन्याय युग में तर्कभाषा, तर्कसंग्रह, पदार्थदीपिका प्रभृति अनेक ग्रन्थ लिखे गये ।

भारतीय तर्कशास्त्र की प्रवृत्ति त्रिविध है । उद्देश्य, लक्षण और परीक्षा ।[८] उसमें उद्देश्य पदार्थों का नाम मात्र से संकीर्तन है । असाधारण धर्म का कथन लक्षण है । लक्षित लक्षण उपयुक्त है या नहीं ऐसा विचार परीक्षा है । तर्क शास्त्र की यह शैली प्रसिद्ध है । आचार्य गौतम के अनुसार इस शास्त्र का भी प्रयोजन निःश्रेय की प्राप्ति है, जो त्रिविध दुःखों की आत्यन्तिक निवृत्तिरूप है और जिसे अपवर्ग भी कहते हैं । प्रमाण, प्रमेय, संशय, प्रयोजन, दृष्टान्त, सिद्धान्त, अवयव, तर्क, निर्णय, वाद, जल्प, वितण्डा, हेत्वाभास, छल जाति, और निग्रह स्थानों के ज्ञान से निःश्रेयस का अधिगम हो है ।[९] इन्हीं षोड़श पदार्थों का विवेचन न्यायशास्त्र का प्रमुख प्रयोजन है और जिसमें प्रमाण विवेचन की प्रधानता है । क्योंकि न्यायशास्त्र का अधिक समय उसी के निरूपण में व्यतीत होता है ।





भारतीय तर्कशास्त्र की आत्माएँ अनेक, विभु तथा बुद्धि आदि गुणों से युक्त होने से सगुण है । इस प्रकार भारतीय दर्शन में न्यायशास्त्र और तर्कशास्त्र अभिन्न है । व्याकरणशास्त्र के उद्भट विद्वान् आचार्य नागेशभट्टेन स्वकीय परमलघुमञ्जूषा ग्रन्थ में तार्किक शब्द का प्रचुर प्रयोग किया है, और नैयायिकशब्दका अत्यल्प ।

पाश्चात्यदर्शनमें तर्कशास्त्र के लिए लाजिक (Logic) शब्द का प्रयोग किया जाता है । यह शब्द युनानी भाषा की मूल लौगस् धातु से बनी है जिसका अर्थ विचार तथा वाणी और दोनो है । पाश्चात्य तर्कशास्त्र के प्रवर्तक यूनानके महान दार्शनिक तथा प्रख्यात विजेता सिकन्दर के गुरु अरस्तू माने जाते हैं । उनके अनुसार द्रव्य(Substance), गुण (Quality), कर्म (Action), समवाय (Relation), परिमाण (Quantity), काल (Time), देश (Space), क्रियाऽभाव (Passion), अधिकार सम्बन्ध (Possession) और स्थिति (Situation) रूप दश पदार्थ माने हैं जिन्हें कैटागरीज (Categories) कहा जाता है । उन्होंने मीमांसकों के समान अनुमान के प्रतिज्ञा, हेतु और उदाहरणरूप तीन ही अवयव माने हैं ।[१०] इस प्रकार पाश्चात्य और पौरस्त्य तर्कशास्त्र में भेद होते हुए भी साम्य है ।

उपर्युक्तविवेचनों से यह स्पष्ट भासित होता है कि तर्कशासत्र का सम्बन्ध मुख्यरूप से बुद्धि से है । इसमें बुद्धि की प्रधानता है । यह शास्त्र अन्धविश्वास का प्रबल शत्रु है । मानव मात्रको इससे उपदेश मिलता है कि वह किसी बातों को सुनकर ही स्वीकार न करे । उसका अन्वीक्षण करे, परीक्षण करे तभी स्वीकार करें । तर्कशास्त्र मानव मस्तिष्क को प्रखर बनाता है । यदि मानव परम्परागत वातों को सुनकर मौन बैठा रहता तो आज मङ्गलग्रह पर नहीं पहुँच पाता। इस वैज्ञानिक युग में तर्कशास्त्र की महती उपयोगिता है । यह श्रेय एवं प्रेय का साधक है ।

******

## सन्दर्भ

१. अविज्ञात तत्त्वेऽर्थे कारणोपपत्ति तस्तत्त्वज्ञानार्थमूहस्तर्कः । न्यायसूत्र - १.१.४०

२. प्रमाणैरर्थपरीक्षणं न्याय: (न्यायसूत्र पर वात्स्यायन भाष्य)

३. प्रत्यक्षागमाभ्यामीक्षितस्य अन्वीक्षणमन्वीक्षा, तया प्रवर्तत इत्यान्वीक्षिकी न्यायविद्या न्यायशास्त्रम् वही

४. प्रदीप: सर्वविद्यानामुपाय: सर्वकर्मणाम् ।
आश्रय: सर्वधर्माणां विद्योद्देशे प्रकीर्तिता ॥ न्यायशास्त्रम्

५. मत्वा कर्माणि सीव्यति अथर्ववेद १०.७.३२

६. तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे, कण्टकशाखावरणवत् न्यायसूत्रम्

७. यदक्षपाद: प्रवरो मुनीनां शमाय शास्त्रे जगतो जगाद न्यायवार्त्तिकम्

८. त्रिविधा चास्य शास्त्रस्य प्रवृत्तिरुद्देशो लक्षणं परीक्षा चेति न्यायसूत्रम् १.१.२

९. प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभास-च्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्नि:श्रेयसाधिगम: । न्यायसूत्रम् १.१.१

१०. परमलधुमञ्जूषा शिरोमणि हिन्दी व्याख्या, सम्पादक डॉ.जयशङ्कर त्रिपाठी लघुमञ्जूषा टिप्पणी पृ.२४ पृ.६१, २९७

११. तर्करहस्य दीपिका, पृ.४

xxxxxxxxxxxxxxxxxxxxx

# वेदान्त से मोक्षप्राप्ति

प्रो. जितेन्द्र टेलर[78]

अनन्त ज्ञानराशिको वेद कहेते है । इस संपूर्ण ज्ञानका जिसमे पर्यवसान होता है जीसमे अंत होता है. उसे वेदान्त कहते है । इस "अंत"" का अर्थ विनाश नहीं है । अंत काअर्थ है संपूर्ण ज्ञान राशिका चरम ओर परम फल । ज्ञान का चरम फल ही उसका मुल स्त्रोतभी है । मतलब यह है कि जिसमें से समस्त ज्ञान निकलता है ओर जिसमे जाकर मिल जाता है ।

[78] Shri M.C.Rathva Arts College, Pavi-jetpur(Dist:Baroda), Gujarat





उसका नाम वेदान्त है । वेदान्त प्रतिपादित तत्व ही यह वेदान्त है । वेदान्त शब्द से उपनिषद या औपनिषद ज्ञान ही लक्षित होता है ।

वेदान्तशास्त्रसे ब्रह्मज्ञान या ब्रह्मका ही बोध होता है । "ब्रह्मणोविद्या ब्रह्मविद्या "" अर्थात् ब्रह्मकी विद्या ब्रह्मविद्या है । ब्रह्म ही परब्रह्म परमात्मा है जो अज, अनादि, अविनाशी,शुद्ध, चैतन्य, सर्वात्मक, सच्चिदानंद स्वरुप है । श्रीमद् भगवद्गीता में भी भगवानने कहा है कि "अक्षरं ब्रह्म परमम्"।"[2] उस ब्रह्मका जिस विद्यासे ज्ञान हो वह ब्रह्मविद्या कहेलाती है । अत:ब्रह्मविधा या ब्रह्मज्ञान पर्यायवाची शब्द है ।"उपनिषीदति प्राप्नोति ब्रह्मात्मभावो अनया इति उपनिषद" जिससे ब्रह्मात्मभाव प्राप्त किया जाय वह उपनिषद कहलाता है इस व्युत्पत्तिसे उपनिषद इसी ब्रह्मज्ञान वा आत्मज्ञान के साधक सिद्ध होते है ।

ब्रह्मज्ञानकी प्राप्तिके प्रतिपादक तीन ग्रंथ माने जाते है : उपनिषद् , ब्रह्मसुत्र और भगवद्गीता । जिनको वेदान्तप्रस्थानत्रयी कहते है । इनमेसे उपनिषद् तो अपौरूषेय वेदका विभाग है । दुसरा ब्रह्मसुत्र वेदव्यासका बनाया हुआ वेदान्तका सर्वोत्तम ग्रंथ है जिसका वर्णन गीतामे भी आया हुआ है,यथा –"ब्रह्मसुत्रपदैश्चैव हेतुमब्दिविनिश्चितै:"। [3] तिसरी भगवद्गीता ज़िसमें भी ब्रह्मविद्याका उपादेय उपदेश दिया हुआ है । इन तीनो ग्रंथोमें ब्रह्मका प्रतिपादन होनेसे ये तीनो ही एक वेदान्तके सिद्धांतके प्रतिपादक है ।

अद्वैतवेदान्त अनुसार एक ब्रह्मके अतिरिक्त अन्य कोइ वस्तु सत्य नहीं जानी जाती । ब्रह्मज्ञानके तत्वोका निरूपण उपनिषदोमें अनुक्रमसे नहीं हुआ है किन्तु वे यत्र- तत्र बिखरे हुए है । उनकी एकवाक्यता हुये बीना वे सिद्धांत समजमें नहीं आ सकते । अत: उनकी एकवाक्यता करके अंतिम सिद्धांत के तात्पर्यका परिज्ञान कराने के लिये वेदव्यासने ब्रह्मसुत्रों की रचना की और उन्ही सिद्धांतोका विशदीकरण भगवद्गीतामें हुआ है ।

वेदान्तका प्रतिपाध विषय "एक अद्वितीय जरामरणशून्य परब्रह्म" है । दुसरे शब्दोमें कहा जाये तो वेदान्त अथवा ब्रह्मविधाकी एकमात्र शिक्षा "अहं ब्रह्मास्मि"," ऐकमेवाद्वितियं ब्रह्म" है । यही बात गीता मे स्पष्ट बतायी गइ है कि-

**ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नै ब्रह्मणाहुतम ।**
**ब्रह्मैव तेन गन्तव्यं ब्रह्माकर्मसमाधिना ॥[4]**

आत्माके ऐकत्वका प्रतिपादन करना, भेदको औपाधिक बतलाना जीवात्मा आर परमात्मामें भी वास्तविक भेदका अभाव बतलाना, आत्माकी अखंड चिदानन्दैक- रसरूपताका अनुभव कराना – आदि सब कुछ उपनिषदोका कार्य है । इसीमें सारे उपनिषदोंका विशेषत: "इशावास्य" से लेकर "कैवल्य" पर्यन्त द्वादश उपनिषदोका परम तात्पर्य है । ईशावास्य उपनिषद के प्रथम मंत्रमेंभी यही ब्रह्मज्ञानका निष्कर्ष दिया हुआ है कि " ईशावास्यमिदं सर्वम् " । अर्थात् इदं शब्द से निर्दिश्यमान परोक्ष ओर अपरोक्ष सब कार्यरूप ईश्वर या ब्रह्मसे व्याप्त है, वसने योग्य है , अवष्टम्भ करने योग्य है । आच्छादन करने योग्य है,अर्थात् ब्रह्मस्वरूप है ।

वेदान्तसूत्र अर्थात् ब्रह्मसुत्रमे भी “सर्वं खलु इदं ब्रह्म” इस श्रुति प्रतिपादित सिद्धांतका विस्तृत वर्णन है । “अहं ब्रह्मास्मि ”, “जीवो ब्रह्मैव नापरः” इत्यादि वाकयो का यही सिद्धांत है कि जीव और ब्रह्म एक है । इनके पृथक पृथक प्रतीत होनेका कारण अविद्या अथवा अज्ञान है । अविद्याके कारण जीव अपने आपको ब्रह्मसे पृथक समझता है । तत्वज्ञान होने से जब अविद्याका नाश होजाता है,तब वह अपने आपको ब्रह्मसे अभिन्न होकर मुक्त हो जाता है । जीव ओर ब्रह्ममें जो भिन्नता भास रही हैं, वह सत्य या तात्विक नहीं है किन्तु उपाधि या मायाके सम्बन्ध से ऐसी प्रतिती हो रही है । एक ब्रह्म ही सत्य है उससे अतिरीक्त सब नाम रूपात्मक वस्तु मात्र अनित्य है । जब गुरूपसत्ति से तत्वका ज्ञान हो जाता है तब जीव अपने नित्य –शुद्ध–बुद्ध – मुक्त स्थितिका अनुभव करने लग जाता है यही मुक्ति है । जगत भ्रमके अतिरिक्त और कुछ नही है । ब्रह्म अपनी माया - शक्तिके द्वारा जगद्भ्रम उत्पन्न कर रहा है परमात्मा ही स्वयं जीवरूप में प्रवेश कर नाम और रूपका भेद उत्पन्न करता है । इस नाम रूप के द्वारा ही परमात्मासे द्वैत संसारकी उत्पत्ति होती है । मायामय जीवभावको ब्रह्मभाव प्राप्त कराने के लिये वेदान्तशास्त्रमें तीन प्रकारकी उपासनाका उपदेश है: (१) अंगावबद्ध- अंगावबद्ध उपासना में यज्ञ के अंगोमे ब्रह्मभावना करनी होती है । (२) प्रतीक उपासना- प्रतीक उपासनामें ब्रह्मसे भिन्न वस्तुओमें ब्रह्मभावना की जाती है । (३) अहंग्रह उपासना - अहंग्रह उपासनामें “अहं ब्रह्मास्मि”,“सोऽहम” इस प्रकार जीव-ब्रह्मकी अभिन्न भावना की जाती है । इस प्रकारकी भावना ही अद्वैतवादकी उपासना है । इस ब्रह्मभावकी प्राप्ति विद्यासे होती है । आत्मज्ञान या तत्वज्ञानका नाम ही विद्या है । इस प्रकारकी विद्यासे अन्य हो वह अविद्या अथवा अज्ञान कहलाता है ।

विद्याका विशद वर्णन मुन्डकोपनिषदमें हुआ है । विष्णुभगवानसे सबसे प्रथम देवता ब्रह्मा हुए । ब्रह्माजीके ज्येष्ठपुत्र अथर्वा (अर्थवन्) हुए । इस अथर्वाको ब्रह्माने ब्रह्मविद्याका उपदेश दिया । ब्रह्मकी दी हुई ब्रह्मसंबधी विद्या होने से इसका नाम ब्रह्मविद्या है । यह ब्रह्मविद्या सर्व विद्याओंकी प्रतिष्ठा या भित्तिरूप है । अथर्वाने यह विद्या अंगिराको सिखायी, अंगिराने भरद्वाजके पुत्र सत्यवाहको, भारद्वाजसत्यवाहने अंगिरसको और अंगिरसने शैानकको बताई ।

अतः यह मुन्डकोपनिषद अथर्वाका कहा हुआ है । अथर्वा और कर्दमकी पुत्री चित्तिसे दधीचि हुए, जिन्होने अपनी हड्डी इन्द्रको वृत्रासुरके वधार्थ प्रदान की थी । उन्ही दधीचिने अश्विनीकुमारोको ब्रह्मविद्याका उपदेश दिया ,जिसका वर्णन बृहदारण्यक उपनिषद्में है । अतः उसमें कहा हैं कि - दधीचिने अश्वके शिरसे अश्विनीकुमारको मधुविद्याका उपदेश दिया । मधुविद्या, आध्यात्मविद्या और ब्रह्मविद्या ये तीनो एक ही प्रदार्थके वाचक शब्द है ।
दध्यंग आथर्वणका दिया हुआ वह ब्रह्मविद्याका उपदेश ईशावास्योपनिषद्में वर्णित है । उन्ही दध्यंग आथर्वण और वेदवती द्वारा पिप्पलाद हुए जिन्होने सुकेशा,सत्यकाम आदि छः ऋषियोंको ब्रह्मविद्याका उपदेश दिया । जिसका वर्णन प्रश्नोपनिषद्में है । इस प्रकार ब्रह्मविद्याका प्रचार हुआ । भगवान नारायणने ब्रह्माजीको, ब्रह्माजीने अपने ज्येष्ठपुत्र





अथर्वाको, अथर्वाने दधीचिको,दधीचिने पिप्पलादको और पिप्पलादने छः ऋषियोंको ब्रह्मविद्याका उपदेश दिया । यह ब्रह्मज्ञानकी वैदिक परंपरा है ।

विद्या दो प्रकारकी है- परा और अपरा । अपराविद्यामें ऋग्वेद,यजुर्वेद,सामवेद,अथर्ववेद, शिक्षा,कल्प,व्याकरण,निरूक्त,छंद,ज्योतिष है । ओर अपराविधा वह है जिसमें अक्षर-अविनाशी ब्रह्मका ज्ञान होता है । जैसे अपनेमें से मकडी तंतुजालको उत्पन्न करती है और अपने मे ही समेट लेती है और जैसे पृथिवीमेंसे औषधियाँ (अन्नादि) उत्पन्न होती है ,जैसे जीवित पुरुषमें से केश और लोम उत्पन्न होते है वैसे हि अक्षरब्रह्मसे यह विश्व (जगत) उत्पन्न होता है । परब्रह्मकी अनिच्छारूप ईच्छा (तप )से प्रकृति (अन्न) हुई । प्रकृति से प्राण, मन, सत्य, लोक ओर कर्म हुए । कर्मसे अमृत या मोक्ष हुआ । सर्वज्ञ और सर्ववित् है जिसका ज्ञानरूप तप (ईच्छा या विचार) है,उस परमात्मासे ब्रह्मा, नामरूप (जीव) और अन्न (प्रकृति) ये तीन उत्पन्न हुए । इस प्रकारके ज्ञानको ब्रह्मज्ञान या ब्रह्मविद्या कहेते है. इस विद्या के अभावको अविद्या कहते है ।

मुन्डकोपनिषद्में लिखा है कि- “अविद्या में स्थिर पुरुष अपने आपको धीर और पंडित मानते है, अतः वे मोहित होकर इधर उधर आधात सहन करते हुए ठीक वैसे ही शभटकते रहते है, जैसे अन्धे पुरुषसे ले जाये जाते अंधे चोतरफ घुमते है । अविद्यामें स्थिर पुरुष ऐसा अभिमान करते है कि हम कृतार्थ है । रागासक्त होने के कारण कर्मनिष्ठ पुरुष विद्या अर्थात् ज्ञान को नही जानते है । जिससे उनके उत्तमलोक क्षीण हो जाते है ओर वे नीचे की योनियों मे गीर जाते है ।

